श्लोकार्थ—यह तो युग का स्वभाव ही है । इसमें दोष किसका ? इसीलिये तो कमल नयन भगवान् श्रीहरि समीप में रहते हुए भी इसे सह रहे हैं ।

अष्टसप्ततितमः श्लोकः

सूत उवाच

इति तद्वचनं श्रुत्वा विस्मयं परमं गता ।
भक्तिरूचे वचो भूयः श्रूयतां तच्च शौनक ॥७८॥

पदच्छेद—

इति तद् वचनम् श्रुत्वा, विस्मयम् परमम् गता ।
भक्तिः ऊचे वचः भूयः, श्रूयताम् तद् च शौनक ॥

शब्दार्थ—

इति	१.	इस प्रकार	भक्तिः	५.	भक्ति
तद्	२.	उन (नारद जी) के	ऊचे	१२.	कही
वचनम्	३.	वचन को	वचः	११.	बात
श्रुत्वा	४.	सुनकर	भूयः	१०.	फिर से (जो)
विस्मयम्	७.	आश्चर्य को	श्रूयताम्	१५.	(आप) सुनें
परमम्	६.	अत्यन्त	तद्	१४.	उसे
गता ।	८.	प्राप्त हो गयी	च	९.	तथा
			शौनक ॥	१३.	हे शौनक जी !

श्लोकार्थ—इस प्रकार उन नारद जी के वचन को सुनकर भक्ति अत्यन्त आश्चर्य को प्राप्त हो गयी तथा फिर से जो बात कही, हे शौनक जी ! उसे आप सुनें ।

एकोनाशीतितमः श्लोकः

भक्तिरुवाच सुरर्षे त्वं हि धन्योऽसि मद्भाग्येन समागतः ।
साधूनां दर्शनं लोके सर्वसिद्धिकरं परम् ॥७९॥

पदच्छेद— सुरर्षे त्वम् हि धन्यः असि, मत् भाग्येन समागतः ।
साधूनाम् दर्शनम् लोके, सर्व सिद्धि करम् परम् ॥

शब्दार्थ—

सुरर्षे, त्वम्	१. हे देवर्षि नारद ! आप	साधूनाम्, दर्शनम्	६. सन्तों का दर्शन
हि	७. ही	लोके	५. संसार में
धन्यः, असि	२. धन्य हैं (तथा)	सर्व, सिद्धि	८. सभी सिद्धियों का
मत्, भाग्येन	३. मेरे सौभाग्य से	करम्	१०. कारण (है)
समागतः ।	४. पधारे हैं	परम् ॥	९. प्रधान

श्लोकार्थ—हे देवर्षि नारद ! आप धन्य हैं तथा मेरे सौभाग्य से पधारे हैं। संसार में सन्तों का दर्शन ही सभी सिद्धियों का प्रधान कारण है ।

अशीतितमः श्लोकः

जयति जगति मायां यस्य कायाधवस्ते, वचनरचनमेकं केवलं चाकलय्य ।
ध्रुवपदमपि यातो यत्कृपातो ध्रुवोऽयम्, सकलकुशलपात्रं ब्रह्मपुत्रं नतास्मि ॥८०॥

पदच्छेद—जयति जगति मायाम् यस्य कायाधवः ते, वचन रचनम् एकम् केवलम् च आकलय्य ।
ध्रु वपदम् अपि यातः यत् कृपातः ध्रु वः अयम्, सकल कुशल पात्रम् ब्रह्मपुत्रम् नता अस्मि ॥

शब्दार्थ—

जयति	८. जीत लिया था	ध्रु वपदम्	१४. अटल पद को
जगति, मायाम्	७. संसार में माया को	अपि	१३. भी
यस्य	१. जिस	यातः	१५. पा लिया था (मैं)
कायाधवः	६. कयाधू पुत्र प्रह्लाद ने	यत्, कृपातः	१०. जिस (आप) की कृपा से
ते	२. आपके	ध्रु वः	१२. ध्रुव ने
वचन, रचनम्	४. उपदेश वाक्य को	अयम्	११. इस
एकम्, केवलम्	३. केवल एक	सकल, कुशल	१६. समस्त मंगलों की
च	९. तथा	पात्रम्, ब्रह्मपुत्रम्	१७. खान (उन) देवर्षि नारद को
आकलय्य ।	५. धारण करके	नता अस्मि ॥	१८. प्रणाम करती हूँ

श्लोकार्थ—जिस आपके केवल एक उपदेश-वाक्य को धारण करके कयाधू पुत्र-प्रह्लाद ने संसार में माया को जीत लिया था तथा जिस आपकी कृपा से इस ध्रुव ने भी अटल-पद को पा लिया था; मैं समस्त मंगलों की खान उन देवर्षि नारद को प्रणाम करती हूँ ।

इति श्रीपद्मपुराणे उत्तरखण्डे श्रीमद्भागवतमहात्म्ये भक्तिनारदसमागमो नाम प्रथमः अध्यायः ॥१॥

अथ द्वितीयः अध्यायः

प्रथमः श्लोकः

नारद उवाच

वृथा खेदायसे बाले अहो चिन्तातुरा कथम् ।
श्रीकृष्णचरणाम्भोजं स्मर दुःखं गमिष्यति ॥१॥

पदच्छेद—

वृथा खेदायसे बाले, अहो चिन्ता आतुरा कथम् ।
श्रीकृष्ण चरण अम्भोजम्, स्मर दुःखम् गमिष्यति ॥

शब्दार्थ—

वृथा	२. व्यर्थ में	**श्रीकृष्ण**	८. भगवान् श्री कृष्ण के
खेदायसे	३. उदास हो रही हो	**चरण**	९. चरण
बाले	१. हे बाले (तुम)	**अम्भोजम्**	१०. कमल का
अहो	४. अरे ! (तुम)	**स्मर**	११. स्मरण करो (तुम्हारा)
चिन्ता	५. शोक से	**दुःखम्**	१२. (सारा) दुःख
आतुरा	६. व्याकुल	**गमिष्यति ॥**	१३. दूर हो जावेगा
कथम् ।	७. क्यों हो		

श्लोकार्थ—हे बाले ! तुम व्यर्थ में उदास हो रही हो । अरे ! तुम शोक से व्याकुल क्यों हो ? भगवान् श्रीकृष्ण के चरण कमल का स्मरण करो । तुम्हारा सारा दुःख दूर हो जावेगा ।

द्वितीयः श्लोकः

द्रौपदी च परित्राता येन कौरवकश्मलात् ।
पालिता गोपसुन्दर्यः स कृष्णः क्वापि नो गतः ॥२॥

पदच्छेद—

द्रौपदी च परित्राता, येन कौरव कश्मलात् ।
पालिताः गोप सुन्दर्यः, सः कृष्णः क्व अपि नो गतः ॥

शब्दार्थ—

द्रौपदी	३. द्रौपदी की	**सुन्दर्यः**	७. सुन्दर (गोपिकाओं) का
च	५. तथा	**सः**	९. वे भगवान्
परित्राता	४. रक्षा की	**कृष्णः**	१०. श्री कृष्ण
येन	१. जिन्होंने	**क्व**	११. कहीं
कौरव कश्मलात् ।	२. कौरवों के अत्याचार से	**अपि**	१२. भी
पालिताः	८. पालन किया	**नो**	१३. नहीं
गोप	६. ग्वालों की	**गतः ॥**	१४. गये हैं

श्लोकार्थ—जिन्होंने कौरवों के अत्याचार से द्रौपदी की रक्षा की तथा ग्वालों की सुन्दर गोपिकाओं का पालन किया, वे भगवान् श्री कृष्ण कहीं भी नहीं गये हैं ।

तृतीयः श्लोकः

त्वं तु भक्तिः प्रिया तस्य सततं प्राणतोऽधिका ।
त्वयाऽऽहूतस्तु भगवान् याति नीचगृहेष्वपि ॥३॥

पदच्छेद—

त्वम् तु भक्तिः प्रिया तस्य, सततम् प्राणतः अधिका ।
त्वया आहूतः तु भगवान्, याति नीच गृहेषु अपि ॥

शब्दार्थ—

त्वम्	१.	तुम	त्वया	९.	तुम्हारे
तु	२.	तो	आहूतः	१०.	बुलाने पर
भक्तिः	३.	भक्ति (हो और)	तु	११.	तो
प्रिया	८.	प्रिय (हो) ।	भगवान्	१२.	भगवान् श्री हरि
तस्य	४.	उन (भगवान् श्री कृष्ण) को	याति	१६.	जाते हैं
सततम्	५.	सदा	नीच	१३.	पापियों के
प्राणतः	६.	प्राणों से (भी)	गृहेषु	१४.	घरों में
अधिकाः ।	७.	अधिक	अपि ॥	१५.	भी

श्लोकार्थ—तुम तो भक्ति हो और उन भगवान् श्री कृष्ण को सदा प्राणों से भी अधिक प्रिय हो । तुम्हारे बुलाने पर तो भगवान् श्रीहरि पापियों के घरों में भी जाते हैं ।

चतुर्थः श्लोकः

सत्यादित्रियुगे बोधवैराग्यौ मुक्तिसाधकौ ।
कलौ तु केवला भक्तिर्ब्रह्मसायुज्यकारिणी ॥४॥

पदच्छेद—

सत्य आदि त्रियुगे बोध, वैराग्यौ मुक्ति साधकौ ।
कलौ तु केवला भक्तिः, ब्रह्म सायुज्य कारिणी ॥

शब्दार्थ—

			साधकौ ।	७.	साधन (थे),
सत्य	१.	सतयुग	कलौ	९.	कलियुग में
आदि	२.	त्रेता और द्वापर (इन)	तु	८.	किन्तु
त्रियुगे	३.	तीनों युगों में	केवला	१०.	केवल
बोध	४.	ज्ञान और	भक्तिः	११.	भक्ति (ही)
वैराग्यौ	५.	वैराग्य (ही)	ब्रह्मसायुज्य	१२.	सायुज्य मुक्ति को
मुक्ति	६.	मोक्ष के	कारिणी ।।	१३.	देने वाली (है)

श्लोकार्थ—सतयुग, त्रेता और द्वापर इन तीनों युगों में ज्ञान और वैराग्य ही मोक्ष के साधन थे; किन्तु कलियुग में केवल भक्ति ही सायुज्य मुक्ति को देनेवाली है ।

पञ्चमः श्लोकः

इति निश्चित्य चिद्रूपः सद्रूपां त्वां ससर्ज ह ।
परमानन्दचिन्मूर्तिः सुन्दरीं कृष्णवल्लभाम् ॥५॥

पदच्छेद—

इति निश्चित्य चित् रूपः, सत् रूपाम् त्वाम् ससर्ज ह ।
परमानन्द चित् मूर्तिः, सुन्दरीम् कृष्ण वल्लभाम् ॥

शब्दार्थ—

इति	१.	ऐसा	ससर्ज	१५.	रचा है
निश्चित्य	२.	निश्चय करके	ह ।	३.	ही
चित्	४.	विज्ञान	परमानन्द	६.	अखण्डानन्द
रूपः	५.	स्वरूप	चित्	७.	चैतन्य
सत्	१३.	सत्त्व	मूर्तिः	८.	श्रीहरि ने
रूपाम्	१४.	गुण से	सुन्दरीम्	९.	परम सुन्दरी (और)
त्वाम्	१२.	तुम्हें	कृष्ण	१०.	श्री कृष्ण की
			वल्लभाम् ॥	११.	प्यारी

श्लोकार्थ—ऐसा निश्चय करके ही विज्ञान स्वरूप, अखण्डानन्द चैतन्य श्रीहरि ने परमसुन्दरी और श्रीकृष्ण की प्यारी तुम्हें सत्त्वगुण से रचा है।

षष्ठः श्लोकः

बद्ध्वाञ्जलिं त्वया पृष्टं किं करोमीति चैकदा ।
त्वां तदाऽऽज्ञापयत्कृष्णो मद्भक्तान् पोषयेति च ॥६॥

पदच्छेद—

बद्ध्वा अञ्जलिम् त्वया पृष्टम्, किम् करोमि इति च एकदा ।
त्वाम् तदा आज्ञापयत् कृष्णः, मत् भक्तान् पोषय इति च ॥

शब्दार्थ—

बद्ध्वा	३.	हाथ	त्वाम्	१२.	तुम्हें
अञ्जलिम्	४.	जोड़कर	तदा	१०.	तब
त्वया	२.	तुमने	आज्ञापयत्	१४.	आज्ञा दी थी
पृष्टम्	६.	पूछा था	कृष्णः	११.	भगवान् श्रीहरि ने
किम्	८.	क्या	मत्	१६.	मेरे
करोमि	९.	करूँ ?	भक्तान्	१७.	भक्तों का
इति	५.	यह	पोषय	१८.	पोषण करो
च	७.	कि (मैं)	इति	१३.	यही
एकदा ।	१.	एकबार	च ॥	१५.	कि

श्लोकार्थ—एक बार तुमने हाथ जोड़कर यह पूछा था कि मैं क्या करूँ ? तब भगवान् श्रीहरि ने तुम्हें यही आज्ञा दी थी कि मेरे भक्तों का पोषण करो।

सप्तमः श्लोकः

अङ्गीकृतं त्वया तद्वै प्रसन्नोऽभूद्धरिस्तदा ।
मुक्तिं दासीं ददौ तुभ्यं ज्ञानवैराग्यकाविमौ ॥७॥

पदच्छेद—

अङ्गीकृतम् त्वया तत् वै, प्रसन्नः अभूत् हरिः तदा ।
मुक्तिम् दासीम् ददौ तुभ्यम्, ज्ञान वैराग्यकौ इमौ ॥

शब्दार्थ—

अङ्गीकृतम्	३.	स्वीकार कर लिया था	मुक्तिम्	१०.	मुक्ति को
त्वया	१.	तुमने	दासीम्	११.	दासी रूप में (एवम्)
तत्	२.	उस (आदेश)को	ददौ	१५.	दे दिये
वै	६.	बहुत	तुभ्यम्	९.	तुम्हें
प्रसन्नः	७.	प्रसन्न	ज्ञान	१३.	ज्ञान और
अभूत्	८.	हुये (तथा)	वैराग्यकौ	१४.	वैराग्य को (पुत्ररूप में)
हरिः	५.	श्रीहरि	इमौ ॥	१२.	इन
तदा ।	४.	इससे			

श्लोकार्थ—तुमने उस आदेश को स्वीकार कर लिया था। इससे श्री हरि बहुत प्रसन्न हुये तथा तुम्हें मुक्ति को दासी रूप में एवम् इन ज्ञान और वैराग्य को पुत्र रूप में दे दिये।

अष्टमः श्लोकः

पोषणं स्वेन रूपेण वैकुण्ठे त्वं करोषि च ।
भूमौ भक्तविपोषाय छायारूपं त्वया कृतम् ॥८॥

पदच्छेद—

पोषणम् स्वेन रूपेण, वैकुण्ठे त्वम् करोषि च ।
भूमौ भक्त विपोषाय, छाया रूपम् त्वया कृतम् ॥

शब्दार्थ—

पोषणम्	५.	(भक्तों की) रक्षा	भूमौ	८.	भूलोक में
स्वेन	३.	अपने	भक्त	९.	भक्तों के
रूपेण	४.	(यथार्थ) रूप से	विपोषाय	१०.	पालन के लिये
वैकुण्ठे	२.	वैकुण्ठ लोक में	छाया	१२.	छाया
त्वम्	१.	तुम	रूपम्	१३.	रूप को
करोषि	६.	करती हो	त्वया	११.	तुमने
च ।	७.	तथा	कृतम् ॥	१४.	धारण किया है

श्लोकार्थ—तुम वैकुण्ठ लोक में अपने यथार्थ रूप से भक्तों की रक्षा करती हो तथा भूलोक में भक्तों के पालन के लिये तुमने छाया रूप को धारण किया है।

नवमः श्लोकः

मुक्तिं ज्ञानं विरक्तिं च सह कृत्वा गता भुवि ।
कृतादिद्वापरस्यान्तं महानन्देन संस्थिता ॥९॥

पदच्छेद—

मुक्तिम् ज्ञानम् विरक्तिम् च, सह कृत्वा गता भुवि ।
कृत आदि द्वापरस्य अन्तम्, महत् आनन्देन संस्थिता ॥

शब्दार्थ—

मुक्तिम्	२. मोक्ष		कृत	९. सतयुग
ज्ञानम्	३. ज्ञान		आदि	१०. त्रेता और
विरक्तिम्	५. वैराग्य को		द्वापरस्य	११. द्वापर के
च	४. और		अन्तम्	१२. अन्त तक
सह	६. साथ		महत्	१३. बड़े
कृत्वा	७. लेकर		आनन्देन	१४. आनन्द से
गता	८. आयी हो (तथा)		संस्थिता ॥	१५. रही हो
भुवि ।	१. भूलोक में (तुम)			

श्लोकार्थ—भूलोक में तुम मोक्ष, ज्ञान और वैराग्य को साथ लेकर आयी हो तथा सतयुग, त्रेता और द्वापर के अन्त तक बड़े आनन्द से रही हो ।

दशमः श्लोकः

कलौ मुक्तिः क्षयं प्राप्ता पाखण्डामयपीडिता ।
त्वदाज्ञया गता शीघ्रं वैकुण्ठं पुनरेव सा ॥१०॥

पदच्छेद—

कलौ मुक्तिः क्षयम् प्राप्ता, पाखण्ड आमय पीडिता ।
त्वत् आज्ञया गता शीघ्रम्, वैकुण्ठम् पुनः एव सा ॥

शब्दार्थ—

कलौ	१. कलियुग में		त्वत्	८. तुम्हारी
मुक्तिः	५. मुक्ति		आज्ञया	९. आज्ञा से
क्षयम्	६. क्षय रोग को		गता	१५. चली गई
प्राप्ता	७. प्राप्त हो गई (थी)		शीघ्रम्	१२ तत्काल
पाखण्ड	२. पाखण्ड रूपी		वैकुण्ठम्	१४. वैकुण्ठ लोक को
आमय	३. रोग से		पुनः	११. फिर से
पीडिता ।	४. ग्रस्त		एव	१३. ही
			सा ॥	१०. वह

श्लोकार्थ—कलियुग में पाखण्ड रूपी रोग से ग्रस्त मुक्ति क्षय रोग को प्राप्त हो गई थी। तुम्हारी आज्ञा से वह फिर से तत्काल ही वैकुण्ठ लोक को चली गई ।

एकादशः श्लोकः

स्मृता त्वयापि चात्रैव मुक्तिरायाति याति च ।
पुत्रीकृत्य त्वयेमौ च पार्श्वे स्वस्यैव रक्षितौ ॥११॥

पदच्छेद—

स्मृता त्वया अपि च अत्र एव, मुक्तिः आयाति याति च ।
पुत्रीकृत्य त्वया इमौ च, पार्श्वे स्वस्य एव रक्षितौ ॥

शब्दार्थ—

स्मृता	३.	स्मरण करने पर	**च ।**	९.	और
त्वया	२.	तुम्हारे	**पुत्रीकृत्य**	१३.	पुत्र बनाकर
अपि	५.	भी	**त्वया**	१४.	तुमने
च	१.	तथा	**इमौ**	१२.	इन दोनों को
अत्र	६.	यहाँ (भूलोक में)	**च**	११.	एवम्
एव	७.	भी	**पार्श्वे**	१७.	पास
मुक्तिः	४.	मुक्ति	**स्वस्य**	१५.	अपने
आयाति	८.	आती है	**एव**	१६.	ही
याति	१०.	जाती है	**रक्षितौ ॥**	१८.	रखा है

श्लोकार्थ—तथा तुम्हारे स्मरण करने पर मुक्ति भी यहाँ भूलोक में भी आती है और जाती है। एवम् इन दोनों को पुत्र बनाकर तुमने अपने ही पास रखा है।

द्वादशः श्लोकः

उपेक्षातः कलौ मन्दौ वृद्धौ जातौ सुतौ तव ।
तथापि चिन्तां मुञ्च त्वमुपायं चिन्तयाम्यहम् ॥१२॥

पदच्छेद—

उपेक्षातः कलौ मन्दौ, वृद्धौ जातौ सुतौ तव ।
तथापि चिन्ताम् मुञ्च त्वम्, उपायम् चिन्तयामि अहम् ॥

शब्दार्थ—

उपेक्षातः	२.	उपेक्षा होने से	**तथापि**	८.	फिर भी
कलौ	१.	कलियुग में	**चिन्ताम्**	१०.	चिन्ता
मन्दौ	५.	सुस्त (और)	**मुञ्च**	११.	छोड़ दो
वृद्धौ	६.	वृद्ध	**त्वम्**	९.	तुम
जातौ	७.	हो गये हैं	**उपायम्**	१३.	उपाय
सुतौ	४.	दोनों पुत्र	**चिन्तयामि**	१४.	सोच रहा हूँ
तव ।	३.	तुम्हारे	**अहम् ॥**	१२.	मैं

श्लोकार्थ—कलियुग में उपेक्षा होने से तुम्हारे दोनों पुत्र सुस्त और वृद्ध हो गये हैं; फिर भी तुम चिन्ता छोड़ दो। मैं उपाय सोच रहा हूँ।

त्रयोदशः श्लोकः

कलिना सदृशः कोऽपि युगो नास्ति वरानने ।
तस्मिंस्त्वां स्थापयिष्यामि गेहे गेहे जने जने ॥१३॥

पदच्छेद—

कलिना सदृशः कः अपि, युगः न अस्ति वरानने ।
तस्मिन् त्वाम् स्थापयिष्यामि, गेहे-गेहे जने-जने ॥

शब्दार्थ—

कलिना	२.	कलियुग के	**तस्मिन्**	८.	इस कलियुग में
सदृशः	३.	समान	**त्वाम्**	९.	तुम्हें
कः अपि	४.	कोई	**स्थापयिष्यामि**	१४.	स्थापित करूँगा
युगः	५.	युग	**गेहे**	१०.	घर
न	६.	नहीं	**गेहे**	११.	घर में (और)
अस्ति	७.	है (अतः मैं)	**जने**	१२.	जन
वरानने ।	१.	हे सुमुखि !	**जने ॥**	१३.	जन में

श्लोकार्थ—हे सुमुखि ! कलियुग के समान कोई युग नहीं है। अतः मैं इस कलियुग में तुम्हें घर घर में और जन-जन में स्थापित करूँगा ।

चतुर्दशः श्लोकः

अन्यधर्मांस्तिरस्कृत्य पुरस्कृत्य महोत्सवान् ।
तदा नाहं हरेर्दासो लोके त्वां न प्रवर्तये ॥१४॥

पदच्छेद—

अन्य धर्मान् तिरस्कृत्य, पुरस्कृत्य महोत्सवान् ।
तदा न अहम् हरेः दासः, लोके त्वाम् न प्रवर्तये ॥

शब्दार्थ—

अन्य	१.	दूसरे	**अहम्**	११.	मैं
धर्मान्	२.	धर्मों को	**हरेः**	१२.	श्रीहरि का
तिरस्कृत्य	३.	छोड़कर	**दासः**	१३.	दास
पुरस्कृत्य	५.	साथ	**लोके**	७.	संसार में
महोत्सवान् ।	४.	महोत्सवों के	**त्वाम्**	६.	तुम्हें (यदि)
तदा	१०.	तो	**न**	८.	नहीं
न	१४.	नहीं	**प्रवर्तये ॥**	९.	स्थापित कर दूँ

श्लोकार्थ—दूसरे धर्मों को छोड़कर महोत्सवों के साथ तुम्हें यदि संसार में नहीं स्थापित करदूँ तो मैं श्रीहरि का दास नहीं ।

पञ्चदशः श्लोकः

त्वदन्विताश्च ये जीवा भविष्यन्ति कलाविह ।
पापिनोऽपि गमिष्यन्ति निर्भयं कृष्णमन्दिरम् ॥१५॥

पदच्छेद—

त्वत् अन्विताः च ये जीवाः, भविष्यन्ति कलौ इह ।
पापिनः अपि गमिष्यन्ति, निर्भयम् कृष्ण मन्दिरम् ॥

शब्दार्थ—

त्वत्	६. भक्ति से	इह ।	२. इस
अन्विताः	७. युक्त	पापिनः	९. पापी होने पर
च	१. तथा	अपि	१०. भी (वे)
ये	४. जो	गमिष्यन्ति	१४. चले जायेंगे
जीवाः	५. प्राणी	निर्भयम्	११. बेधड़क
भविष्यन्ति	८. होंगे	कृष्ण	१२. श्री कृष्ण के
कलौ	३. कलियुग में	मन्दिरम् ॥	१३. वैकुण्ठ धाम को

श्लोकार्थ—तथा इस कलियुग में जो प्राणी भक्ति से युक्त होंगे; पापी होने पर भी वे बेधड़क श्रीकृष्ण के वैकुण्ठधाम को चले जायेंगे ।

षोडशः श्लोकः

येषां चित्ते वसेद्भक्तिः सर्वदा प्रेमरूपिणी ।
न ते पश्यन्ति कीनाशं स्वप्नेऽप्यमलमूर्तयः ॥१६॥

पदच्छेद—

येषाम् चित्ते वसेत् भक्तिः, सर्वदा प्रेम रूपिणी ।
न ते पश्यन्ति कीनाशम्, स्वप्ने अपि अमल मूर्तयः ॥

शब्दार्थ—

येषाम्	१. जिनके	न	१४. नहीं
चित्ते	२. हृदय में	ते	८. वे
वसेत्	७. निवास करती है	पश्यन्ति	१५. देखते हैं
भक्तिः	५. भक्ति	कीनाशम्	१३. यमराज को
सर्वदा	६. सदा	स्वप्ने	११. स्वप्न में
प्रेम	३. प्रेम	अपि	१२. भी
रूपिणी ।	४. रूपा	अमल	९. निर्मल
		मूर्तयः ॥	१०. मन-जन

श्लोकार्थ—जिनके हृदय में प्रेमरूपा भक्ति सदा निवास करती है; वे निर्मल मन-जन स्वप्न में भी यमराज को नहीं देखते हैं।

सप्तदशः श्लोकः

न प्रेतो न पिशाचो वा राक्षसो वासुरोऽपि वा।
भक्तियुक्तमनस्कानां स्पर्शने न प्रभुर्भवेत् ॥१७॥

पदच्छेद—

न प्रेतः न पिशाचः वा, राक्षसः वा असुरः अपि वा।
भक्ति युक्त मनस्कानाम्, स्पर्शने न प्रभुः भवेत् ॥

शब्दार्थ—

न	४.	न तो	अपि	१३.	भी
प्रेतः	५.	प्रेत	वा।	११.	और
न	७.	न ही	भक्तियुक्त	१.	भक्ति भाव से परिपूर्ण
पिशाचः	८.	पिशाच	मनस्कानाम्	२.	हृदय वाले (भक्तों) को
वा	६.	और	स्पर्शने	३.	छूने में
राक्षसः	१०.	राक्षस	न	१५.	नहीं
वा	९.	तथा	प्रभुः	१४.	समर्थ
असुरः	१२.	असुर	भवेत् ॥	१६.	हो सकते हैं

श्लोकार्थ—भक्तिभाव से परिपूर्ण हृदयवाले भक्तों को छूने में न तो प्रेत और न ही पिशाच तथा राक्षस और असुर भी समर्थ नहीं हो सकते हैं।

अष्टादशः श्लोकः

न तपोभिर्न वेदैश्च न ज्ञानेनापि कर्मणा।
हरिर्हि साध्यते भक्त्या प्रमाणं तत्र गोपिकाः ॥१८॥

पदच्छेद—

न तपोभिः न वेदैः च, न ज्ञानेन अपि कर्मणा।
हरिः हि साध्यते भक्त्या, प्रमाणम् तत्र गोपिकाः ॥

शब्दार्थ—

न	२.	न	कर्मणा।	१०.	कर्मकाण्ड से
तपोभिः	३.	तप से	हरिः	१.	भगवान् श्री हरि
न	५.	न	हि	११.	ही
वेदैः	६.	वेद पाठ से	साध्यते	१२.	प्रसन्न किये जा सकते हैं
च	४.	और	भक्त्या	१३.	(वे तो केवल) भक्ति से (प्रसन्न किये जाते हैं)
न	७	न	प्रमाणम्	१६	साक्षी हैं
ज्ञानेन	८.	ज्ञान से	तत्र	१४.	इसमें
अपि	९.	या	गोपिकाः ॥	१५.	गोपियाँ

श्लोकार्थ—भगवान् श्री हरि न तप से और न वेद पाठ से, न ज्ञान से या कर्म काण्ड से ही प्रसन्न किये जा सकते हैं। वे तो केवल भक्ति से प्रसन्न किये जाते हैं। इसमें गोपियाँ साक्षी हैं।

एकोनविंशः श्लोकः

नृणां जन्मसहस्रेण भक्तौ प्रीतिर्हि जायते ।
कलौ भक्तिः कलौ भक्तिर्भक्त्या कृष्णः पुरः स्थितः ॥१९॥

पदच्छेद—

नृणाम् जन्म सहस्रेण, भक्तौ प्रीतिः हि जायते ।
कलौ भक्तिः कलौ भक्तिः, भक्त्या कृष्णः पुरः स्थितः ॥

शब्दार्थ—

नृणाम्	४. मनुष्यों की		**कलौ**	८. कलियुग में
जन्म	२. जन्मों (के प्रयास) से		**भक्तिः**	९. भक्ति ही (भगवत्प्राप्ति का)
सहस्रेण	१. हजारों		**कलौ**	१०. एकमात्र
भक्तौ	५. भक्ति में		**भक्तिः**	११. साधन है
प्रीतिः	६. रुचि		**भक्त्या**	१२. भक्ति से
हि	३. ही		**कृष्णः**	१३. भगवान् श्री कृष्ण
जायते ।	७. उत्पन्न होती है		**पुरः**	१४. सामने
			स्थितः ॥	१५. खड़े रहते हैं

श्लोकार्थ—हजारों जन्मों के प्रयास से ही मनुष्यों की भक्ति में रुचि उत्पन्न होती है। कलियुग में भक्ति ही भगवत्प्राप्ति का एकमात्र साधन है। भक्ति से भगवान् श्री कृष्ण सामने खड़े रहते हैं।

विंशः श्लोकः

भक्तिद्रोहकरा ये च ते सीदन्ति जगत्त्रये ।
दुर्वासा दुःखमापन्नः पुरा भक्तविनिन्दकः ॥२०॥

पदच्छेद—

भक्ति द्रोह कराः ये च, ते सीदन्ति जगत्त्रये ।
दुर्वासाः दुःखम् आपन्नः, पुरा भक्त विनिन्दकः ॥

शब्दार्थ—

भक्ति	३. भक्ति से		**जगत्त्रये ।**	७. तीनों लोकों में
द्रोह	४. विरोध		**दुर्वासाः**	१२. दुर्वासा ऋषि
कराः	५. करने वाले हैं		**दुःखम्**	१३. दुःख को
ये	२. जो (लोग)		**आपन्नः**	१४. प्राप्त हुये थे
च	१. तथा		**पुरा**	९. प्राचीन काल में
ते	६. वे		**भक्त**	१०. भक्तों की
सीदन्ति	८. कष्ट पाते हैं		**विनिन्दकः ॥**	११. निन्दा करने वाले

श्लोकार्थ—तथा जो लोग भक्ति से विरोध करने वाले हैं, वे तीनों लोकों में कष्ट पाते हैं। प्राचीन काल में भक्तों की निन्दा करने वाले दुर्वासा ऋषि दुःख को प्राप्त हुये थे।

एकविंशः श्लोकः

अलं व्रतैरलं तीर्थैरलं योगैरलं मखैः ।
अलं ज्ञानकथालापैर्भक्तिरेकैव मुक्तिदा ॥२१॥

पदच्छेद—

अलम् व्रतैः अलम् तीर्थैः, अलम् योगैः अलम् मखैः ।
अलम् ज्ञान कथा आलापैः, भक्तिः एका एव मुक्तिदा ॥

शब्दार्थ—

अलम्	२.	व्यर्थ है	**अलम्**	१२.	बेकार है
व्रतैः	१.	व्रतोपवास	**ज्ञान**	९.	ज्ञान की
अलम्	४.	निष्फल है	**कथा**	१०.	कथाओं को
तीर्थैः	३.	तीर्थाटन	**आलापैः**	११.	कहना
अलम्	६.	बेकार है	**भक्तिः**	१४.	भक्ति
योगैः	५.	योग-समाधि	**एका**	१३.	क्योंकि (केवल)
अलम्	८.	व्यर्थ हैं (तथा)	**एव**	१५.	ही
मखैः ।	७.	यज्ञानुष्ठान	**मुक्तिदा ॥**	१६.	मोक्ष देने वाली है

श्लोकार्थ—व्रतोपवास व्यर्थ है, तीर्थाटन निष्फल है, योग-समाधि बेकार है, यज्ञानुष्ठान व्यर्थ हैं तथा ज्ञान की कथाओं को कहना बेकार है, क्योंकि केवल भक्ति ही मोक्ष देने वाली है ।

द्वाविंशः श्लोकः

सूत उवाच

इति नारदनिर्णीतं स्वमाहात्म्यं निशम्य सा ।
सर्वाङ्गपुष्टिसंयुक्ता नारदं वाक्यमब्रवीत् ॥२२॥

पदच्छेद—

इति नारद निर्णीतम्, स्व माहात्म्यम् निशम्य सा ।
सर्वाङ्ग पुष्टि संयुक्ता, नारदम् वाक्यम् अब्रवीत् ॥

शब्दार्थ—

इति	१.	इस प्रकार	**सर्व**	८.	सभी
नारद	२.	देवर्षि नारद जी से	**अङ्ग**	९.	अङ्गों में
निर्णीतम्	३.	वर्णित	**पुष्टि**	१०.	पुष्टता को
स्व	४.	अपनी	**संयुक्ता**	११.	प्राप्त करती हुई
माहात्म्यम्	५.	महिमा को	**नारदम्**	१२.	देवर्षि नारद से
निशम्य	६.	सुनकर	**वाक्यम्**	१३.	यह (वचन)
सा ।	७	वह (भक्ति)	**अब्रवीत् ॥**	१४.	बोली

श्लोकार्थ—इस प्रकार देवर्षि नारद जी से वर्णित अपनी महिमा को सुनकर वह सुनकर वह भक्ति सभी अङ्गों में पुष्टता को प्राप्त करती हुई देवर्षि नारद से यह वचन बोली ।

त्रयोविंशः श्लोकः

भक्तिरुवाच

अहो नारद धन्योऽसि प्रीतिस्ते मयि निश्चला ।
न कदाचिद्विमुञ्चामि चित्ते स्थास्यामि सर्वदा ॥२३॥

पदच्छेद—

अहो नारद धन्यः असि, प्रीतिः ते मयि निश्चला ।
न कदाचित् विमुञ्चामि, चित्ते स्थास्यामि सर्वदा ॥

शब्दार्थ—

अहो	१.	अरे	निश्चला ।	७.	अटल
नारद	२	नारद जी ! (आप)	न	१०.	नहीं
धन्यः	३.	धन्य	कदाचित्	९.	कभी भी
असि	४.	हैं	विमुञ्चामि	११.	छोड़ूंगी
प्रीतिः	८.	प्रेम (है मैं आपको)	चित्ते	१३.	हृदय में
ते	६.	आपका	स्थास्यामि	१४.	स्थित रहूँगी
मयि	५	मुझ में	सर्वदा ॥	१२.	सदा (आपके)

श्लोकार्थ—अरे नारद जी ! आप धन्य हैं। मुझ में आपका अटल प्रेम है । मैं आपको कभी भी नहीं छोड़ूंगी । सदा आपके हृदय में स्थित रहूँगी ।

चतुर्विंशः श्लोकः

कृपालुना त्वया साधो मद्बाधा ध्वंसिता क्षणात् ।
पुत्रयोश्चेतना नास्ति ततो बोधय बोधय ॥२४॥

पदच्छेद—

कृपालुना त्वया साधो, मत् बाधा ध्वंसिता क्षणात् ।
पुत्रयोः चेतना न अस्ति, ततः बोधय बोधय ॥

शब्दार्थ—

कृपालुना	२.	दयालु	पुत्रयोः	८.	मेरे दोनों पुत्रों में (भी)
त्वया	३.	आपने	चेतना	९.	चेतना
साधो	१.	हे देवर्षि नारद जी !	न	१०.	नहीं
मत्	४.	मेरे	अस्ति	११.	है
बाधा	५.	कष्ट को	ततः	१२.	अतः (इन्हें)
ध्वंसिता	७.	नष्ट कर दिया है	बोधय	१३.	अवश्य
क्षणात् ।	६.	क्षण भर में	बोधय ॥	१४.	चेतना में लावें

श्लोकार्थ—हे देवर्षि नारद जी ! दयालु आपने मेरे कष्ट को क्षणभर में नष्ट कर दिया है । मेरे दोनों पुत्रों में भी चेतना नहीं है; अतः इन्हें अवश्य चेतना में लावें ।

पञ्चविंशः श्लोकः

सूत उवाच

तस्या वचः समाकर्ण्य कारुण्यं नारदो गतः ।
तयोर्बोधनमारेभे कराग्रेण विमर्दयन् ॥२५॥

पदच्छेद—

तस्याः वचः समाकर्ण्य, कारुण्यम् नारदः गतः ।
तयोः बोधनम् आरेभे, कर अग्रेण विमर्दयन् ॥

शब्दार्थ—

तस्याः	२. उस (भक्ति) की		तयोः	१०. उन्हें
वचः	३. वाणी		बोधनम्	११. जगाना
समाकर्ण्य	४. सुनकर		आरेभे	१२. प्रारम्भ किये
कारुण्यम्	५. करुणा से		कर	७. हाथ की
नारदः	१. देवर्षि नारद		अग्रेण	८. अंगुलियों से
गतः ।	६. भर गये (तथ)		विमर्दयन् ॥	९. सहलाते हुये

श्लोकार्थ—देवर्षि नारद उस भक्ति की वाणी सुनकर करुणा से भर गये तथा हाथ की अंगुलियों से सहलाते हुये उन्हें जगाना प्रारम्भ किये ।

षड्विंशः श्लोकः

मुखं संयोज्य कर्णान्ते शब्दमुच्चैः समुच्चरन् ।
ज्ञान प्रबुध्यतां शीघ्रं रे वैराग्य प्रबुध्यताम् ॥२६॥

पदच्छेद—

मुखम् संयोज्य कर्णान्ते, शब्दम् उच्चैः समुच्चरन् ।
ज्ञान प्रबुध्यताम् शीघ्रम्, रे वैराग्य प्रबुध्यताम् ॥

शब्दार्थ—

	०. देवर्षि नारद ने		समुच्चरन् ।	६. करते हुए (कहा)
मुखम्	२. मुख		ज्ञान	७. हे ज्ञान
संयोज्य	३. लगाकर		प्रबुध्यताम्	९. उठो
कर्णान्ते	१. कान के पास		शीघ्रम्	८. शीघ्र
शब्दम्	५. ध्वनि		रे वैराग्य	१०. हे वैराग्य !
उच्चैः	४. ऊँची		प्रबुध्यताम् ॥	११. उठो

श्लोकार्थ—देवर्षि नारद ने कान के पास मुख लगाकर ऊँची ध्वनि करते हुए कहा; हे ज्ञान ! शीघ्र उठो, हे वैराग्य ! उठो ।

सप्तविंशः श्लोकः

वेदवेदान्तघोषैश्च गीतापाठैर्मुहुर्मुहुः ।
बोध्यमानौ तदा तेन कथंचिन्नोत्थितौ बलात् ॥२७॥

पदच्छेद—

वेद वेदान्त घोषैः च, गीता पाठैः मुहुः मुहुः ।
बोध्यमानौ तदा तेन, कथंचित् च उत्थितौ बलात् ॥

शब्दार्थ—

वेद	२.	वेद (और)	बोध्यमानौ	९.	जगाने पर (वे)
वेदान्त	३.	शास्त्रों के	तदा	१०.	उस समय
घोषैः	४.	नाद	तेन	१.	देवर्षि नारद के द्वारा
च	५.	तथा	कथंचित्	११.	कठिनाई
गीता	७.	गीता के	च	१२.	और
पाठैः	८.	पाठ से	उत्थितौ	१४.	उठे
मुहुः मुहुः ।	६.	बार-बार	बलात् ॥	१३.	जबरदस्ती से

श्लोकार्थ—देवर्षि नारद के द्वारा वेद और शास्त्रों के नाद तथा बार-बार गीता के पाठ से जगाने पर वे उस समय कठिनाई और जबरदस्ती से उठे ।

अष्टाविंशः श्लोकः

नेत्रैरनवलोकन्तौ जृम्भन्तौ सालसावुभौ ।
बकवत्पलितौ प्रायः शुष्ककाष्ठसमाङ्गकौ ॥२८॥

पदच्छेद—

नेत्रैः अनवलोकन्तौ, जृम्भन्तौ स अलसौ उभौ ।
बकवत् पलितौ प्रायः, शुष्क काष्ठ सम अङ्गकौ ॥

शब्दार्थ—

नेत्रैः	५.	आँखों से	पलितौ	२.	उज्ज्वल केशों वाले (एवं)
अनवलोकन्तौ	६.	न देखते हुये (तथा)	प्रायः	८.	प्रायः
जृम्भन्तौ	७.	जम्भाई लेते हुये	शुष्क	९.	सूखे
स अलसौ	३.	आलस्य युक्त	काष्ठ	१०	काठ के
उभौ ।	४.	वे दोनों	सम	११.	समान
बकवत्	१.	बगुले के समान	अङ्गकौ ॥	१२.	अंगों से युक्त (थे)

श्लोकार्थ—बगुले के समान उज्ज्वल केशों वाले एवम् आलस्य युक्त वे दोनों आँखों से न देखते हुये तथा जम्भाई लेते हुये प्रायः सूखे काठ के समान अंगों से युक्त थे ।

एकोनत्रिंशः श्लोकः

क्षुत्क्षामौ तौ निरीक्ष्यैव पुनः स्वापपरायणौ ।
ऋषिश्चिन्तापरो जातः किं विधेयं मयेति च ॥२९॥

पदच्छेद—

क्षुध क्षामौ तौ निरीक्ष्य एव, पुनः स्वाप परायणौ ।
ऋषिः चिन्ता परः जातः, किम् विधेयम् मया इति च ॥

शब्दार्थ—

क्षुध	३.	भूख से	ऋषिः	१.	देवर्षि नारद
क्षामौ	४.	व्याकुल	चिन्ता	११.	चिन्ता से
तौ	२.	उन्हें	परः	१२.	ग्रस्त
निरीक्ष्य	९.	देखकर	जातः	१३.	हो गये
एव	१०.	ही	किम्	१६.	क्या
पुनः	६.	फिर से	विधेयम्	१७.	करना चाहिये
स्वाप	७.	नींद में	मया	१५.	मुझे
परायणौ ।	८.	तत्पर	इति	१४.	कि
			च ॥	५.	और

श्लोकार्थ—देवर्षि नारद उन्हें भूख से व्याकुल और फिर से नींद में तत्पर देखकर ही चिन्ता से ग्रस्त हो गये कि मुझे क्या करना चाहिये ।

त्रिंशः श्लोकः

अहो निद्रा कथं याति वृद्धत्वं च महत्तरम् ।
चिन्तयन्निति गोविन्दं स्मारयामास भार्गव ॥३०॥

पदच्छेद—

अहो निद्रा कथम् याति, वृद्धत्वम् च महत्तरम् ।
चिन्तयन् इति गोविन्दम्, स्मारयामास भार्गव ॥

शब्दार्थ—

अहो	२.	बड़े दुःख की बात है कि	महत्तरम् ।	५.	पुराना
निद्रा	३.	(इनकी) नींद	चिन्तयन्	१०.	सोचते हुये (देवर्षि नारद ने)
कथम्	७.	कैसे	इति	९.	यह
याति	८.	दूर होगा	गोविन्दम्	११.	भगवान् श्री कृष्ण का
वृद्धत्वम्	६.	बुढ़ापा	स्मारयामास	१२.	स्मरण किया
च	४.	और	भार्गव ॥	१.	हे शौनक जी !

श्लोकार्थ—हे शौनक जी ! बड़े दुःख की बात है कि इनकी नींद और पुराना बुढ़ापा कैसे दूर होगा, यह सोचते हुये देवर्षि नारद ने भगवान् श्रीकृष्ण का स्मरण किया ।

एकत्रिंशः श्लोकः

व्योमवाणी तदैवाभून्मा ऋषे खिद्यतामिति ।
उद्यमः सफलस्तेऽयं भविष्यति न संशयः ॥३१॥

पदच्छेद—

व्योमवाणी तदा एव अभूत्, मा ऋषे खिद्यताम् इति ।
उद्यमः सफलः ते अयम्, भविष्यति न संशयः ॥

शब्दार्थ—

व्योमवाणी	३. आकाशवाणी	इति ।	५. कि
तदा	१. उसी समय	उद्यमः	११. प्रयास
एव	२. यह	सफलः	१२. सफल
अभूत्	४. हुई	ते	९. आपका
मा	७. मत	अयम्	१०. यह
ऋषे	६. हे नारद जी ! (आप)	भविष्यति	१३. होगा (इसमें)
खिद्यताम्	८. खेद करें	न	१५. नहीं (है)
		संशयः ॥	१४. संदेह

श्लोकार्थ—उसी समय यह आकाशवाणी हुई कि हे नारद जी ! आप खेद मत करें । आपका यह प्रयास सफल होगा । इसमें संदेह नहीं है ।

द्वात्रिंशः श्लोकः

एतदर्थं तु सत्कर्म सुरर्षे त्वं समाचर ।
तत्ते कर्माभिधास्यन्ति साधवः साधुभूषणाः ॥३२॥

पदच्छेद—

एतदर्थम् तु सत् कर्म, सुरर्षे त्वम् समाचर ।
तत् ते कर्म अभिधास्यन्ति, साधवः साधु भूषणाः ॥

शब्दार्थ—

एतदर्थम्	१. इसके लिये	तत्	१२. वह
तु	२. तो	ते	११. आपको
सत्	५. उत्तम	कर्म	१३. कर्म
कर्म	६. कर्म का	अभिधास्यन्ति	१४. बतावेंगे
सुरर्षे	३. हे देवर्षि नारद !	साधवः	१०. साधुजन
त्वम्	४. आप	साधु	८. महात्माओं में
समाचर ।	७. अनुष्ठान करें	भूषणाः ॥	९. श्रेष्ठ

श्लोकार्थ—इसके लिये तो हे देवर्षि नारद ! आप उत्तम कर्म का अनुष्ठान करें । महात्माओं में श्रेष्ठ साधुजन आपको वह कर्म बतावेंगे ।

त्रयस्त्रिंशः श्लोकः

सत्कर्मणि कृते तस्मिन् सनिद्रा वृद्धतानयोः ।
गमिष्यति क्षणाद्भक्तिः सर्वतः प्रसरिष्यति ॥३३॥

पदच्छेद—

सत् कर्मणि कृते तस्मिन्, सनिद्रा वृद्धता अनयोः ।
गमिष्यति क्षणात् भक्तिः, सर्वतः प्रसरिष्यति ॥

शब्दार्थ—

सत्	२.	उत्तम	अनयोः ।	५	इन दोनों का
कर्मणि	३.	कर्म के	गमिष्यति	९.	दूर हो जावेगा (तथा)
कृते	४.	कर लेने पर	क्षणात्	८.	क्षण भर में
तस्मिन्	१.	उस	भक्तिः	११.	भक्ति
सनिद्रा	६.	नींद के साथ-साथ	सर्वतः	१०.	चारों ओर
वृद्धता	७.	बुढ़ापा	प्रसरिष्यति ॥	१२.	फैल जायेगी

श्लोकार्थ—उस उत्तम कर्म के कर लेने पर इन दोनों का नींद के साथ-साथ बुढ़ापा क्षण भर में दूर हो जायेगा तथा चारों भक्ति फैल जायेगी ।

चतुस्त्रिंशः श्लोकः

इत्याकाशवचः स्पष्टं तत्सर्वैरपि विश्रुतम् ।
नारदो विस्मयं लेभे नेदं ज्ञातमिति ब्रुवन् ॥३४॥

पदच्छेद—

इति आकाश वचः स्पष्टम्, तत् सर्वैः अपि विश्रुतम् ।
नारदः विस्मयम् लेभे, न इदम् ज्ञातम् इति ब्रुवन् ॥

शब्दार्थ—

इति	१.	इस प्रकार	नारदः	१४.	देवर्षि नारद
आकाश	५.	आकाश	विस्मयम्	१५.	आश्चर्य में
वचः	६.	वाणी को	लेभे	१६.	पड़ गये
स्पष्टम्	७.	साफ-साफ	न	१०.	नहीं
तत्	४.	उस	इदम्	९.	इसे
सर्वैः	२.	सभी (लोगों ने)	ज्ञातम्	११.	समझ सका
अपि	३.	ही	इति	१२.	ऐसा
विश्रुतम् ।	८.	सुना (तदनन्तर)	ब्रुवन् ॥	१३.	कहते हुये

श्लोकार्थ—इस प्रकार सभी लोगों ने ही उस आकाशवाणी को साफ-साफ सुना । तदनन्तर 'इसे नहीं समझ सका' ऐसा कहते हुये देवर्षि नारद आश्चर्य में पड़ गये ।

पञ्चत्रिंशः श्लोकः

नारद उवाच

अनयाऽऽकाशवाण्यापि गोप्यत्वेन निरूपितम् ।
किं वा तत्साधनं कार्यं येन कार्यं भवेत्तयोः ॥३५॥

पदच्छेद—

अनया आकाश वाण्या अपि, गोप्यत्वेन निरूपितम् ।
किम् वा तत् साधनम् कार्यम्, येन कार्यम् भवेत् तयोः ॥

शब्दार्थ—

अनया	१.	इस	वा	७.	अतः
आकाश	२.	आकाश	तत्	८.	वह
वाण्या	३.	वाणी ने	साधनम्	१०.	उपाय
अपि	४.	भी (उपाय को)	कार्यम्	११.	करना चाहिये
गोप्यत्वेन	५	गुप्त रूप में	येन	१२.	जिससे
निरूपितम् ।	६.	बतलाया है	कार्यम्	१४.	काम
किम्	९.	कौन सा	भवेत्	१५.	हो जाये
			तयोः ॥	१३.	उन दोनों का

श्लोकार्थ—इस आकाशवाणी ने भी उपाय को गुप्तरूप में बतलाया है। अतः वह कौन सा उपाय करना चाहिये; जिससे उन दोनों का काम हो जाये।

षट्त्रिंशः श्लोकः

क्व भविष्यन्ति सन्तस्ते कथं दास्यन्ति साधनम् ।
मयात्र किं प्रकर्तव्यं यदुक्तं व्योमभाषया ॥३६॥

पदच्छेद—

क्व भविष्यन्ति सन्तः ते, कथम् दास्यन्ति साधनम् ।
मया अत्र किम् प्रकर्तव्यम्, यत् उक्तम् व्योमभाषया ॥

शब्दार्थ—

क्व	३.	कहाँ	मया	११.	मुझे
भविष्यन्ति	४.	होंगे (और उस)	अत्र	१२.	इस (विषय में)
सन्तः	२.	सन्त जन	किम्	१३.	क्या
ते	१.	वे	प्रकर्तव्यम्	१४.	करना चाहिये
कथम्	६.	कैसे	यत्	८.	जैसा कि
दास्यन्ति	७.	देंगे	उक्तम्	१०.	कहा है
साधनम् ।	५.	उपाय को	व्योमभाषया ॥	९.	आकाशवाणी ने

श्लोकार्थ—वे सन्त जन कहाँ होंगे और उस उपाय को कैसे देंगे ? जैसा कि आकाशवाणी ने कहा है, मुझे इस विषय में क्या करना चाहिये ?

सप्तत्रिंशः श्लोकः

सूत उवाच तत्र द्वावपि संस्थाप्य निर्गतो नारदो मुनिः ।
तीर्थं तीर्थं विनिष्क्रम्य पृच्छन्मार्गे मुनीश्वरान् ॥३७॥

पदच्छेद— तत्र द्वौ अपि संस्थाप्य, निर्गतः नारदः मुनिः ।
तीर्थम् तीर्थम् विनिष्क्रम्य, पृच्छन् मार्गे मुनीश्वरान् ॥

शब्दार्थ—

तत्र	५.	वहाँ	तीर्थम्	८.	प्रत्येक
द्वौ	३.	(ज्ञान और वैराग्य) दोनों को	तीर्थम्	९.	तीर्थ में
अपि	४.	ही	विनिष्क्रम्य	१०.	जाकर
संस्थाप्य	६.	बैठाकर	पृच्छन्	१३.	पूछने लगे
निर्गतः	७.	निकल पड़े (तथा)	मार्गे	११.	रास्ते में
नारदः	२.	नारद	मुनीश्वरान् ॥	१२.	महर्षियों से
मुनिः ।	१.	देवर्षि			

श्लोकार्थ—देवर्षि नारद ज्ञान और वैराग्य दोनों को ही वहाँ बैठाकर निकल पड़े तथा प्रत्येक तीर्थ में जाकर रास्ते में महर्षियों से पूछने लगे ।

अष्टात्रिंशः श्लोकः

वृत्तान्तः श्रूयते सर्वैः किंचिन्निश्चित्य नोच्यते ।
असाध्यं केचन प्रोचुर्दुर्ज्ञेयमिति चापरे ।
मूकीभूतास्तथान्ये तु कियन्तस्तु पलायिताः ॥३८॥

पदच्छेद— वृत्तान्तः श्रूयते सर्वैः, किंचित् निश्चित्य न उच्यते ।
असाध्यम् केचन प्रोचुः, दुर्ज्ञेयम् इति च अपरे ।
मूकीभूताः तथा अन्ये तु, कियन्तः तु पलायिताः ॥

शब्दार्थ—

वृत्तान्तः, श्रूयते	२.	समाचार, सुन लेते थे (किन्तु)	दुर्ज्ञेयम्	१०.	ज्ञान से परे
सर्वैः	१.	सभी (लोग)	इति	११.	मानते थे
किंचित्	४.	कुछ भी	च, अपरे ।	९.	और, दूसरे (लोग)
निश्चित्य	३.	निश्चय करके	मूकीभूताः	१३.	मौन हो जाते थे
न, उच्यते ।	५.	नहीं बताते थे	तथा, अन्ये	१२.	तथा, बचे (हुये लोग)
असाध्यम्	७.	असम्भव	तु, कियन्तः	१४.	और, कितने
केचन	६.	कुछ (लोग)	तु, पलायिताः॥	१५.	तो, मुँह फेर लेते थे
प्रोचुः	८.	कहते थे			

श्लोकार्थ—सभी लोग समाचार सुन लेते थे, किन्तु निश्चय करके कुछ भी नहीं बताते थे । कुछ लोग असम्भव कहते थे और दूसरे लोग ज्ञान से परे मानते थे तथा बचे हुये लोग मौन हो जाते थे और कितने तो मुँह फेर लेते थे ।

एकोनचत्वारिंशः श्लोकः

हाहाकारो महानासीत्त्रैलोक्ये विस्मयावहः ।
वेदवेदान्तघोषैश्च गीतापाठैर्विबोधितम् ॥३९॥

पदच्छेद—

हाहाकारः महान् आसीत्, त्रैलोक्ये विस्मय आवहः ।
वेद वेदान्त घोषैः च, गीता पाठैः विबोधितम् ॥

शब्दार्थ—

हाहाकारः	५.	हाहाकार	वेद	७.	वेद और
महान्	४.	बड़ा	वेदान्त	८.	शास्त्र के
आसीत्	६.	मच गया (कि)	घोषैः	९.	गायनों
त्रैलोक्ये	१.	तीनों लोकों में	च	१०	एवं
विस्मय	२.	आश्चर्य	गीता	११.	गीता के
आवहः ।	३.	जनक	पाठैः	१२	पाठों से (ज्ञान और वैराग्य को)
			विबोधितम्॥	१३.	जगाया गया

श्लोकार्थ—तीनों लोकों में आश्चर्य जनक बड़ा हाहाकार मच गया कि वेद और शास्त्र के गायनों एवं गीता पाठों से ज्ञान और वैराग्य को जगाया गया ।

चत्वारिंशः श्लोकः

भक्तिज्ञानविरागाणां नोदतिष्ठत्त्रिकं यदा ।
उपायो नापरोऽस्तीति कर्णे कर्णेऽजपञ्जनाः ॥४०॥

पदच्छेद—

भक्ति ज्ञान विरागाणाम्, न उदतिष्ठत् त्रिकम् यदा ।
उपायः न अपरः अस्ति इति, कर्णे कर्णे अजपन् जनाः ॥

शब्दार्थ—

भक्ति	२.	भक्ति	उपायः	९.	साधन
ज्ञान	३.	ज्ञान और	न	१०.	नहीं
विरागाणाम्	४-	वैराग्य का	अपरः	८.	दूसरा
न	६.	नहीं	अस्ति	११.	है
उदतिष्ठत्	७.	उठा (तो अब)	इति	१३.	इस प्रकार
त्रिकम्	५.	समूह	कर्णे कर्णे	१४.	परस्पर एक दूसरे से
यदा ।	१.	जब (उससे)	अजपन्	१५.	कहने लगे
			जनाः ॥	१२.	लोग

श्लोकार्थ—जब उससे भक्ति, ज्ञान और वैराग्य का समूह नहीं उठा तो अब दूसरा साधन नहीं है, लोग इस प्रकार परस्पर एक दूसरे से कहने लगे ।

एकचत्वारिंशः श्लोकः

योगिना नारदेनापि स्वयं न ज्ञायते तु यत् ।
तत्कथं शक्यते वक्तुमितरैरिह मानुषैः ॥४१॥

पदच्छेद—

योगिना नारदेन अपि, स्वयम् न ज्ञायते तु यत् ।
तत् कथम् शक्यते वक्तुम्, इतरैः इह मानुषैः ॥

शब्दार्थ—

योगिना	२. देवर्षि	तत्	१२. उसे
नारदेन	३. नारद	कथम्	१३. कैसे
अपि	४. भी	शक्यते	१५. 'सकते हैं
स्वयम्	१. स्वयम्	वक्तुम्	१४. बता
न	६. नहीं	इतरैः	१०. दूसरे
ज्ञायते	७. जान सकते	इह	९. यहाँ
तु	८. तो फिर	मानुषैः ॥	११. लोग
यत् ।	५. जिसे		

श्लोकार्थ—स्वयम् देवर्षि नारद भी जिसे नहीं जान सकते तो फिर यहाँ दूसरे लोग उसे कैसे बता सकते हैं ?

द्विचत्वारिंशः श्लोकः

एवमृषिगणैः पृष्टैर्निर्णीयोक्तं दुरासदम् ॥४२॥

पदच्छेद—

एवम् ऋषिगणैः पृष्टैः निर्णीय उक्तम् दुरासदम् ॥

शब्दार्थ—

एवम्	१. इस प्रकार	निर्णीय	४. निश्चय करके (उस साधन) को
ऋषिगणैः	३. मुनि जनों ने	उक्तम्	६. बतलाया
पृष्टैः	२. पूछे जाने पर	दुरासदम् ॥	५. दुर्लभ

श्लोकार्थ—इस प्रकार पूछे जाने पर मुनिजनों ने निश्चय करके उस साधन को दुर्लभ बतलाया ।

त्रिचत्वारिंशः श्लोकः

ततश्चिन्तातुरः सोऽथ बदरीवनमागतः ।
तपश्चरामि चात्रेति तदर्थं कृतनिश्चयः ॥४३॥

पदच्छेद—

ततः चिन्ता आतुरः सः अथ, बदरीवनम् आगतः ।
तपः चरामि च अत्र इति, तदर्थम् कृत निश्चयः ॥

शब्दार्थ—

ततः	१.	अतः	तपः	११.	तपस्या
चिन्ता	२.	शोक से	चरामि	१२.	करूँगा
आतुरः	३.	व्याकुल	च	८.	और
सः	४.	वे (देवर्षि नारद)	अत्र	६.	यहाँ
अथ	५.	तदनन्तर	इति	१३.	ऐसा
बदरीवनम्	६.	बदरिकारण्य में	तदर्थम्	१०.	उस,(आकाशवाणी के रहस्य ज्ञान) के लिये
आगतः ।	७.	आ गये	कृत	१५.	किया
			निश्चयः	१४.	संकल्प

श्लोकार्थ—अतः शोक से व्याकुल वे देवर्षि नारद तदनन्तर बदरिकारण्य में आ गये और यहाँ "उस आकाशवाणी के रहस्य ज्ञान के लिये तपस्या करूँगा" ऐसा संकल्प किया ।

चतुश्चत्वारिंशः श्लोकः

तावद्ददर्श पुरतः सनकादीन्मुनीश्वरान् ।
कोटिसूर्यसमाभासानुवाच मुनिसत्तमः ॥४४॥

पदच्छेद—

तावत् ददर्श पुरतः, सनक आदीन् मुनीश्वरान् ।
कोटि सूर्य सम आभासान्, उवाच मुनि सत्तमः ॥

शब्दार्थ—

तावत्	१.	उसी समय	कोटि	४.	करोड़ों
ददर्श	१२.	देखा (तथा उनसे)	सूर्य	५.	सूर्य के
पुरतः	११.	(अपने) सामने	सम	६.	समान
सनक	८.	सनक	आभासान्	७.	तेजस्वी
आदीन्	६.	सनंदन, सनातन और सनत्कुमार	उवाच	१३.	कहा
मुनीश्वरान् ।	१०.	मुनि कुमारों को	मुनि	२.	मुनि
			सत्तमः ॥	३.	श्रेष्ठ (नारद ने)

श्लोकार्थ—उसी समय मुनि श्रेष्ठ नारद ने करोड़ों सूर्य के समान तेजस्वी सनक, सनन्दन सनातन और सनत् कुमार मुनि कुमारों को अपने सामने देखा तथा उनसे कहा ।

पञ्चचत्वारिंशः श्लोकः

नारद उवाच

इदानीं भूरिभाग्येन भवद्भिः संगमोऽभवत्।
कुमारा ब्रुवतां शीघ्रं कृपां कृत्वा ममोपरि ॥४५॥

पदच्छेद—

इदानीम् भूरि भाग्येन, भवद्भिः संगमः अभवत्।
कुमाराः ब्रुवताम् शीघ्रम्, कृपाम् कृत्वा मम उपरि ॥

शब्दार्थ—

इदानीम्	२.	इस समय	कुमाराः	१.	हे कुमारों !
भूरि	३.	बड़े	ब्रुवताम्	१३.	बतावें
भाग्येन	४.	भाग्य से	शीघ्रम्	१२.	शीघ्र
भवद्भिः	५.	आप लोगों के साथ	कृपाम्	१०.	कृपा
संगमः	६.	भेंट	कृत्वा	११.	करके
अभवत्।	७.	हुई है (अतः)	मम	८.	मेरे
			उपरि ॥	९.	ऊपर

श्लोकार्थ—हे कुमारों ! इस समय बड़े भाग्य से आप लोगों के साथ भेंट हुई है; अतः मेरे ऊपर कृपा करके शीघ्र बतावें।

षट्चत्वारिंशः श्लोकः

भवन्तो योगिनः सर्वे बुद्धिमन्तो बहुश्रुताः।
पञ्चहायनसंयुक्ताः पूर्वेषामपि पूर्वजाः ॥४६॥

पदच्छेद—

भवन्तः योगिनः सर्वे, बुद्धिमन्तः बहुश्रुताः।
पञ्च हायन संयुक्ताः, पूर्वेषाम् अपि पूर्वजाः ॥

शब्दार्थ—

भवन्तः	१.	आप	पञ्च	६.	पाँच
योगिनः	३.	योगी	हायन	७.	वर्ष की
सर्वे	२.	सभी	संयुक्ताः	८.	अवस्था वाले (एवं)
बुद्धिमन्तः	४.	चतुर	पूर्वेषाम्	९.	पूर्वजों के
बहुश्रुताः।	५.	ज्ञानी	अपि	१०.	भी
			पूर्वजाः ॥	११.	पूर्वज (हैं)

श्लोकार्थ—आप सभी योगी, चतुर, ज्ञानी, पाँच वर्ष की अवस्था वाले एवम् पूर्वजों के भी पूर्वज हैं।

सप्तचत्वारिंशः श्लोकः

सदा वैकुण्ठनिलया हरिकीर्तनतत्पराः ।
लीलामृतरसोन्मत्ताः कथामात्रैकजीविनः ॥४७॥

पदच्छेद—

सदा वैकुण्ठ निलयाः, हरि कीर्तन तत्पराः ।
लीला अमृत रस उन्मत्ताः, कथा मात्र एक जीविनः ॥

शब्दार्थ—

	०. (आप लोग)	लीला	७. (भगवान् के) लीलारूपी
सदा	१. सर्वदा	अमृत	८. सुधा
वैकुण्ठ	२. वैकुण्ठधाम में	रस	९. रस से
निलयाः	३. निवास करने वाले	उन्मत्ताः	१०. मतवाले (तथा)
हरि	४. श्रीहरि के	कथा	१२. भगवत् चर्चा में
कीर्तन	५. भजन में	मात्र	११. केवल
तत्पराः ।	६. मग्न रहने वाले	एक	१३. ही
		जीविनः ॥	१४. जीने वाले हैं

श्लोकार्थ—आपलोग सर्वदा वैकुण्ठधाम में निवास करने वाले, श्रीहरि के भजन में मग्न रहने वाले, भगवान् के लीलारूपी सुधारस से मतवाले तथा केवल भगवत् चर्चा में ही जीने वाले हैं।

अष्टचत्वारिंशः श्लोकः

हरिः शरणमेवं हि नित्यं येषां मुखे वचः ।
अतः कालसमादिष्टा जरा युष्मान्न बाधते ॥४८॥

पदच्छेद—

हरिः शरणम् एवम् हि, नित्यम् येषाम् मुखे वचः ।
अतः काल समादिष्टा, जरा युष्मान् न बाधते ॥

शब्दार्थ—

हरिः	५. हरिः	अतः	९. अतः
शरणम्	६. शरणम्	काल	१०. महाकाल से
एवम्	७. यही	समादिष्टा	११. प्रेरित (होकर भी)
हि	१. क्योंकि	जरा	१२. बुढ़ापा
नित्यम्	४. सदा	युष्मान्	१३. आप लोगों के पास
येषाम्	२. आप लोगों के	न	१४. नहीं
मुखे	३. श्रीमुख में	बाधते ॥	१५. फटकता है
वचः ।	८. मन्त्र (रहता है)		

श्लोकार्थ—क्योंकि आप लोगों के श्रीमुख में सदा 'हरिः शरणम्' यही मन्त्र रहता है। अतः महाकाल से प्रेरित होकर भी बुढ़ापा आप लोगों के पास नहीं फटकता है।

एकोनपञ्चाशः श्लोकः

येषां भ्रूभङ्गमात्रेण द्वारपालौ हरेः पुरा।
भूमौ निपातितौ सद्यो यत्कृपातः पुरं गतौ ॥४६॥

पदच्छेद—

येषाम् भ्रू भङ्ग मात्रेण, द्वारपालौ हरेः पुरा।
भूमौ निपातितौ सद्यः, यत् कृपातः पुरम् गतौ ॥

शब्दार्थ—

येषाम्	२.	जिनकी	भूमौ	६.	मृत्युलोक में
भ्रू	३.	भौंहों के	निपातितौ	१०.	गिरना पड़ा (तथा)
भङ्ग	४.	तन जाने	सद्यः	८.	तत्काल
मात्रेण	५.	मात्र से	यत्	११.	जिनकी
द्वारपालौ	७.	द्वारपाल (जय और विजय) को	कृपातः	१२.	कृपा से (ही पुनः वे)
हरेः	६.	भगवान् श्री हरि के	पुरम्	१३.	वैकुण्ठपुरी में
पुरा।	१.	पूर्वकाल में	गतौ ॥	१४.	पहुँच सके

श्लोकार्थ—पूर्वकाल में जिनकी भौंहों के तन जाने मात्र से भगवान् श्रीहरि के द्वारपाल जय और विजय को तत्काल मृत्युलोक में गिरना पड़ा तथा जिनकी कृपा से ही पुनः वे वैकुण्ठपुरी में पहुँच सके।

पञ्चाशः श्लोकः

अहो भाग्यस्य योगेन दर्शनं भवतामिह।
अनुग्रहस्तु कर्तव्यो मयि दीने दयापरैः ॥५०॥

पदच्छेद—

अहो भाग्यस्य योगेन, दर्शनम् भवताम् इह।
अनुग्रहः तु कर्तव्यः, मयि दीने दयापरैः ॥

शब्दार्थ—

अहो	१.	बड़े हर्ष की बात है कि	अनुग्रहः	११.	कृपा
भाग्यस्य	३.	सौभाग्य के	तु	७.	अतः
योगेन	४.	कारण	कर्तव्यः	१२.	करें
दर्शनम्	६.	दर्शन (हुआ है)	मयि	६.	मुझ
भवताम्	५.	आप लोगों का	दीने	१०.	दीन पर
इह।	२.	यहाँ	दयापरैः ॥	८.	करुणा परायण (आप लोग)

श्लोकार्थ—बड़े हर्ष की बात है कि यहाँ सौभाग्य के कारण आप लोगों का दर्शन हुआ है; अतः करुणा परायण आप लोग मुझ दीन पर कृपा करें।

एकपञ्चाशः श्लोकः

अशरीरगिरोक्तं यत्तत्किं साधनमुच्यताम् ।
अनुष्ठेयं कथं तावत्प्रब्रुवन्तु सविस्तरम् ॥५१॥

पदच्छेद—

अशरीरगिरा उक्तम् यत्, तत् किम् साधनम् उच्यताम् ।
अनुष्ठेयम् कथम् तावत्, प्रब्रुवन्तु सविस्तरम् ॥

शब्दार्थ—

अशरीरगिरा	१.	आकाशवाणी के द्वारा	उच्यताम् ।	४.	बतावें (कि)
उक्तम्	३.	कहा गया है	अनुष्ठेयम्	१२.	अनुष्ठान करें
यत्	२.	जो	कथम्	११.	कैसे
तत्	५.	वह	तावत्	८.	तथा
किम्	६.	कौन-सा	प्रब्रुवन्तु	१०.	बतावें (कि उसका)
साधनम्	७.	उपाय (है)	सविस्तरम् ॥	९.	विस्तार-पूर्वक

श्लोकार्थ—आकाशवाणी के द्वारा जो कहा गया है, बतावें कि वह कौन सा उपाय है तथा विस्तारपूर्वक बतावें कि उसका कैसे अनुष्ठान करें ?

द्विपञ्चाशः श्लोकः

भक्तिज्ञानविरागाणां सुखमुत्पद्यते कथम् ।
स्थापनं सर्ववर्णेषु प्रेमपूर्वं प्रयत्नतः ॥५२॥

पदच्छेद—

भक्ति ज्ञान विरागाणाम्, सुखम् उत्पद्यते कथम् ।
स्थापनम् सर्व वर्णेषु, प्रेम पूर्वम् प्रयत्नतः ॥

शब्दार्थ—

भक्ति ज्ञान	१.	भक्ति, ज्ञान और	स्थापनम्	१०.	प्रतिष्ठा (होगी)
विरागाणाम्	२.	वैराग्य को	सर्व	७.	सभी
सुखम्	४.	सुख	वर्णेषु	८.	जातियों में (इनकी)
उत्पद्यते	५.	मिलेगा (तथा किस)	प्रेमपूर्वम्	९.	प्रेम के साथ
कथम् ।	३.	कैसे	प्रयत्नतः ॥	६.	प्रयास से

श्लोकार्थ—भक्ति, ज्ञान और वैराग्य को कैसे सुख मिलेगा ? तथा किस प्रयास से सभी जातियों में इनकी प्रेम के साथ प्रतिष्ठा होगी ?

त्रिपञ्चाशः श्लोकः

कुमारा ऊचुः

मा चिन्तां कुरु देवर्षे हर्षं चित्ते समावह ।
उपायः सुखसाध्योऽत्र वर्तते पूर्व एव हि ॥५३॥

पदच्छेद—

मा चिन्ताम् कुरु देवर्षे, हर्षम् चित्ते समावह ।
उपायः सुख साध्यः अत्र, वर्तते पूर्वः एव हि ॥

शब्दार्थ—

मा	३.	मत	उपायः	१२.	साधन
चिन्ताम्	२.	चिन्ता	सुख	१०.	सरलता से
कुरु	४.	करें (तथा)	साध्यः	११.	करने योग्य
देवर्षे	१.	हे देवर्षि नारद !	अत्र	९.	इस विषय में
हर्षम्	६.	प्रसन्नता	वर्तते	१४.	विद्यमान है
चित्ते	५.	मन में	पूर्वः एव	१३.	पहिले से ही
समावह ।	७.	रखें	हि ॥	८.	क्योंकि

श्लोकार्थ—हे देवर्षि नारद ! चिन्ता मत करें तथा मन में प्रसन्नता रखें । क्योंकि इस विषय में सरलता से करने योग्य साधन पहिले से ही विद्यमान है ।

चतुःपञ्चाशः श्लोकः

अहो नारद धन्योऽसि विरक्तानां शिरोमणिः ।
सदा श्रीकृष्णदासानामग्रणीर्योगभास्करः ॥५४॥

पदच्छेद—

अहो नारद धन्यः असि, विरक्तानाम् शिरोमणिः ।
सदा श्रीकृष्ण दासानाम्, अग्रणीः योग भास्करः ॥

शब्दार्थ—

अहो	१.	अरे	शिरोमणिः ।	५.	प्रधान
नारद	२.	देवर्षि नारद ! (आप)	सदा	७.	सर्वदा
धन्यः	३.	सौभाग्यशाली	श्रीकृष्णदासानाम्	६.	श्रीकृष्ण के भक्तों में
असि	१०.	हैं	अग्रणीः	८.	अगुआ (और)
विरक्तानाम्	४.	वैरागियों में	योगभास्करः ॥	९.	योग विद्या में सूर्य

श्लोकार्थ—अरे देवर्षि नारद ! आप सौभाग्यशाली, वैरागियों में प्रधान, श्रीकृष्ण के भक्तों में सर्वदा अगुआ और योग विद्या में सूर्य हैं ।

पञ्चपञ्चाशः श्लोकः

त्वयि चित्रं न मन्तव्यं भक्त्यर्थमनुवर्तिनि ।
घटते कृष्णदासस्य भक्तेः संस्थापना सदा ॥५५॥

पदच्छेद—

त्वयि चित्रम् न मन्तव्यम्, भक्ति अर्थम् अनुवर्तिनि ।
घटते कृष्णदासस्य, भक्तेः संस्थापना सदा ॥

शब्दार्थ—

त्वयि	४. आपके विषय में		अनुवर्तिनि ।	३. भ्रमण करने वाले
चित्रम्	५. (यह) आश्चर्य		घटते	१२. उचित है
न	६. नहीं		कृष्णदासस्य	८. श्रीकृष्णभक्तों के लिए
मन्तव्यम्	७. मानना चाहिए (क्योंकि)		भक्तेः	१०. भक्ति का
भक्ति	१. भक्ति के		संस्थापना	११. प्रचार प्रसार करना
अर्थम्	२. निमित्त		सदा ॥	९. सर्वदा

श्लोकार्थ—भक्ति के निमित्त भ्रमण करने वाले आपके विषय में यह आश्चर्य नहीं मानना चाहिए। क्योंकि श्रीकृष्ण-भक्तों के लिए सर्वदा भक्ति का प्रचार-प्रसार करना उचित है।

षट्पञ्चाशः श्लोकः

ऋषिभिर्बहवो लोके पन्थानः प्रकटीकृताः ।
श्रमसाध्याश्च ते सर्वे प्रायः स्वर्गफलप्रदाः ॥५६॥

पदच्छेद—

ऋषिभिः बहवः लोके, पन्थानः प्रकटीकृताः ॥
श्रम साध्याः च ते सर्वे, प्रायः स्वर्ग फल प्रदाः ॥

शब्दार्थ—

ऋषिभिः	१. ऋषियों ने	च	९. और
बहवः	३. अनेक	ते	६. वे
लोके	२. संसार में	सर्वे	७. सभी
पन्थानः	४. मार्ग	प्रायः	१०. अधिकतर
प्रकटीकृताः ।	५. दिखाये हैं (किन्तु)	स्वर्ग	११. स्वर्ग
श्रमसाध्याः	८. कठिनाई से करने योग्य	फलप्रदाः ॥	१२. फल को देने वाले (हैं)

श्लोकार्थ—ऋषियों ने संसार में अनेक मार्ग दिखाये हैं; किन्तु वे सभी कठिनाई से करने योग्य और अधिकतर स्वर्ग-फल को देने वाले हैं।

सप्तपञ्चाशः श्लोकः

वैकुण्ठसाधकः पन्था स तु गोप्यो हि वर्तते ।
तस्योपदेष्टा पुरुषः प्रायो भाग्येन लभ्यते ॥५७॥

पदच्छेद—

वैकुण्ठ साधकः पन्था, सः तु गोप्यः हि वर्तते ।
तस्य उपदेष्टा पुरुषः, प्रायः भाग्येन लभ्यते ॥

शब्दार्थ—

वैकुण्ठ	१.	वैकुण्ठ लोक को	वर्तते ।	८.	हैं
साधकः	२.	प्राप्त कराने वाला	तस्य	९.	उसके
पन्था	४.	मार्ग	उपदेष्टा	१०.	उपदेशक
सः	३.	वह	पुरुषः	११.	पुरुष
तु	५.	तो	प्रायः	१२.	अधिकतर
गोप्यः	६.	गोपनीय	भाग्येन	१३.	भाग्य से ही
हि	७.	ही	लभ्यते ॥	१४.	मिलते हैं

श्लोकार्थ—वैकुण्ठ लोक को प्राप्त कराने वाला वह मार्ग तो गोपनीय ही है। उसके उपदेशक पुरुष अधिकतर भाग्य से ही मिलते हैं।

अष्टपञ्चाशः श्लोकः

सत्कर्म तव निर्दिष्टं व्योमवाचा तु यत्पुरा ।
तदुच्यते शृणुष्वाद्य स्थिरचित्तः प्रसन्नधीः ॥५८॥

पदच्छेद—

सत् कर्म तव निर्दिष्टम्, व्योमवाचा तु यत् पुरा ।
तद् उच्यते शृणुष्व अद्य, स्थिर चित्तः प्रसन्न धीः ॥

शब्दार्थ—

सत् कर्म	४.	उत्तम कर्म का	पुरा ।	५.	पहिले
तव	२.	आपको	तद् उच्यते	८.	उसे बता रहा हूँ (आप)
निर्दिष्टम्	६.	संकेत किया था	शृणुष्व	१२.	सुनें
व्योमवाचा	१.	आकाशवाणी ने	अद्य	७.	सबसे पहिले
तु	१०.	और	स्थिरचित्तः	९.	शान्त मन
यत्	३.	जिस	प्रसन्न धीः ॥	११.	निर्मल बुद्धि से (उसे)

श्लोकार्थ—आकाशवाणी ने आपको जिस उत्तम कर्म का पहिले संकेत किया था; सबसे पहिले उसे बता रहा हूँ। आप शान्त-मन और निर्मल-बुद्धि से उसे सुनें।

एकोनषष्टितमः श्लोकः

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ।
स्वाध्यायज्ञानयज्ञाश्च ते तु कर्मविसूचकाः ॥५९॥

पदच्छेद—

द्रव्ययज्ञाः तपोयज्ञाः, योगयज्ञाः तथा अपरे ।
स्वाध्याय ज्ञान यज्ञाः च, ते तु कर्म विसूचकाः ॥

शब्दार्थ—

द्रव्ययज्ञाः	१.	(हे देवर्षि नारद) हवन-यज्ञ	ज्ञानयज्ञाः	८.	ज्ञान-यज्ञ (हैं)
तपोयज्ञाः	२.	तपस्या का अनुष्ठान	च	७.	और
योगयज्ञाः	३.	योगासन	ते	९.	वे
तथा	४.	तथा	तु	१०.	सभी
अपरे ।	५.	दूसरे (जो)	कर्म	११.	कर्मों के
स्वाध्याय	६.	वेदपाठ	विसूचकाः ॥	१२.	विभिन्न प्रकार (हैं)

श्लोकार्थ—हे देवर्षि नारद ! हवन-यज्ञ, तपस्या का अनुष्ठान, योगासन तथा दूसरे जो वेदपाठ और ज्ञान-यज्ञ हैं; वे सभी कर्मों के विभिन्न प्रकार हैं ।

षष्टितमः श्लोकः

सत्कर्मसूचको नूनं ज्ञानयज्ञः स्मृतो बुधैः ।
श्रीमद्भागवतालापः स तु गीतः शुकादिभिः ॥६०॥

पदच्छेद—

सत् कर्म सूचकः नूनम्, ज्ञान यज्ञः स्मृतः बुधैः ।
श्रीमद्भागवत आलापः, सः तु गीतः शुक आदिभिः ॥

शब्दार्थ—

सत्कर्म	४.	श्रेष्ठ कर्म का	श्रीमद्भागवत	७.	श्रीमद्भागवत की (जो)
सूचकः	५.	एक प्रकार	आलापः	८.	कथा (है)
नूनम्	३.	निश्चय ही	सः	९.	उसे
ज्ञानयज्ञः	२.	कथा-अनुष्ठान को	तु	११.	भी
स्मृतः	६.	कहा है (तथा)	गीतः	१२.	गायी है
बुधैः ।	१.	विद्वानों ने	शुक आदिभिः ॥	१०.	श्रीशुकदेव इत्यादि ऋषियों ने

श्लोकार्थ—विद्वानों ने कथा-अनुष्ठान को निश्चय ही श्रेष्ठ-कर्म का एक प्रकार कहा है तथा श्रीमद्भागवत की जो कथा है; उसे श्रीशुकदेव इत्यादि ऋषियों ने भी गायी है ।

एकषष्टितमः श्लोकः

भक्तिज्ञानविरागाणां तद्घोषेण बलं महत् ।
व्रजिष्यति द्वयोः कष्टं सुखं भक्तेर्भविष्यति ॥६१॥

पदच्छेद—

भक्ति ज्ञान विरागाणाम्, तद् घोषेण बलम् महत् ।
व्रजिष्यति द्वयोः कष्टम्, सुखम् भक्तेः भविष्यति ॥

शब्दार्थ—

भक्ति ज्ञान	३. भक्ति, ज्ञान और	**व्रजिष्यति**	९.	दूर हो जायगा (तथा)
विरागाणाम्	४. वैराग्य को	**द्वयोः**	७.	(ज्ञान और वैराग्य) दोनों का
तद्	१. उस (श्रीमद्भागवत) के	**कष्टम्**	८.	दुःख
घोषेण	२. पाठ से	**सुखम्**	११.	सुख
बलम्	६. बल (मिलेगा)	**भक्तेः**	१०.	भक्ति को
महत् ।	५. महान्	**भविष्यति ॥**	१२.	होगा

श्लोकार्थ—उस श्रीमद्भागवत के पाठ से भक्ति, ज्ञान और वैराग्य को महान् बल मिलेगा । ज्ञान और वैराग्य दोनों का दुःख दूर हो जायगा तथा भक्ति को सुख होगा ।

द्विषष्टितमः श्लोकः

प्रलयं हि गमिष्यन्ति श्रीमद्भागवतध्वनेः ।
कलेर्दोषा इमे सर्वे सिंहशब्दाद् वृका इव ॥६२॥

पदच्छेद—

प्रलयम् हि गमिष्यन्ति, श्रीमद्भागवत ध्वनेः ।
कलेः दोषाः इमे सर्वे, सिंह शब्दात् वृकाः इव ॥

शब्दार्थ—

प्रलयम्	११. विनाश को	**दोषाः**	६.	दोष
हि	१०. अवश्य	**इमे**	४.	ये
गमिष्यन्ति	१२. प्राप्त हो जायेंगे	**सर्वे**	५.	सभी
श्रीमद्भागवत	१. श्रीमद्भागवत महापुराण के	**सिंहशब्दात्**	७.	शेर की दहाड़ से
ध्वनेः ।	२. पाठ से	**वृकाः**	८.	भेड़िये के
कलेः	३. कलियुग के	**इव ॥**	९.	समान

श्लोकार्थ—श्रीमद्भागवत महापुराण के पाठ से कलियुग के सभी दोष शेर की दहाड़ से भेड़िये के समान अवश्य विनाश को प्राप्त हो जायेंगे ।

त्रिषष्टितमः श्लोकः

ज्ञानवैराग्यसंयुक्ता भक्तिः प्रेमरसावहा ।
प्रतिगेहं प्रतिजनं ततः क्रीडां करिष्यति ॥६३॥

पदच्छेद—

ज्ञान वैराग्य संयुक्ता, भक्तिः प्रेम रस आवहा ।
प्रतिगेहम् प्रतिजनम्, ततः क्रीडाम् करिष्यति ॥

शब्दार्थ—

ज्ञान वैराग्य	२.	ज्ञान और वैराग्य से	प्रतिगेहम्	७.	घर-घर और
संयुक्ता	३.	मिली हुई (तथा)	प्रतिजनम्	८.	जन-जन में
भक्तिः	६.	भक्ति	ततः	१.	तदनन्तर
प्रेम रस	४.	प्रेमरस में	क्रीडाम्	९.	विहार
आवहा ।	५.	पगी हुई	करिष्यति ॥	१०.	करेगी

श्लोकार्थ—तदनन्तर ज्ञान और वैराग्य से मिली हुई तथा प्रेमरस में पगी हुई भक्ति घर-घर और जन-जन में विहार करेगी ।

चतुष्षष्टितमः श्लोकः

नारद उवाच

वेदवेदान्तघोषैश्च गीतापाठैः प्रबोधितम् ।
भक्तिज्ञानविरागाणां नोदतिष्ठत्त्रिकं यदा ॥६४॥

पदच्छेद—

वेद वेदान्त घोषैः च, गीता पाठैः प्रबोधितम् ।
भक्ति ज्ञान विरागाणाम्, न उदतिष्ठत् त्रिकम् यदा ॥

शब्दार्थ—

वेद वेदान्त	१.	वेद और उपनिषदों के	भक्ति ज्ञान	६.	भक्ति, ज्ञान और
घोषैः	२.	पारायण	विरागाणाम्	७.	वैराग्य को
च	३.	तथा	न	११.	नहीं
गीता	४.	श्रीमद्भगवद् गीता के	उदतिष्ठत्	१२.	उठे
पाठैः	५.	पाठों से	त्रिकम्	१०.	तीनों
प्रबोधितम् ।	८.	जगाया गया	यदा ॥	९.	(किन्तु) जब

श्लोकार्थ—वेद और उपनिषदों के पारायण तथा श्रीमद्भगवद् गीता के पाठों से भक्ति, ज्ञान और वैराग्य को जगाया गया; किन्तु जब तीनों नहीं उठे ।

पञ्चषष्टितमः श्लोकः

श्रीमद्भागवतालापात्तत्कथं बोधमेष्यति ।
तत्कथासु तु वेदार्थः श्लोके श्लोके पदे पदे ॥६५॥

पदच्छेद—

श्रीमद्भागवत आलापात्, तत् कथम् बोधम् एष्यति ।
तत् कथासु तु वेदार्थः, श्लोके श्लोके पदे पदे ॥

शब्दार्थ—

श्रीमद्भागवत	२.	श्रीमद्भागवत की	**तत्**	७.	उसकी
आलापात्	३.	कथा से	**कथासु**	८.	कथाओं में
तत्	१.	तो फिर (वे)	**तु**	९.	तो
कथम्	४.	कैसे	**वेदार्थः**	१२.	वेदों का अर्थ (भरा है)
बोधम्	५.	चेतना	**श्लोके श्लोके**	१०.	प्रत्येक श्लोक और
एष्यति ।	६.	पायेंगे	**पदे पदे ॥**	११.	प्रत्येक पद में

श्लोकार्थ—तो फिर वे श्रीमद्भागवत की कथा से कैसे चेतना पायेंगे। उसकी कथाओं में तो प्रत्येक श्लोक और प्रत्येक पद में वेदों का अर्थ भरा है।

षट्षष्टितमः श्लोकः

छिन्दन्तु संशयं ह्येनं भवन्तोऽमोघदर्शनाः ।
विलम्बो नात्र कर्तव्यः शरणागतवत्सलाः ॥६६॥

पदच्छेद—

छिन्दन्तु संशयम् हि एनम्, भवन्तः अमोघ दर्शनाः ।
विलम्बः न अत्र कर्तव्यः, शरण आगत वत्सलाः ॥

शब्दार्थ—

छिन्दन्तु	१०.	दूर करें	**विलम्बः**	१२.	देर
संशयम्	८.	सन्देह को	**न**	१३.	न
हि	९.	अवश्य	**अत्र**	११.	इसमें
एनम्	७.	इस	**कर्तव्यः**	१४.	करें
भवन्तः	६.	आप लोग	**शरण**	३.	शरण में
अमोघ	१.	सफल	**आगत**	४.	आये हुओं के
दर्शनाः ।	२.	दर्शन वाले (तथा)	**वत्सलाः ॥**	५.	स्नेही

श्लोकार्थ—सफल दर्शन वाले तथा शरण में आये हुओं के स्नेही आपलोग इस सन्देह को अवश्य दूर करें। इसमें देर न करें।

सप्तषष्टितमः श्लोकः

कुमारा ऊचुः

वेदोपनिषदां साराज्जाता भागवती कथा ।
अत्युत्तमा ततो भाति पृथग्भूता फलाकृतिः ॥६७॥

पदच्छेद—

वेद उपनिषदाम् सारात्, जाता भागवती कथा ।
अति उत्तमा ततः भाति, पृथग्भूता फल आकृतिः ॥

शब्दार्थ—

वेद	३.	वेदों और	अति उत्तमा	११.	सर्वोत्तम
उपनिषदाम्	४.	वेदान्तों के	ततः	७.	अतः
सारात्	५.	सार-अंश से	भाति	१२.	शोभा पा रही है
जाता	६.	उत्पन्न हुई है	पृथग्भूता	८.	अलग हुए
भागवती	१.	श्रीमद्भागवत की	फल	९.	फल के
कथा ।	२.	कथा	आकृतिः ॥	१०.	आकार के समान

श्लोकार्थ—श्रीमद्भागवत की कथा वेदों और वेदान्तों के सार-अंश से उत्पन्न हुई है। अतः अलग हुए फल के आकार के समान सर्वोत्तम शोभा पा रही है।

अष्टषष्टितमः श्लोकः

आमूलाग्रं रसस्तिष्ठन्नास्ते न स्वाद्यते यथा ।
स भूयः संपृथग्भूतः फले विश्वमनोहरः ॥६८॥

पदच्छेद—

आमूल अग्रम् रसः तिष्ठन्, आस्ते न स्वाद्यते यथा ।
सः भूयः संपृथग्भूतः, फले विश्व मनोहरः ॥

शब्दार्थ—

आमूल	२.	(पेड़ में) जड़ से लेकर	यथा ।	१.	जिस प्रकार
अग्रम्	३.	फुनगी तक	सः	१२.	वही (रस)
रसः	४.	रस	भूयः	९.	तथा
तिष्ठन्	५.	विद्यमान	संपृथग्भूतः	११.	अलग हुआ
आस्ते	६.	रहता है (किन्तु)	फले	१०.	फल के रूप में
न	७.	नहीं	विश्व	१३.	सबके
स्वाद्यते	८.	चखा जा सकता (है)	मनोहरः ॥	१४.	मन को भाता (है)

श्लोकार्थ—जिस प्रकार पेड़ में जड़ से लेकर फुनगी तक रस विद्यमान रहता है; किन्तु चखा नहीं जा सकता है तथा फल के रूप में अलग हुआ वही रस सबके मन को भाता है।

एकोनसप्ततितमः श्लोकः

यथा दुग्धे स्थितं सर्पिर्न स्वादायोपकल्पते ।
पृथग्भूतं हि तद्गव्यं देवानां रसबर्धनम् ॥६९॥

पदच्छेद—

यथा दुग्धे स्थितम् सर्पिः, न स्वादाय उपकल्पते ।
पृथक् भूतम् हि तद् गव्यम्, देवानाम् रस वर्धनम् ॥

शब्दार्थ—

यथा	१.	जैसे	पृथक्	९.	अलग
दुग्धे	२.	दूध में	भूतम्	१०.	हुआ
स्थितम्	३.	विद्यमान	हि	८.	किन्तु
सर्पिः	४.	घी	तद्	११.	वही
न	६.	नहीं	गव्यम्	१२.	घी
स्वादाय	५.	स्वाद के लिए	देवानाम्	१३.	देवताओं का
उपकल्पते ।	७.	होता	रसवर्धनम् ॥	१४.	बलवर्धक (है)

श्लोकार्थ—जैसे दूध में विद्यमान घी स्वाद के लिए नहीं होता; किन्तु अलग हुआ वही घी देवताओं का बलवर्धक है ।

सप्ततितमः श्लोकः

इक्षूणामपि मध्यान्तं शर्करा व्याप्य तिष्ठति ।
पृथग्भूता च सा मिष्टा तथा भागवती कथा ॥७०॥

पदच्छेद—

इक्षूणाम् अपि मध्य अन्तम्, शर्करा व्याप्य तिष्ठति ।
पृथक् भूता च सा मिष्टा, तथा भागवती कथा ॥

शब्दार्थ—

इक्षूणाम्	१.	ईंख के	भूता	९.	होने पर
अपि	२.	भी	च	७.	तथा
मध्य अन्तम्	३.	मध्य भाग में	सा	१०.	वह
शर्करा	४.	चीनी	मिष्टा	११.	मीठी (लगती है)
व्याप्य	५.	फैलकर	तथा	१२.	उसी प्रकार
तिष्ठति ।	६.	रहती है	भागवती	१३.	श्रीमद्भागवत की
पृथक्	८.	अलग	कथा ॥	१४.	कथा (है)

श्लोकार्थ—ईंख के भी मध्य-भाग में चीनी फैलकर रहती है तथा अलग होने पर वह मीठी लगती है। उसी प्रकार श्रीमद्भागवत की कथा है ।

एकसप्ततितमः श्लोकः

इदं भागवतं नाम पुराणं ब्रह्मसम्मितम् ।
भक्तिज्ञानविरागाणां स्थापनाय प्रकाशितम् ॥७१॥

पदच्छेद—

इदम् भागवतम् नाम, पुराणम् ब्रह्म सम्मितम् ।
भक्ति ज्ञान विरागाणाम्, स्थापनाय प्रकाशितम् ॥

शब्दार्थ—

इदम्	५. यह	सम्मितम् ।	४. सम्मत
भागवतम्	१. श्रीमद्भागवत	भक्ति ज्ञान	७. भक्ति, ज्ञान और
नाम	२. नाम का	विरागाणाम्	८. वैराग्य की
पुराणम्	६. महापुराण	स्थापनाय	९. स्थापना के लिए
ब्रह्म	३. वेद से	प्रकाशितम् ॥	१०. रचित (है)

श्लोकार्थ—श्रीमद्भागवत नाम का वेद से सम्मत यह महापुराण भक्ति, ज्ञान और वैराग्य की स्थापना के लिए रचित है ।

द्विसप्ततितमः श्लोकः

वेदान्तवेदसुस्नाते गीताया अपि कर्तरि ।
परितापवति व्यासे मुह्यत्यज्ञानसागरे ॥७२॥

पदच्छेद—

वेदान्त वेद सुस्नाते, गीतायाः अपि कर्तरि ।
परितापवति व्यासे, मुह्यति अज्ञान सागरे ॥

शब्दार्थ—

वेदान्त	२. उपनिषदों में	कर्तरि ।	६. रचयिता
वेद	१. वेदों और	परितापवति	९. सन्ताप और
सुस्नाते	३. पारंगत (तथा)	व्यासे	७. महर्षि वेदव्यास (जब)
गीतायाः	४. श्रीमद्भगवद्गीता के	मुह्यति	१०. मोह से ग्रस्त (थे)
अपि	५. भी	अज्ञान सागरे ॥	८. अज्ञान के सागर में

श्लोकार्थ—वेदों और उपनिषदों में पारंगत तथा श्रीमद्भगवद्गीता के भी रचयिता महर्षि वेदव्यास जब अज्ञान के सागर में संताप और मोह से ग्रस्त थे ।

त्रिसप्ततितमः श्लोकः

तदा त्वया पुरा प्रोक्तं चतुःश्लोकसमन्वितम् ।
तदीयश्रवणात्सद्यो निर्बाधो बादरायणः ॥७३॥

पदच्छेद—

तदा त्वया पुरा प्रोक्तम्, चतुः श्लोक समन्वितम् ।
तदीय श्रवणात् सद्यः, निर्बाधः बादरायणः ॥

शब्दार्थ—

तदा	१.	तब	**समन्वितम् ।**	५.	वाले (श्रीमद्भागवत) को
त्वया	२.	आपने (ही)	**तदीय**	८.	उसके
पुरा	६.	पहिले	**श्रवणात्**	९.	सुनने से
प्रोक्तम्	७.	कहा था	**सद्यः**	११.	तत्काल
चतुः	३.	चार	**निर्बाधः**	१२.	बाधा से रहित (हो गये थे)
श्लोक	४.	श्लोकों	**बादरायणः ॥**	१०.	वेदव्यास मुनि

श्लोकार्थ—तब आपने ही चार श्लोकों वाले श्रीमद्भागवत को पहिले कहा था। उसके सुनने से वेदव्यास मुनि तत्काल बाधा से रहित हो गये थे।

चतुःसप्ततितमः श्लोकः

तत्र ते विस्मयः केन यतः प्रश्नकरो भवान् ।
श्रीमद्भागवतं श्राव्यं शोकदुःखविनाशनम् ॥७४॥

पदच्छेद—

तत्र ते विस्मयः केन, यतः प्रश्नकरः भवान् ।
श्रीमद्भागवतम् श्राव्यम्, शोक दुःख विनाशनम् ॥

शब्दार्थ—

तत्र	१.	इसमें	**भवान् ।**	६.	आप
ते	२.	आपको	**श्रीमद्भागवतम्**	११.	श्रीमद्भागवत महापुराण को
विस्मयः	३.	आश्चर्य	**श्राव्यम्**	१२.	सुनावें
केन	४.	क्यों (है)	**शोक**	८.	चिन्ता और
यतः	५.	जिससे कि	**दुःख**	९.	पीड़ा को
प्रश्नकरः	७.	प्रश्न कर रहें हैं (अतः आप)	**विनाशनम् ॥**	१०.	हरने वाले

श्लोकार्थ—इसमें आपको आश्चर्य क्यों है? जिससे कि आप प्रश्न कर रहें हैं। अतः आप चिन्ता और पीड़ा को हरने वाले श्रीमद्भागवत महापुराण को सुनावें।

पञ्चसप्ततितमः श्लोकः

नारद उवाच

यद्दर्शनं च विनिहन्त्यशुभानि सद्यः, श्रेयस्तनोति भवदुःखदवार्दितानाम् ।
निश्शेषशेषमुखगीतकथैकपानाः, प्रेमप्रकाशकृतये शरणं गतोऽस्मि ॥७५॥

पदच्छेद—यद् दर्शनम् च विनिहन्ति अशुभानि सद्यः, श्रेयः तनोति भव दुःख दव अर्दितानाम् ।
निश्शेष शेष मुख गीत कथा एक पानाः, प्रेम प्रकाश कृतये शरणम् गतः अस्मि ॥

शब्दार्थ—

निर्धनाः	५.	गरीब लोग	लोकम्	१८.	धाम को
ते	४.	वे	सर्वथा	१९.	एकदम
अपि	६.	भी	अतः	१४.	इसलिये
धन्याः	७.	भाग्यशाली (हैं)	विहाय	२०.	छोड़कर
निवसति	१३.	निवास करती है	प्रवशति	२६.	प्रवेश कर जाते हैं
हृदि	९.	चित्त में	हृदि	२५.	हृदय में
येषाम्	८.	जिनके	तेषाम्	२४.	उन (भक्तों) के
श्रीहरेः	१०.	श्रीहरि की	भक्ति	२१.	भक्ति के
भक्तिः	१२.	भक्ति	सूत्र	२२.	धागे से
एका ।	११.	अनन्य	उपनद्धः ॥	२३.	बँधे हुए

श्लोकार्थ—सारे भूलोक के बीच वे गरीब लोग भी भाग्यशाली हैं, जिनके चित्त में श्रीहरि की अनन्य भक्ति निवास करती है। इसलिए भगवान् श्रीहरि भी अपने धाम को एकदम छोड़कर भक्ति के धागे से बँधे हुये उन भक्तों के हृदय में प्रवेश कर जाते हैं।

चतुस्सप्ततितमः श्लोकः

ब्रूमोऽद्य ते किमधिकं महिमानमेवम्,
ब्रह्मात्मकस्य भुवि भागवताभिधस्य।
यत्संश्रयान्निगदिते लभते सुवक्ता,
श्रोतापि कृष्णसमतामलमन्यधर्मैः ॥७४॥

पदच्छेद—

ब्रूमः अद्य ते किम् अधिकम् महिमानम् एवम्,
ब्रह्म आत्मकस्य भुवि भागवत अभिधस्य।
यत् संश्रयात् निगदिते लभते सुवक्ता,
श्रोता अपि कृष्ण समताम् अलम् अन्य धर्मैः॥

शब्दार्थ—

ब्रूमः	१२.	कहें	यत्	१३.	इस (पुराण) के
अद्य	१.	अब (हम)	संश्रयात्	१४.	आधार पर
ते	२.	आप लोगों से	निगदिते	१५.	(कथा) कहने से
किम्	११.	क्या	लभते	२१.	प्राप्त कर लेते हैं
अधिकम्	९.	अधिक	सुवक्ता	१६.	वक्ता
महिमानम्	१०.	महिमा	श्रोता	१८.	श्रोता
एवम्	८.	और	अपि	१७.	और
ब्रह्म	४.	परमात्मा का	कृष्ण	१९.	श्रीकृष्ण की
आत्मकस्य	५.	शरीर रूप	समताम्	२०.	समानता
भुवि	३.	भूलोक में	अलम्	२४.	व्यर्थ (हैं)
भागवत	६.	श्रीमद्भागवत	अन्य	२२.	(अतः इसके सामने) दूसरे
अभिधस्य।	७.	पुराण की	धर्मैः॥	२३.	उपाय

श्लोकार्थ—अब हम आपलोगों से भूलोक में परमात्मा का शरीररूप श्रीमद्भागवत पुराण की और अधिक महिमा क्या कहें ? इस पुराण के आधार पर कथा कहने से वक्ता और श्रोता श्रीकृष्ण की समानता प्राप्त कर लेते हैं। अतः इसके सामने दूसरे उपाय हैं।

इति श्रीपद्मपुराणे उत्तरखण्डे श्रीमद्भागवतमहात्म्ये भक्तिकष्टनिवर्तनं नाम तृतीयः अध्यायः ॥३॥

अथ चतुर्थः अध्यायः

प्रथमः श्लोकः

सूत उवाच

अथ वैष्णवचित्तेषु दृष्ट्वा भक्तिमलौकिकीम् ।
निजलोकं परित्यज्य भगवान् भक्तवत्सलः ॥१॥

पदच्छेद--

अथ वैष्णव चित्तेषु, दृष्ट्वा भक्तिम् अलौकिकीम् ।
निज लोकम् परित्यज्य, भगवान् भक्त वत्सलः ॥

शब्दार्थ—

अथ	१.	तदनन्तर	**अलौकिकीम् ।**	४.	अद्भुत
वैष्णव	२.	विष्णु-भक्तों के	**निज, लोकम्**	९.	अपने, धाम को
चित्तेषु	३.	हृदय में	**परित्यज्य**	१०.	छोड़कर (उनके हृदय में स्थित हो गये)
दृष्ट्वा	६.	देखकर	**भगवान्**	८.	भगवान् श्रीकृष्ण
भक्तिम्	५.	भक्ति-भाव	**भक्त, वत्सलः ॥**	७.	भक्तों के, स्नेही

श्लोकार्थ—तदनन्तर विष्णु-भक्तों के हृदय में अद्भुत भक्ति-भाव देखकर भक्तों के स्नेही भगवान् श्री कृष्ण अपने धाम को छोड़कर उनके हृदय में स्थित हो गये ।

द्वितीयः श्लोकः

वनमाली घनश्यामः पीतवासा मनोहरः ।
काञ्चीकलापरुचिरः लसन्मुकुटकुण्डलः ॥२॥

पदच्छेद—

वनमाली घनश्यामः, पीत वासा मनोहरः ।
काञ्ची कलाप रुचिरः, लसत् मुकुट कुण्डलः ॥

शब्दार्थ--

वनमाली	५.	वनमाला पहिने हुए	**काञ्ची**	७.	करधनी की
घन	३.	मेघ के समान	**कलाप**	८.	लड़ियों से
श्यामः	४.	साँवले (श्री हरि)	**रुचिरः**	९.	सुन्दर (तथा)
पीत	१.	पीले	**लसत्**	१२.	सुशोभित थे
वासा	२.	वस्त्र वाले (एवं)	**मुकुट**	१०.	मुकुट और
मनोहरः ।	६.	मन को हर रहे (थे वे)	**कुण्डलः ॥**	११.	कुण्डलों से

श्लोकार्थ--पीले वस्त्र वाले एवं मेघ के समान साँवले श्री हरि वनमाला पहिने हुए मन को हर रहे थे । वे करधनी की लड़ियों से सुन्दर तथा मुकुट और कुण्डलों से सुशोभित थे ।

तृतीयः श्लोकः

त्रिभङ्गललितश्चारुकौस्तुभेन विराजितः ।
कोटिमन्मथलावण्यो हरिचन्दनचर्चितः ॥३॥

पदच्छेद—

त्रिभङ्ग ललितः चारु, कौस्तुभेन विराजितः ।
कोटि मन्मथ लावण्यः, हरिचन्दन चर्चितः ॥

शब्दार्थ—

त्रिभङ्ग	१.	(भगवान् श्रीकृष्ण) उदर की तीन रेखाओं से	कोटि	६.	करोड़ों
			मन्मथ	७.	कामदेव के समान
ललितः	२.	सुन्दर	लावण्यः	८.	कान्तिमान् (और)
चारु	३.	मनोहर	हरिचन्दन	९.	पीले चन्दन से
कौस्तुभेन	४.	कौस्तुभमणि से	चर्चितः ॥	१०.	अनुलिप्त (थे)
विराजितः ।	५.	सुशोभित			

श्लोकार्थ—भगवान् श्री कृष्ण उदर की तीन रेखाओं से सुन्दर, मनोहर कौस्तुभमणि से सुशोभित, करोड़ों कामदेव के समान कान्तिमान् और पीले चन्दन से अनुलिप्त थे ।

चतुर्थः श्लोकः

परमानन्दचिन्मूर्तिर्मधुरो मुरलीधरः ।
आविवेश स्वभक्तानां हृदयान्यमलानि च ॥४॥

पदच्छेद—

परम आनन्द चित् मूर्तिः, मधुरः मुरलीधरः ।
आविवेश स्वभक्तानाम्, हृदयानि अमलानि च ॥

शब्दार्थ—

परम	१.	परम	आविवेश	१२.	प्रकट हो गये
आनन्द	२.	आनन्द	स्व	८.	अपने
चित्	३.	ज्ञान-	भक्तानाम्	९.	भक्तों के
मूर्तिः	४.	स्वरूप	हृदयानि	११.	मन में
मधुरः	५.	भोली छवि	अमलानि	१०.	निर्मल
मुरलीधरः ।	७.	वंशी वाले (भगवान् श्रीकृष्ण)	च ॥	६.	और

श्लोकार्थ—परम आनन्द, ज्ञान-स्वरूप भोली छवि और वंशी वाले भगवान् श्री कृष्ण अपने भक्तों के निर्मल मन में प्रकट हो गये ।

पञ्चमः श्लोकः

वैकुण्ठवासिनो ये च वैष्णवा उद्धवादयः ।
तत्कथाश्रवणार्थं ते गूढरूपेण संस्थिताः ॥५॥

पदच्छेद—

वैकुण्ठ वासिनः ये च, वैष्णवाः उद्धव आदयः ।
तद् कथा श्रवणार्थम् ते, गूढ रूपेण संस्थिताः ॥

शब्दार्थ—

वैकुण्ठ	२.	वैकुण्ठ में	**तद्**	९.	उस (भागवत) की
वासिनः	३.	रहने वाले	**कथा**	१०.	कथा को
ये	६.	जो	**श्रवणार्थम्**	११.	सुनने के लिये (वहाँ)
च	१.	तथा	**ते**	८.	वे
वैष्णवाः	७.	वैष्णव जन (थे)	**गूढ**	१२.	गुप्त
उद्धव	४.	उद्धव	**रूपेण**	१३.	रूप से
आदयः ।	५.	इत्यादि	**संस्थिताः ॥**	१४.	स्थित हो गये

श्लोकार्थ—तथा वैकुण्ठ में रहने वाले उद्धव इत्यादि जो वैष्णव-जन थे; वे उस भागवत की कथा को सुनने के लिए वहाँ गुप्त रूप से स्थित हो गये ।

षष्ठः श्लोकः

तदा जयजयारावो रसपुष्टिरलौकिकी ।
चूर्णप्रसूनवृष्टिश्च मुहुः शङ्खरवोऽप्यभूत् ॥६॥

पदच्छेद—

तदा जय जय आरावः, रस पुष्टिः अलौकिकी ।
चूर्ण प्रसून वृष्टिः च, मुहुः शङ्ख रवः अपि अभूत् ॥

शब्दार्थ—

तदा	१.	उस समय (वहाँ)	**प्रसून**	८.	फूलों की
जय जय	२.	जय-जयकार के	**वृष्टिः**	९.	वर्षा
आरावः	३.	शब्द	**च**	१०.	तथा
रस	४.	रस की	**मुहुः**	११.	बार-बार
पुष्टिः	६.	वृद्धि	**शङ्खरवः**	१२.	शंख की ध्वनि
अलौकिकी ।	५.	अद्भुत	**अपि**	१३.	भी
चूर्ण	७.	अबीर-गुलाल (और)	**अभूव ॥**	१४.	होने लगी

श्लोकार्थ—उस समय वहाँ जय-जयकार के शब्द, रस की अद्भुत वृद्धि, अबीर-गुलाल और फूलों की वर्षा तथा बार-बार शंख की ध्वनि भी होने लगी ।

सप्तमः श्लोकः

तत्सभासंस्थितानां च देहगेहात्मविस्मृतिः ।
दृष्ट्वा च तन्मयावस्थां नारदो वाक्यमब्रवीत् ॥७॥

पदच्छेद— तद् सभा संस्थितानाम् च, देह गेह आत्म विस्मृतिः ।
दृष्ट्वा च तन्मय अवस्थाम्, नारदः वाक्यम् अब्रवीत् ॥

शब्दार्थ—

तद्	१.	उस	दृष्ट्वा	१३.	देखकर
सभा	२.	सभा में	च	९.	तदन्तर
संस्थितानाम्	३.	बैठे हुए (लोगों) को	तन्मय	११.	भाव-विभोर
च	६.	और	अवस्थाम्	१२.	दशा को
देह	४.	शरीर	नारदः	१०.	देवर्षि नारद ने
गेह	५.	घर-बार	वाक्यम्	१४.	(यह) वचन
आत्म	७.	अपनी	अब्रवीत् ॥	१५.	कहा
विस्मृतिः ।	८.	सुध भूल गयी			

श्लोकार्थ—उस सभा में बैठे हुए लोगों को शरीर, घर-बार और अपनी सुध भूल गयी । तदनन्तर देवर्षि नारद ने भाव-विभोर दशा को देखकर यह वचन कहा ।

अष्टमः श्लोकः

अलौकिकोऽयं महिमा मुनीश्वराः, सप्ताहजन्योऽद्य विलोकितो मया ।
मूढाः शठा ये पशुपक्षिणोऽत्र, सर्वेऽपि निष्पापतमा भवन्ति ॥८॥

पदच्छेद—अलौकिकः अयम् महिमा मुनीश्वराः, सप्ताह जन्यः अद्य विलोकितः मया ।
मूढाः शठाः ये पशु पक्षिणः अत्र, सर्वे अपि निष्पापतमाः भवन्ति ॥

शब्दार्थ—

अलौकिकः	६.	अद्भुत	मूढाः	११.	अज्ञानी
अयम्	५.	इस	शठाः	१२.	दुष्ट (और)
महिमा	७.	सामर्थ्य को	ये	१०.	जो
मुनीश्वराः	१.	हे मुनिवरों !	पशु पक्षिणः	१३.	पशु-पक्षी (हैं वे)
सप्ताह, जन्यः	४.	भागवत सप्ताह से, उत्पन्न	अत्र	९.	यहाँ
अद्य	३.	आज	सर्वे अपि	१४.	सभी
विलोकितः	८.	देख लिया है	निष्पापतमाः	१५.	अत्यन्त पाप-रहित
मया ।	२.	मैंने	भवन्ति ॥	१६.	हो गये हैं

श्लोकार्थ—हे मुनिवरों ! मैंने आज भागवत सप्ताह से उत्पन्न इस अद्भुत सामर्थ्य को देख लिया है । यहाँ जो अज्ञानी, दुष्ट और पशु-पक्षी हैं; वे सभी अत्यन्त पाप-रहित हो गये हैं ।

नवमः श्लोकः

अतो नृलोके ननु नास्ति किंचित्, चित्तस्य शोधाय कलौ पवित्रम् ।
अघौघविध्वंसकरं तथैव, कथासमानं भुवि नास्ति चान्यत् ॥९॥

पदच्छेद—अतः नृ लोके ननु न अस्ति किंचित्, चित्तस्य शोधाय कलौ पवित्रम् ।
अघ ओघ विध्वंसकरम् तथैव, कथा समानम् भुवि न अस्ति च अन्यत् ॥

शब्दार्थ—

अतः	१.	इसलिए	पवित्रम् ।	८.	पवित्र साधन
नृ लोके	२.	मर्त्यलोक में	अघ, ओघ	१३.	पापों के, समूह का
ननु	६.	निश्चय ही	विध्वंसकरम्	१४.	नाश करने वाला
न अस्ति	९.	नहीं है	तथैव	११.	उसी प्रकार
किंचित्	७.	कोई	कथा, समानम्	१५.	श्रीमद्भागवत कथा के, समान
चित्तस्य	४.	मन की	भुवि	१२.	पृथ्वी पर
शोधाय	५.	शुद्धि के लिए	न अस्ति	१७.	नहीं है
कलौ	३.	कलियुग में	च	१०.	तथा
			अन्यत् ॥	१६.	कोई दूसरा (साधन)

श्लोकार्थ—इसलिए मर्त्यलोक में कलियुग में मन की शुद्धि के लिए निश्चय ही कोई पवित्र साधन नहीं है तथा उसी प्रकार पृथ्वी पर पापों के समूह का नाश करने वाला श्रीमद्भागवत कथा के समान कोई दूसरा साधन नहीं है ।

दशमः श्लोकः

के के विशुद्ध्यन्ति वदन्तु मह्यम्, सप्ताहयज्ञेन कथामयेन ।
कृपालुभिर्लोकहितं विचार्य, प्रकाशितः कोऽपि नवीनमार्गः ॥१०॥

पदच्छेद—के के विशुद्ध्यन्ति वदन्तु मह्यम्, सप्ताह यज्ञेन कथामयेन ।
कृपालुभिः लोक हितम् विचार्य, प्रकाशितः कोऽपि नवीन मार्गः ॥

शब्दार्थ—

के के	४.	कौन-कौन (से लोग)	कृपालुभिः	८.	दयालु (आप लोगों ने)
विशुद्ध्यन्ति	५.	पवित्र हो जाते हैं	लोक, हितम्	९.	संसार का, कल्याण
वदन्तु	७.	बतावें	विचार्य	१०.	सोचकर (हमें)
मह्यम्	६.	हमें	प्रकाशितः	१४.	बतलाया है
सप्ताह	२.	श्रीमद्भागवत सप्ताह के	कोऽपि	११.	(यह) अद्भुत (और)
यज्ञेन	३.	अनुष्ठान से	नवीन	१२.	नया
कथामयेन ।	१.	कथारूप	मार्गः ॥	१३.	रास्ता

श्लोकार्थ—कथारूप श्रीमद्भागवत सप्ताह के अनुष्ठान से कौन-कौन से लोग पवित्र हो जाते हैं ? हमें बतावें । दयालु आप लोगों ने संसार का कल्याण सोचकर हमें यह अद्भुत और नया रास्ता बतलाया है ।

एकादशः श्लोकः

कुमारा ऊचुः—

ये मानवाः पापकृतस्तु सर्वदा, सदा दुराचाररता विमार्गगाः ।
क्रोधाग्निदग्धाः कुटिलाश्च कामिनः, सप्ताहयज्ञेन कलौ पुनन्ति ते ॥११॥

पदच्छेद—**ये मानवाः पापकृतः तु सर्वदा, सदा दुराचार रताः विमार्गगाः ।**
क्रोध अग्नि दग्धाः कुटिलाः च कामिनः, सप्ताह यज्ञेन कलौ पुनन्ति ते ॥

शब्दार्थ—

ये, मानवाः	१. जो, लोग	**अग्नि, दग्धाः**	८. आग में, जले हुये
पापकृतः	३. पाप करने वाले	**कुटिलाः, च**	९. कपटी, और
तु	४. तथा	**कामिनः**	१०. कामवासना के वश में हैं।
सर्वदा	२. हमेशा	**सप्ताह, यज्ञेन**	१३. श्रीमद्भागवत सप्ताह के, अनुष्ठान से
सदा, दुराचार	५. नित्य, बुरे आचरण में	**कलौ**	११. कलियुग में
रताः, विमार्गगाः ।	६. लगे हुये, कुमार्गगामी	**पुनन्ति**	१४. पवित्र हो जाते हैं
क्रोध	७. क्रोध की	**ते ॥**	१२. वे (लोग)

श्लोकार्थ—जो लोग हमेशा पाप करने वाले तथा नित्य बुरे आचरण से लगे हुये, कुमार्गगामी, क्रोध की आग में जले हुए, कपटी और कामवासना के वश में हैं; कलियुग में वे लोग श्रीमद्भागवत सप्ताह के अनुष्ठान से पवित्र हो जाते हैं ।

द्वादशः श्लोकः

सत्येन हीनाः पितृमातृदूषकाः, तृष्णाकुलाश्चाश्रमधर्मवर्जिताः ।
ये दाम्भिका मत्सरिणोऽपि हिंसकाः, सप्ताहयज्ञेन कलौ पुनन्ति ते ॥१२॥

पदच्छेद—**सत्येन हीनाः पितृ मातृ दूषकाः, तृष्णा आकुलाः च आश्रम धर्म वर्जिताः ।**
ये दम्भिकाः मत्सरिणः अपि हिंसकाः, सप्ताह यज्ञेन कलौ पुनन्ति ते ॥

शब्दार्थ—

सत्येन	१. (जो लोग) सत्य से	**ये**	११. जो लोग
हीनाः	२. दूर	**दाम्भिकाः, मत्सरिणः**	१२. पाखण्डी, ईष्यालु (और)
पितृ, मातृ	३. पिता और माता को	**अपि**	१०. तथा
दूषकाः	४. दोष देने वाले	**हिंसकाः**	१३. हिंसा करने वाले (हैं)
तृष्णा	५. लालच से	**सप्ताह**	१६. श्रीमद्भागवत सप्ताह के
आकुलाः, च	६. अशान्त, एवम्	**यज्ञेन**	१७. अनुष्ठान से
आश्रम	७. ब्रह्मचर्य, गृहस्थ, वानप्रस्थ	**कलौ**	१४. कलियुग में
धर्म	८. और संन्यास धर्म से	**पुनन्ति**	१८. पवित्र हो जाते हैं
वर्जिताः ।	९. रहित (हैं)	**ते ॥**	१५. वे (लोग)

श्लोकार्थ—जो लोग सत्य से दूर, माता और पिता को दोष देने वाले, लालच से अशान्त एवम् ब्रह्मचर्य, गृहस्थ, वानप्रस्थ और संन्यास धर्म से रहित हैं तथा जो लोग पाखण्डी, ईर्ष्यालु और हिंसा करने वाले हैं; कलियुग में वे लोग श्रीमद्भागवत सप्ताह के अनुष्ठान से पवित्र हो जावे हैं ।

त्रयोदशः श्लोकः

पञ्चोग्रपापाश्छलछद्मकारिणः, क्रूराः पिशाचा इव निर्दयाश्च ये ।
ब्रह्मस्वपुष्टा व्यभिचारकारिणः, सप्ताहयज्ञेन कलौ पुनन्ति ते ॥१३॥

पदच्छेद—पञ्च उग्र पापाः छल छद्म कारिणः, क्रूराः पिशाचाः इव निर्दयाः च ये ।
ब्रह्म स्व पुष्टाः व्यभिचार कारिणः, सप्ताह यज्ञेन कलौ पुनन्ति ते ॥

शब्दार्थ—

पञ्च उग्र पापाः	२. पाँच महापापों को करने वाले	ब्रह्मस्व, पुष्टाः	७. ब्राह्मण के धन से, धनी
छल छद्म	३. धोखा और कपट का	व्यभिचार कारिणः	९. व्यभिचारी (हैं)
कारिणः	४. बर्ताव करने वाले	सप्ताह, यज्ञेन	१२. सप्ताह, कथा से
क्रूराः, पिशाचाः	५. कठोर, राक्षस के	कलौ	१०. कलियुग में
इव, निर्दयाः	६. समान, निर्दयी	पुनन्ति	१३. पवित्र हो जाते हैं
च	८. तथा	ते ॥	११. वे (लोग भी)
ये ।	१. जो (लोग)		

श्लोकार्थ—जो लोग पाँच महापापों (मदिरापान, ब्रह्महत्या, गुरुपत्नी-गमन, सुवर्ण की चोरी और विश्वासघात) को करने वाले, धोखा और कपट का वर्ताव करने वाले; कठोर राक्षस के समान निर्दयी, ब्राह्मण के धन से धनी तथा व्यभिचारी हैं; कलियुग में वे लोग भी सप्ताह कथा से पवित्र हो जाते हैं ।

चतुर्दशः श्लोकः

कायेन वाचा मनसाऽपि पातकम्, नित्यं प्रकुर्वन्ति शठा हठेन ये ।
परस्वपुष्टा मलिना दुराशयाः, सप्ताहयज्ञेन कलौ पुनन्ति ते ॥१४॥

पदच्छेद—कायेन-वाचा मनसा अपि पातकम् , नित्यम् प्रकुर्वन्ति शठाः हठेन ये ।
परस्व पुष्टाः मलिनाः दुराशयाः, सप्ताह यज्ञेन कलौ पुनन्ति ते ॥

शब्दार्थ—

कायेन	५. शरीर से	परस्व	१०. दूसरों के धन से
वाचा, मनसा	३. वाणी, मन	पुष्टाः	११. बढ़ने वाले
अपि	४. और	मलिनाः	१२. दुष्ट आचरण और
पातकम्	८. पाप	दुराशयाः	१३. बुरे विचार वाले (हैं)
नित्यम्	७. सदा	सप्ताह	१६. श्रीमद्भागवत-सप्ताह के
प्रकुर्वन्ति	९. करते रहते हैं (तथा)	यज्ञेन	१७. अनुष्ठान से
शठाः	२. धूर्त (मनुष्य)	कलौ	१४. कलियुग में
हठेन	६. हठ-पूर्वक	पुनन्ति	१८. पवित्र हो जाते हैं
ये ।	१. जो	ते ॥	१५. वे (भी)

श्लोकार्थ—जो धूर्त मनुष्य मन, वाणी और शरीर से हठ-पूर्वक सदा पाप करते रहते हैं तथा दूसरों के धन से बढ़ने वाले, दुष्ट आचरण और बुरे विचार वाले हैं; कलियुग में वे भी श्रीमद्भागवत सप्ताह के अनुष्ठान से पवित्र हो जाते हैं ।

पञ्चदशः श्लोकः

अत्र ते कीर्तयिष्याम इतिहासं पुरातनम् ।
यस्य श्रवणमात्रेण पापहानिः प्रजायते ॥१५॥

पदच्छेद—

अत्र ते कीर्तयिष्यामः, इतिहासम् पुरातनम् ।
यस्य श्रवण मात्रेण, पाप हानिः प्रजायते ॥

शब्दार्थ—

अत्र	१.	इस विषय में	यस्य	६.	जिसको
ते	२.	तुम्हें	श्रवणमात्रेण	७.	सुनने से ही
कीर्तयिष्यामः	५.	हम सुना रहे हैं	पाप	८.	पापों का
इतिहासम्	४.	कथा	हानिः	९.	नाश
पुरातनम् ।	३.	(एक) पुरानी	प्रजायते ॥	१०.	हो जाता है

श्लोकार्थ—इस विषय में तुम्हें एक पुरानी कथा हम सुना रहे हैं; जिसको सुनने से ही पापों का नाश हो जाता है ।

षोडशः श्लोकः

तुङ्गभद्रातटे पूर्वमभूत्पत्तनमुत्तमम् ।
यत्र वर्णाः स्वधर्मेण सत्यसत्कर्मतत्पराः ॥१६॥

पदच्छेद—

तुङ्गभद्रा तटे पूर्वम्, अभूत् पत्तनम् उत्तमम् ।
यत्र वर्णाः स्व धर्मेण, सत्य सत् कर्म तत्पराः ॥

शब्दार्थ—

तुङ्गभद्रा	२.	तुंगभद्रा नदी के	वर्णाः	८.	(ब्राह्मणादि) चारों वर्ण
तटे	३.	तट पर	स्व	९.	अपने-अपने
पूर्वम्	१.	प्राचीन काल में	धर्मेण	१०.	धर्म के अनुसार
अभूत्	६.	था	सत्य	११.	सत्य और
पत्तनम्	५.	नगर	सत्	१२.	उत्तम
उत्तमम् ।	४.	(एक) सुन्दर	कर्म	१३.	कर्म करने में
यत्र	७.	जिसमें	तत्पराः ॥	१४.	लगे हुये (थे)

श्लोकार्थ—प्राचीन काल में तुंगभद्रा नदी के तट पर एक सुन्दर नगर था; जिसमें ब्राह्मणादि चारों वर्ण अपने-अपने धर्म के अनुसार सत्य और उत्तम कर्म करने में लगे हुये थे ।

सप्तदशः श्लोकः

आत्मदेवः पुरे तस्मिन् सर्ववेदविशारदः ।
श्रौतस्मार्तेषु निष्णातो द्वितीय इव भास्करः ॥१७॥

पदच्छेद—

आत्मदेवः पुरे तस्मिन्, सर्व वेद विशारदः ।
श्रौत स्मार्तेषु निष्णातः, द्वितीयः इव भास्करः ॥

शब्दार्थ—

आत्मदेवः	१२. आत्मदेव (नामक ब्राह्मण रहते थे)		**श्रौत**	६. वैदिक और
पुरे	२. नगर में		**स्मार्तेषु**	७. पौराणिक (कर्मों) के
तस्मिन्	१. उस		**निष्णातः**	८. विद्वान्
सर्व	३. चारों		**द्वितीयः**	९. दूसरे
वेद	४. वेदों के		**इव**	११. समान (तेजस्वी)
विशारदः ।	५. जानकर		**भास्करः ॥**	१०. सूर्य के

श्लोकार्थ—उस नगर में चारों वेदों के जानकार, वैदिक और पौराणिक कर्मों के विद्वान्, दूसरे सूर्य के समान तेजस्वी आत्मदेव नामक ब्राह्मण रहते थे ।

अष्टादशः श्लोकः

भिक्षुको वित्तवाँल्लोके तत्प्रिया धुन्धुली स्मृता ।
स्ववाक्यस्थापिका नित्यं सुन्दरी सुकुलोद्भवा ॥१८॥

पदच्छेद—

भिक्षुकः वित्तवान् लोके, तद् प्रिया धुन्धुली स्मृता ।
स्व वाक्य स्थापिका नित्यम्, सुन्दरी सुकुल उद्भवा ॥

शब्दार्थ—

भिक्षुकः	२. भिक्षावृत्ति करने वाला		**स्व**	९. अपनी
वित्तवान्	३. धनवान् (ब्राह्मण था)		**वाक्य**	१०. बात को
लोके	१. (वह) लोक में		**स्थापिका**	११. ऊपर रखने वाली
तद्	४. उसकी		**नित्यम्**	८. (वह) सदा
प्रिया	५. पत्नी		**सुन्दरी**	१२. सुन्दरी (और)
धुन्धुली	६. धुन्धुली नाम से		**सुकुल**	१३. उत्तम वंश में
स्मृता ।	७. कही जाती थी		**उद्भवा ॥**	१४. उत्पन्न (थी)

श्लोकार्थ—वह लोक में भिक्षावृत्ति करने वाला धनवान् ब्राह्मण था । उसकी पत्नी धुन्धुली नाम से कही जाती थी । वह सदा अपनी बात को ऊपर रखने वाली, सुन्दरी और उत्तम वंश में उत्पन्न थी ।

एकोनविंशः श्लोकः

लोकवार्तारता क्रूरा प्रायशो बहुजल्पिका ।
शूरा च गृहकृत्येषु कृपणा कलहप्रिया ॥१९॥

पदच्छेद—

लोक वार्ता रता क्रूरा, प्रायशः बहु जल्पिका ।
शूरा च गृह कृत्येषु, कृपणा कलह प्रिया ॥

शब्दार्थ—

लोक	१. (वह धुन्धुली) दुनियादारी की		शूरा	१०. तेज
वार्ता	२. बातों से		च	१२. तथा
रता	३. प्रसन्न		गृह	८. घर के
क्रूरा	४. निर्दयी		कृत्येषु	९. कामों में
प्रायशः	५. अधिकतर		कृपणा	११. कंजूस
बहु	६. बहुत		कलह	१३. झगड़ा
जल्पिका ।	७. बोलने वाली		प्रिया ॥	१४. पसन्द (थी)

श्लोकार्थ—वह धुन्धुली दुनियादारी की बातों से प्रसन्न, निर्दयी, अधिकतर बहुत बोलने वाली, घर के कामों में तेज, कंजूस तथा झगड़ा-पसन्द थी ।

विंशः श्लोकः

एवं निवसतोः प्रेम्णा दम्पत्यो रममाणयोः ।
अर्था कामास्तयोरासन्न सुखाय गृहादिकम् ॥२०॥

पदच्छेद—

एवम् निवसतोः प्रेम्णा, दम्पत्योः रममाणयोः ।
अर्थाः कामाः तयोः आसन्, न सुखाय गृह आदिकम् ॥

शब्दार्थ—

एवम्	१. इस प्रकार		कामाः	८. भोग-विलास (और)
निवसतोः	३. निवास करते हुए (तथा)		तयोः	५. उन
प्रेम्णा	२. प्रेम के साथ		आसन्	१२. लगते थे
दम्पत्योः	६. पति-पत्नी को		न	११. नहीं
रममाणयोः ।	४. विहार करते हुए		सुखाय	१०. अच्छे
अर्थाः	७. सम्पत्ति		गृह, आदिकम् ॥	९. घर, इत्यादि (सुख-साधन)

श्लोकार्थ—इस प्रकार प्रेम के साथ निवास करते हुए तथा विहार करते हुए उन पति-पत्नी को सम्पत्ति, भोग-विलास और घर इत्यादि सुख-साधन अच्छे नहीं लगते थे ।

एकविंशः श्लोकः

पश्चाद्धर्माः समारब्धाः ताभ्यां सन्तानहेतवे ।
गोभूहिरण्यवासांसि दीनेभ्यो यच्छतः सदा ॥२१॥

पदच्छेद—

पश्चात् धर्माः समारब्धाः, ताभ्याम् सन्तान हेतवे ।
गो भू हिरण्य वासांसि, दीनेभ्यः यच्छतः सदा ॥

शब्दार्थ—

पश्चात्	१.	तदनन्तर	गो, भू	९.	गाय, भूमि
धर्माः	५.	धर्म-कर्म	हिरण्य	१०.	सुवर्ण और
समारब्धाः	६.	करने लगे (और)	वासांसि	११.	वस्त्रों का
ताभ्याम्	२.	वे दोनों (दम्पती)	दीनेभ्यः	७.	गरीबों को
सन्तान	३.	पुत्र की	यच्छतः	१२.	दान देने लगे
हेतवे ।	४.	कामना से	सदा ॥	८.	नित्य

श्लोकार्थ—तदनन्तर वे दोनों दम्पती पुत्र की कामना से धर्म-कर्म करने लगे और गरीबों को नित्य गाय, भूमि, सुवर्ण और वस्त्रों का दान देने लगे ।

द्वाविंशः श्लोकः

धनार्धं धर्ममार्गेण ताभ्यां नीतं तथापि च ।
न पुत्रो नापि वा पुत्री ततश्चिन्तातुरो भृशम् ॥२२॥

पदच्छेद—

धन अर्धम् धर्म मार्गेण, ताभ्याम् नीतम् तथा अपि च ।
न पुत्रः नापि वा पुत्री, ततः चिन्ता आतुरः भृशम् ॥

शब्दार्थ—

धन	५.	सम्पत्ति का	न	९.	न
अर्धम्	६.	आधा भाग	पुत्रः	१०.	पुत्र (हुआ)
धर्म	३.	धर्म के	नापि	१२.	नहीं
मार्गेण	४.	रास्ते से	वा	११.	और
ताभ्याम्	२.	उन दोनों ने	पुत्री	१३.	पुत्री (हुई)
नीतम्	७.	दान कर दिया	ततः	१४.	तदनन्तर (वे)
तथा अपि	८.	तो भी (उन्हें)	चिन्ता	१५.	चिन्ता से
च ।	१.	इस प्रकार	आतुरः	१७.	व्याकुल (हो गये)
			भृशम् ॥	१६.	बहुत

श्लोकार्थ—इस प्रकार उन दोनों ने धर्म के रास्ते से सम्पत्ति का आधा भाग दान कर दिया, तो भी उन्हें न पुत्र हुआ और नहीं पुत्री हुई । तदनन्तर वे चिन्ता से बहुत व्याकुल हो गये ।

त्रयोविंशः श्लोकः

एकदा स द्विजो दुःखाद् गृहं त्यक्त्वा वनं गतः ।
मध्याह्ने तृषितो जातस्तडागं समुपेयिवान् ॥२३॥

पदच्छेद—

एकदा सः द्विजः दुःखात्, गृहम् त्यक्त्वा वनम् गतः ।
मध्याह्ने तृषितः जातः, तडागम् समुपेयिवान् ॥

शब्दार्थ—

एकदा	१.	एक दिन	गतः ।	८.	चला गया (और वहाँ)
सः	२.	वह	मध्याह्ने	९.	दोपहर में
द्विजः	३.	ब्राह्मण	तृषितः	१०.	प्यासा
दुःखात्	४.	दुःख के कारण	जातः	११.	होने से
गृहम्	५.	घर	तडागम्	१२.	एक तालाब के
त्यक्त्वा	६.	छोड़कर	समुपेयिवान् ॥	१३.	समीप पहुँचा
वनम्	७.	वन में			

श्लोकार्थ—एक दिन वह ब्राह्मण दुःख के कारण घर छोड़कर वन में चला गया और वहाँ दोपहर में प्यासा होने से एक तालाब के समीप पहुँचा ।

चतुर्विंशः श्लोकः

पीत्वा जलं निषण्णस्तु प्रजादुःखेन कर्शितः ।
मुहूर्त्तादपि तत्रैव संन्यासी कश्चिदागतः ॥२४॥

पदच्छेद—

पीत्वा जलम् निषण्णः तु, प्रजा दुःखेन कर्शितः ।
मुहूर्त्तात् अपि तत्र एव, संन्यासी कश्चित् आगतः ॥

शब्दार्थ—

पीत्वा	४.	पीकर	मुहूर्त्तात्	७.	एक क्षण बाद
जलम्	३.	पानी	अपि	८.	ही
निषण्णः	५.	बैठा ही था	तत्र एव	९.	वहीं पर
तु	६.	कि	संन्यासी	११.	संन्यासी जी
प्रजा, दुःखेन	१.	सन्तान के, दुःख से	कश्चित्	१०.	कोई
कर्शितः ।	२.	दुःखी (वह ब्राह्मण)	आगतः ॥	१२.	पधारे

श्लोकार्थ—संतान के दुःख से दुःखी वह ब्राह्मण पानी पीकर बैठा ही था कि एक क्षण बाद ही वहीं पर कोई संन्यासी जी पधारे ।

पञ्चविंशः श्लोकः

दृष्ट्वा पीतजलं तं तु विप्रो यातस्तदन्तिकम् ।
नत्वा च पादयोस्तस्य निःश्वसन् संस्थितः पुरः ।।२५।।

पदच्छेद—

दृष्ट्वा पीत जलम् तम् तु, विप्रः यातः तद् अन्तिकम् ।
नत्वा च पादयोः तस्य, निःश्वसन् संस्थितः पुरः ॥

शब्दार्थ—

दृष्ट्वा	६.	देखकर	अन्तिकम् ।	८.	समीप
पीत	५.	पीया हुआ	नत्वा	१३.	नमस्कार करके
जलम्	४.	जल	च	१०.	और
तम्	३.	उन्हें	पादयोः	१२.	चरणों में
तु	१.	तदनन्तर	तस्य	११.	उनके
विप्रः	२.	(वह) ब्राह्मण	निःश्वसन्	१४.	लम्बी साँस लेता हुआ
यातः	९.	गया	संस्थितः	१६.	बैठ गया
तद्	७.	उनके	पुरः ॥	१५.	सामने

श्लोकार्थ—तदनन्तर वह ब्राह्मण उन्हें जल पीया हुआ देखकर उनके समीप गया और उनके चरणों में नमस्कार करके लम्बी साँस लेता हुआ सामने बैठ गया ।

षड्विंशः श्लोकः

यतिरुवाच— **कथं रोदिषि विप्र त्वं का ते चिन्ता बलीयसी ।**
वद त्वं सत्वरं मह्यं स्वस्य दुःखस्य कारणम् ।।२६।।

पदच्छेद—

कथम् रोदिषि विप्र त्वम्, का ते चिन्ता बलीयसी ।
वद त्वम् सत्वरम् मह्यम्, स्वस्य दुःखस्य कारणम् ॥

शब्दार्थ—

कथम्	३.	क्यों	वद	१५.	बताओ
रोदिषि	४.	रो रहे हो	त्वम्	९.	तुम
विप्र	१.	हे ब्राह्मण !	सत्वरम्	१४.	शीघ्र
त्वम्	२.	तुम	मह्यम्	१०.	मुझे
का	६.	कौन सी	स्वस्य	११.	अपने
ते	५.	तुम्हें	दुःखस्य	१२.	दुःख का
चिन्ता	८.	चिन्ता (है)	कारणम् ॥	१३.	कारण
बलीयसी ।	७.	बड़ी			

श्लोकार्थ—हे ब्राह्मण ! तुम क्यों रो रहे हो ? तुम्हें कौन सी बड़ी चिन्ता है ? तुम मुझे अपने दुःख का कारण शीघ्र बताओ ।

सप्तविंशः श्लोकः

ब्राह्मण उवाच—

> किं ब्रवीमि ऋषे दुःखं पूर्वपापेन सञ्चितम् ।
> मदीया पूर्वजास्तोयं कवोष्णमुपभुञ्जते ॥२७॥

पदच्छेद—

> किम् ब्रवीमि ऋषे दुःखम्, पूर्व पापेन संचितम् ।
> मदीयाः पूर्वजाः तोयम्, कवोष्णम् उपभुञ्जते ॥

शब्दार्थ—

किम्	६.	क्या	संचितम् ।	४.	इकट्ठे किये गये
ब्रवीमि	७.	कहूँ	मदीयाः	८.	मेरे
ऋषे	१.	हे महात्मन् ! (मैं)	पूर्वजाः	९.	पितर गण
दुःखम्	५.	दुःख को	तोयम्	१०.	(तर्पण के) जल को
पूर्व	२.	पूर्व जन्मों के	कवोष्णम्	११.	(अपनी आह से) कुछ गर्म करके
पापेन	३.	पाप से	उपभुञ्जते ॥	१२.	पीते हैं

श्लोकार्थ—हे महात्मन् ! मैं पूर्व जन्मों के पाप से इकट्ठे किये गये दुःख को क्या कहूँ । मेरे पितरगण तर्पण के जल को अपनी आह से कुछ गर्म करके पीते हैं ।

अष्टाविंशः श्लोकः

> मद्दत्तं नैव गृह्णन्ति प्रीत्या देवा द्विजातयः ।
> प्रजादुःखेन शून्योऽहं प्राणांस्त्यक्तुमिहागतः ॥२८॥

पदच्छेद—

> मद् दत्तम् न एव गृह्णन्ति, प्रीत्या देवाः द्विजातयः ।
> प्रजा दुःखेन शून्यः अहम्, प्राणान् त्यक्तुम् इह आगतः ॥

शब्दार्थ—

मद्	४.	मेरे द्वारा	प्रजा	९.	(अतः) संतान के
दत्तम्	५.	दी गयी (वस्तु) को	दुःखेन	१०.	अभाव से
न	७.	नहीं	शून्यः	११.	दुःखी
एव	२.	तथा	अहम्	१२.	मैं
गृह्णन्ति	८.	स्वीकार करते हैं	प्राणान्	१३.	प्राणों को
प्रीत्या	६.	प्रसन्नता-पूर्वक	त्यक्तुम्	१४.	छोड़ने के लिए
देवाः	१.	देवता	इह	१५.	यहाँ
द्विजातयः ।	३.	ब्राह्मण गण	आगतः ॥	१६.	आया हूँ

श्लोकार्थ—देवता तथा ब्राह्मण-गण मेरे द्वारा दी गयी वस्तु को प्रसन्नता-पूर्वक स्वीकार नहीं करते हैं । अतः संतान के अभाव से दुःखी मैं प्राणों को छोड़ने के लिये यहाँ आया हूँ ।

एकोनत्रिंशः श्लोकः

धिग्जीवितं प्रजाहीनं धिग्गृहं च प्रजां विना ।
धिग्धनं चानपत्यस्य धिक्कुलं संततिं विना ॥२९॥

पदच्छेद—

धिक् जीवितम् प्रजा हीनम्, धिक् गृहम् च प्रजाम् विना ।
धिक् धनम् च अनपत्यस्य, धिक् कुलम् संततिम् विना ॥

शब्दार्थ—

धिक्	३.	धिक्कार (है)	धिक्	११.	धिक्कार (है)
जीवितम्	२.	जीवन को	धनम्	१०.	सम्पत्ति को
प्रजा, हीनम्	१.	संतान से, रहित	च	१२.	तथा
धिक्	८.	धिक्कार है	अनपत्यस्य	९.	संतान के अभाव में
गृहम्	७.	घर को	धिक्	१६.	धिक्कार (है)
च	४.	और	कुलम्	१५.	वंश को (भी)
प्रजाम्	५.	संतान के	संततिम्	१३.	संतान के
विना ।	६.	विना	विना ॥	१४.	विना

श्लोकार्थ—संतान से रहित जीवन को धिक्कार है और संतान के विना घर को धिक्कार है । संतान के अभाव में सम्पत्ति को धिक्कार है तथा संतान के विना वंश को भी धिक्कार है ।

त्रिंशः श्लोकः

पाल्यते या मया धेनुः सा वन्ध्या सर्वथा भवेत् ।
यो मया रोपितो वृक्षः सोऽपि वन्ध्यत्वमाश्रयेत् ॥३०॥

पदच्छेद—

पाल्यते या मया धेनुः, सा वन्ध्या सर्वथा भवेत् ।
यः मया रोपितः वृक्षः, सः अपि वन्ध्यत्वम् आश्रयेत् ॥

शब्दार्थ—

पाल्यते	४.	पालन किया है	यः	१०.	जो
या	२.	जिस	मया	९.	मैंने
मया	१.	मैंने	रोपितः	१२.	लगाया है
धेनुः	३.	गाय का	वृक्षः	११.	वृक्ष
सा	५.	वह	सः	१३.	वह
वन्ध्या	७.	बाँझ	अपि	१४.	भी
सर्वथा	६.	बिल्कुल	वन्ध्यत्वम्	१५.	फल नहीं
भवेत् ।	८.	हो गयी है	आश्रयेत् ॥	१६.	देता है

श्लोकार्थ—मैंने जिस गाय का पालन किया है; वह बिल्कुल बाँझ हो गयी है । मैंने जो वृक्ष लगाया है, वह भी फल नहीं देता है ।

एकत्रिंशः श्लोकः

यत्फलं मद्गृहायातं तच्च शीघ्रं विनश्यति ।
निर्भाग्यस्यानपत्यस्य किमतो जीवितेन मे ॥३१॥

पदच्छेद—

यद् फलम् मद् गृह आयातम्, तद् च शीघ्रम् विनश्यति ।
निर्भाग्यस्य अनपत्यस्य, किम् अतः जीवितेन मे ॥

शब्दार्थ—

यद्	१. जो		विनश्यति ।	८. नष्ट हो जाता है
फलम्	२. फल		निर्भाग्यस्य	१०. अभागे (और)
मद्, गृह	३. मेरे, घर		अनपत्यस्य	११. संतान-हीन
आयातम्	४. आता है		किम्	१४. क्या (लाभ है)
तद्	५. वह		अतः	९. इसलिये
च	६. भी		जीवितेन	१३. जीवन से
शीघ्रम्	७. तत्काल		मे ॥	१२. मेरे

श्लोकार्थ—जो फल मेरे घर आता है; वह भी तत्काल नष्ट हो जाता है । इसलिये अभागे और संतान-हीन मेरे जीवन से क्या लाभ है ।

द्वात्रिंशः श्लोकः

इत्युक्त्वा स रुरोदोच्चैस्तत्पार्श्वं दुःखपीडितः ।
तदा तस्य यतेश्चित्ते करुणाभूद्गरीयसी ॥३२॥

पदच्छेद—

इति उक्त्वा सः रुरोद उच्चैः, तद् पार्श्वम् दुःख पीडितः ।
तदा तस्य यतेः चित्ते, करुणा अभूत् गरीयसी ॥

शब्दार्थ—

इति	४. यह		पीडितः ।	२. व्याकुल
उक्त्वा	५. कहकर		तदा	१०. उस समय
सः	३. वह (आत्मदेव)		तस्य	११. उस
रुरोद	९. रोने लगा		यतेः	१२. संन्यासी के
उच्चैः	८. जोर सें		चित्ते	१३. हृदय में
तद्	६. उस (संन्यासी) के		करुणा	१५. दया
पार्श्वम्	७. पास		अभूत्	१६. उत्पन्न हुई
दुःख	१. संकट से		गरीयसी ॥	१४. बड़ी

श्लोकार्थ—संकट से व्याकुल वह आत्मदेव यह कहकर उस संन्यासी के पास जोर से रोने लगा । उस समय उस संन्यासी के हृदय में बड़ी दया उत्पन्न हुई ।

त्रयस्त्रिंशः श्लोकः

तद्भालाक्षरमालां च वाचयामास योगवान् ।
सर्वं ज्ञात्वा यतिः पश्चाद्विप्रमूचे सविस्तरम् ॥३३॥

पदच्छेद—

तद् भाल अक्षर मालाम् च, वाचयामास योगवान् ।
सर्वम् ज्ञात्वा यतिः पश्चात्, विप्रम् ऊचे सविस्तरम् ॥

शब्दार्थ—

तद्, भाल	४.	उस (आत्मदेव) के, ललाट की	**ज्ञात्वा**	९.	जानकर
अक्षरमालाम्	५.	वर्णमाला को	**यतिः**	३.	संन्यासी जी ने
च	७.	और	**पश्चात्**	१.	तदनन्तर
वाचयामास	६.	पढ़ा	**विप्रम्**	१०.	ब्राह्मण से
योगवान् ।	२.	योगशास्त्र के जानकार	**ऊचे**	१२	कहा
सर्वम्	८.	सब कुछ	**सविस्तरम् ॥**	११.	विस्तार-पूर्वक

श्लोकार्थ—तदनन्तर योगशास्त्र के जानकार संन्यासी जी ने उस आत्मदेव के ललाट की वर्णमाला को पढ़ा और सब कुछ जानकर ब्राह्मण से विस्तार-पूर्वक कहा ।

चतुस्त्रिंशः श्लोकः

यतिरुवाच— **मुञ्चाज्ञानं प्रजारूपं बलिष्ठा कर्मणो गतिः ।**
विवेकं तु समासाद्य त्यज संसारवासनाम् ॥३४॥

पदच्छेद—

मुञ्च अज्ञानम् प्रजारूपम्, बलिष्ठा कर्मणः गतिः ।
विवेकम् तु समासाद्य, त्यज संसार वासनाम् ॥

शब्दार्थ—

मुञ्च	३.	छोड़ दो	**विवेकम्**	८.	उत्तम ज्ञान को
अज्ञानम्	२.	मोह को	**तु**	७.	अतः
प्रजारूपम्	१.	सन्तान पाने के	**समासाद्य**	९.	पाकर
बलिष्ठा	६.	बड़ा बलवान् (होता है)	**त्यज**	१२.	त्याग कर दो
कर्मणः	४.	कर्मों का	**संसार**	१०.	संसार की
गतिः ।	५.	फल	**वासनाम् ॥**	११.	कामना का

श्लोकार्थ—संतान पाने के मोह को छोड़ दो । कर्मों का फल बड़ा बलवान् होता है । अतः उत्तम ज्ञान को पाकर संसार की कामना का त्याग कर दो ।

पञ्चत्रिंशः श्लोकः

श्रृणु विप्र मया तेऽद्य प्रारब्धं तु विलोकितम् ।
सप्तजन्मावधि तव पुत्रो नैव च नैव च ॥३५॥

पदच्छेद—

श्रृणु विप्र मया ते अद्य, प्रारब्धम् तु विलोकितम् ।
सप्त जन्म अवधि तव, पुत्रः न एव च न एव च ॥

शब्दार्थ—

श्रृणु	२.	सुनो	सप्त	९.	सात
विप्र	१.	हे ब्राह्मण (तुम)	जन्म	१०.	जन्मों
मया	४.	मैंने	अवधि	११.	तक
ते	५.	तुम्हारे	तव	१२.	तुम्हारे
अद्य	३.	आज	पुत्रः	१४.	पुत्र
प्रारब्धम्	६.	भाग्य को	नैव	१५.	नहीं (है)
तु	८.	जिसके अनुसार	च	१३.	भाग्य में
विलोकितम् ।	७.	देखा है	नैव	१६.	नहीं
			च ॥	१७.	है

श्लोकार्थ—हे ब्राह्मण ! तुम सुनो । आज मैंने तुम्हारे भाग्य को देखा है; जिसके अनुसार सात जन्मों तक तुम्हारे भाग्य में पुत्र नहीं है—नहीं है ।

षट्त्रिंशः श्लोकः

सन्ततेः सगरो दुःखमवापाङ्गः पुरा तथा ।
रे मुञ्चाद्य कुटुम्बाशां संन्यासे सर्वथा सुखम् ॥३६॥

पदच्छेद—

सन्ततेः सगरः दुःखम्, अवाप आङ्गः पुरा तथा ।
रे मुञ्च अद्य कुटुम्ब आशाम्, संन्यासे सर्वथा सुखम् ॥

शब्दार्थ—

सन्ततेः	४.	सन्तान से	रे	८.	हे (ब्राह्मण) !
सगरः	३.	सगर ने	मुञ्च	११.	छोड़ दो
दुःखम्	५.	कष्ट	अद्य	९.	अब (तुम)
अवाप	६.	पाया था	कुटुम्ब, आशाम्	१०.	पुत्र की, आशा
आङ्गः	२.	अंग देश के राजा	संन्यासे	१२.	संन्यास में
पुरा	१.	सत् युग में	सर्वथा	१३.	सब प्रकार
तथा ।	७.	अतः	सुखम् ॥	१४.	सुख (है)

श्लोकार्थ—सत् युग में अंग देश के राजा सगर ने सन्तान ने कष्ट पाया था; अत, हे ब्राह्मण ! अब तुम पुत्र की आशा छोड़ दो । संन्यास में सब प्रकार सुख है ।

सप्तत्रिंशः श्लोकः

ब्राह्मण उवाच—

विवेकेन भवेत्किं मे पुत्रं देहि बलादपि ।
नो चेत्त्यजाम्यहं प्राणांस्त्वदग्रे शोकमूर्च्छितः ॥३७॥

पदच्छेद—

विवेकेन भवेत् किम् मे, पुत्रम् देहि बलात् अपि ।
नो चेत् त्यजामि अहम् प्राणान्, त्वद् अग्रे शोक मूर्च्छितः ॥

शब्दार्थ—

विवेकेन	१.	वैराग्य के ज्ञान से	नो चेत्	८.	नहीं तो
भवेत्	४.	होगा (मुझे)	त्यजामि	१४.	छोड़ रहा हूँ
किम्	३.	क्या	अहम्	११.	मैं
मे	२.	मेरा	प्राणान्	१३.	प्राणों को
पुत्रम्	६.	पुत्र	त्वद्, अग्रे	१२.	आपके, आगे
देहि	७.	देवें	शोक	९.	चिन्ता से
बलात् अपि ।	५.	किसी भी प्रकार से	मूर्च्छितः ॥	१०.	मूर्च्छित

श्लोकार्थ—वैराग्य के ज्ञान से मेरा क्या होगा ? मुझे किसी भी प्रकार से पुत्र देवें, नहीं तो चिन्ता से मूर्च्छित मैं आपके आगे प्राणों को छोड़ रहा हूँ ।

अष्टात्रिंशः श्लोकः

पुत्रादिसुखहीनोऽयं संन्यासः शुष्क एव हि ।
गृहस्थः सरसो लोके पुत्रपौत्रसमन्वितः ॥३८॥

पदच्छेद—

पुत्र आदि सुख हीनः अयम्, संन्यासः शुष्कः एव हि ।
गृहस्थः सरसः लोके, पुत्र पौत्र समन्वितः ॥

शब्दार्थ—

पुत्र, आदि	२.	पुत्र, इत्यादि (विषयों) के	हि ।	११.	ही
सुख, हीनः	३.	सुख से, रहित	गृहस्थः	१०.	गृहस्थाश्रम
अयम्	४.	यह	सरसः	१२.	मधुर (है)
संन्यासः	५.	वैराग्य-मार्ग	लोके	१.	संसार में
शुष्कः	६.	नीरस (है)	पुत्र पौत्र	८.	पुत्र-पौत्र से
एव	७.	किन्तु	समन्वितः ॥	९.	भरा-पूरा

श्लोकार्थ—संसार में पुत्र इत्यादि विषयों के सुख से रहित यह वैराग्य-मार्ग नीरस है; किन्तु पुत्र-पौत्र से भरा-पूरा गृहस्थाश्रम ही मधुर है ।

एकोनचत्वारिंशः श्लोकः

इति विप्राग्रहं दृष्ट्वा प्राब्रवीत्स तपोधनः।
चित्रकेतुर्गतः कष्टं विधिलेखविमार्जनात् ॥३९॥

पदच्छेद—

इति विप्र आग्रहम् दृष्ट्वा, प्राब्रवीत् सः तपोधनः।
चित्रकेतुः गतः कष्टम्, विधि लेख विमार्जनात् ॥

शब्दार्थ—

इति	१.	इस प्रकार	तपोधनः।	३.	तपस्वी जी
विप्र	४.	ब्राह्मण के	चित्रकेतुः	८.	चित्रगुप्त (भी)
आग्रहम्	५.	हठ को	गतः	१२.	पड़ गया
दृष्ट्वा	६.	देखकर	कष्टम्	११.	संकट में
प्राब्रवीत्	७.	बोले (इधर)	विधि, लेख	९.	ब्रह्मा की, लिखावट को
सः	२.	वे	विमार्जनात् ॥	१०.	मिटाने के कारण

श्लोकार्थ—इस प्रकार वे तपस्वी जी ब्राह्मण के हठ को देखकर बोले। इधर चित्रगुप्त भी ब्रह्मा की लिखावट को मिटाने के कारण संकट में पड़ गया।

चत्वारिंशः श्लोकः

न यास्यसि सुखं पुत्राद्यथा दैवहतोद्यमः।
अतो हठेन युक्तोऽसि ह्यर्थिनं किं वदाम्यहम् ॥४०॥

पदच्छेद—

न यास्यसि सुखम् पुत्रात्, यथा दैव हत उद्यमः।
अतः हठेन युक्तः असि, हि अर्थिनम् किम् वदामि अहम् ॥

शब्दार्थ—

न	६.	नहीं	हठेन	९.	हठ के
यास्यसि	७.	पावोगे	युक्तः	१०.	अधीन
सुखम्	५.	सुख	असि	११.	हो
पुत्रात्	४.	पुत्र से	हि	८.	क्योंकि (तुम)
यथा	३.	समान (तुम)	अर्थिनम्	१४.	याचक से
दैव, हत	१.	दुर्भाग्य से, नष्ट हुये	किम्	१५.	क्या
उद्यमः।	२.	पुरुषार्थ के	वदामि	१६.	कहूँ
अतः	१२.	अतः	अहम् ॥	१३.	मैं

श्लोकार्थ—दुर्भाग्य से नष्ट हुये पुरुषार्थ के समान तुम पुत्र से सुख नहीं पावोगे। क्योंकि तुम हठ के अधीन हो; अतः मैं याचक से क्या कहूँ।

एकचत्वारिंशः श्लोकः

तस्याग्रहं समालोक्य फलमेकं स दत्तवान् ।
इदं भक्षय पत्न्या त्वं ततः पुत्रो भविष्यति ॥४१॥

पदच्छेद—

तस्य आग्रहम् समालोक्य, फलम् एकम् सः दत्तवान् ।
इदम् भक्षय पत्न्या त्वम्, ततः पुत्रः भविष्यति ॥

शब्दार्थं—

तस्य	२.	आत्मदेव के	इदम्	९.	इसे
आग्रहम्	३.	हठ को	भक्षय	११.	खिला दो
समालोक्य	४.	देखकर (उसे)	पत्न्या	१०.	(अपनी) पत्नी को
फलम्	६.	फल	त्वम्	८.	तुम
एकम्	५.	एक	ततः	१२.	उससे (तुम्हें)
सः	१.	उस संन्यासी ने	पुत्रः	१३.	पुत्र
दत्तवान् ।	७.	दिया (और कहा कि)	भविष्यति ॥	१४.	होगा

श्लोकार्थं—उस संन्यासी ने आत्मदेव के हठ को देखकर उसे एक फल दिया और कहा कि तुम इसे अपनी पत्नी को खिला दो । उससे तुम्हें पुत्र होगा ।

द्विचत्वारिंशः श्लोकः

सत्यं शौचं दया दानमेकभक्तं तु भोजनम् ।
वर्षावधि स्त्रिया कार्यं तेन पुत्रोऽतिनिर्मलः ॥४२॥

पदच्छेद—

सत्यं शौचम् दया दानम्, एकभक्तम् तु भोजनम् ।
वर्ष अवधि स्त्रिया कार्यम्, तेन पुत्रः अतिनिर्मलः ॥

शब्दार्थं—

सत्यम्	४.	सत्य-भाषण	वर्ष	२.	एक वर्ष
शौचम्	५.	पवित्रता	अवधि	३.	तक
दया	६.	करुणा	स्त्रिया	१.	स्त्री को
दानम्	७.	दान	कार्यम्	११.	करना चाहिये
एकभक्तम्	९.	एक समय	तेन	१२.	उससे
तु	८.	तथा	पुत्रः	१३.	बालक
भोजनम् ।	१०.	भोजन	अतिनिर्मलः ॥	१४.	बड़ा सात्त्विक (होगा)

श्लोकार्थं—स्त्री को एक वर्ष तक सत्य-भाषण, पवित्रता, करुणा, दान तथा एक समय भोजन करना चाहिये, उससे बालक बड़ा सात्त्विक होगा ।

त्रिचत्वारिंशः श्लोकः

एवमुक्त्वा ययौ योगी विप्रस्तु गृहमागतः ।
पत्न्याः पाणौ फलं दत्त्वा स्वयं यातस्तु कुत्रचित् ॥४३॥

पदच्छेद—

एवम् उक्त्वा ययौ योगी, विप्रः तु गृहम् आगतः ।
पत्न्याः पाणौ फलम् दत्त्वा, स्वयम् यातः तु कुत्रचित् ॥

शब्दार्थ—

एवम्	१.	ऐसा	पत्न्याः	१०.	(अपनी) स्त्री के
उक्त्वा	२.	कहकर	पाणौ	११.	हाथ में
ययौ	४.	चले गये	फलम्	१२.	फल
योगी	३.	महात्मा जी	दत्त्वा	१३.	देकर
विप्रः	६.	ब्राह्मण (आत्मदेव)	स्वयम्	१४.	खुद
तु	५.	तदनन्तर	यातः	१६.	चला गया
गृहम्	७.	घर	तु	९.	और
आगतः ।	८.	लौट आया	कुत्रचित् ॥	१५.	कहीं

श्लोकार्थ—ऐसा कहकर महात्मा जी चले गये । तदनन्तर ब्राह्मण आत्मदेव घर लौट आया और अपनी स्त्री के हाथ में फल देकर खुद कहीं चला गया ।

चतुश्चत्वारिंशः श्लोकः

तरुणी कुटिला तस्य सख्यग्रे च रुरोद ह ।
अहो चिन्ता ममोत्पन्ना फलं चाहं न भक्षये ॥४४॥

पदच्छेद—

तरुणी कुटिला तस्य, सखी अग्रे च रुरोद ह ।
अहो चिन्ता मम उत्पन्ना, फलम् च अहम् न भक्षये ॥

शब्दार्थ—

तरुणी	४.	युवती पत्नी	चिन्ता	११.	चिन्ता
कुटिला	३.	धूर्त (एवं)	मम	१०.	मुझे
तस्य	२.	उसकी	उत्पन्ना	१२.	हो गयी है
सखी, अग्रे	५.	सहेली के, सामने	फलम्	१४.	फल
च	१.	तदनन्तर	च	८.	और (कहने लगी कि)
रुरोद	७.	रोने लगी	अहम्	१३.	मैं
ह ।	६.	बड़े जोर से	न	१५.	नहीं
अहो	९.	अरे !	भक्षये ॥	१६.	खाऊँगी

श्लोकार्थ—तदनन्तर उसकी धूर्त एवं युवती पत्नी सहेली के समाने बड़े जोर से रोने लगी और कहने लगी कि अरे ! मुझे चिन्ता हो गयी है । मैं फल नहीं खाऊँगी ।

पञ्चचत्वारिंशः श्लोकः

फलभक्षेण गर्भः स्याद्गर्भेणोदरवृद्धिता ।
स्वल्पभक्षं ततोऽशक्तिर्गृहकार्यं कथं भवेत् ॥४५॥

पदच्छेद—

फल भक्षेण गर्भः स्यात्, गर्भेण उदर वृद्धिता ।
स्वल्प भक्षम् ततः अशक्तिः, गृह कार्यम् कथम् भवेत् ॥

शब्दार्थ—

फल, भक्षेण	१. फल, खाने से		भक्षम्	८. भोजन (होगा)
गर्भः	२. गर्भ		ततः	९. उससे
स्यात्	३. रहेगा		अशक्तिः	१०. कमजोरी (होगी फिर)
गर्भेण	४. गर्भ से		गृह	११. घर का
उदर	५. पेट		कार्यम्	१२. काम
वृद्धिता ।	६. बढ़ जायेगा		कथम्	१३. कैसे
स्वल्प	७. थोड़ा		भवेत् ॥	१४. होगा

श्लोकार्थ—फल खाने से गर्भ रहेगा, गर्भ से पेट बढ़ जायेगा, थोड़ा भोजन होगा, उससे कमजोरी होगी फिर घर का काम कैसे होगा ।

षट्चत्वारिंशः श्लोकः

दैवाद् घाटी व्रजेद्ग्रामे पलायेद्गर्भिणी कथम् ।
शुकवन्निवसेद्गर्भस्तं कुक्षेः कथमुत्सृजेत् ॥४६॥

पदच्छेद—

दैवात् घाटी व्रजेत् ग्रामे, पलायेत् गर्भिणी कथम् ।
शुकवत् निवसेत् गर्भः, तम् कुक्षेः कथम् उत्सृजेत् ॥

शब्दार्थ—

दैवात्	२. अचानक		शुकवत्	९. शुकदेव जी के समान (दीर्घ काल तक)
घाटी	३. आक्रमण		निवसेत्	१०. ठहर जाय (तो)
व्रजेत्	४. हो जाय (तो)		गर्भः	८. (वह) गर्भ
ग्रामे	१. गाँव में		तम्	११. उसे
पलायेत्	७. भाग सकेगी (तथा यदि)		कुक्षेः	१३. पेट से
गर्भिणी	५. गर्भिणी (स्त्री)		कथम्	१२. कैसे
कथम् ।	६. कैसे		उत्सृजेत् ॥	१४. बाहर किया जायेगा

श्लोकार्थ—गाँव में अचानक आक्रमण हो जाय तो गर्भिणी स्त्री कैसे भाग सकेगी तथा यदि वह गर्भ शुकदेव जी के समान दीर्घ काल तक ठहर जाय तो उसे कैसे पेट से बाहर किया जायेगा ?

सप्तचत्वारिंशः श्लोकः

तिर्यक्चेदागतो गर्भस्तदा मे मरणं भवेत्।
प्रसूतौ दारुणं दुःखं सुकुमारी कथं सहे ॥४७॥

पदच्छेद---

तिर्यक् चेत् आगतः गर्भः, तदा मे मरणम् भवेत्।
प्रसूतौ दारुणम् दुःखम्, सुकुमारी कथम् सहे ॥

शब्दार्थ---

तिर्यक्	३. तिरछे	भवेत्।	८. हो जायेगी (इस प्रकार)
चेत्	१. यदि	प्रसूतौ	९. प्रसव के
आगतः	४. आगया	दारुणम्	१०. भयंकर
गर्भः	२. बच्चा	दुःखम्	११. कष्ट को
तदा	५. तो	सुकुमारी	१२. अत्यन्त कोमल (मैं)
मे	६. मेरी	कथम्	१३. कैसे
मरणम्	७. मृत्यु	सहे ॥	१४. सह सकूंगी

श्लोकार्थ --यदि बच्चा तिरछे आगया तो मेरी मृत्यु हो जायेगी। इस प्रकार प्रसव के भयंकर कष्ट को अत्यन्त कोमल मैं कैसे सह सकूंगी।

अष्टचत्वारिंशः श्लोकः

मन्दायां मयि सर्वस्वं ननान्दा संहरेत्तदा।
सत्यशौचादिनियमो दुराराध्यः स दृश्यते ॥४८॥

पदच्छेद---

मन्दायाम् मयि सर्व स्वम्, ननान्दा संहरेत् तदा।
सत्य शौच आदि नियमः, दुराराध्यः सः दृश्यते ॥

शब्दार्थ---

मन्दायाम्	२. दुर्बल हो जाने पर	सत्य शौच	७. सत्य और शुद्धि
मयि	१. मेरे	आदि	८. इत्यादि का
सर्व, स्वम्	४. सारा, धन	नियमः	१०. नियम (भी)
ननान्दा	३. ननद	दुराराध्यः	११. कठिन पालनीय
संहरेत्	५. उठा ले जायेगी	सः	९. वह
तदा।	६. उस समय	दृश्यते ॥	१२. दिखाई देता है

श्लोकार्थ---मेरे दुर्बल हो जाने पर ननद सारा धन उठा ले जायेगी। उस समय सत्य और शुद्धि इत्यादि का वह नियम भी कठिन पालनीय दिखाई देता है।

एकोनपञ्चाशः श्लोकः

लालने पालने दुःखं प्रसूतायाश्च वर्तते।
वन्ध्या वा विधवा नारी सुखिनी चेति मे मतिः ॥४९॥

पदच्छेद—

लालने पालने दुःखम्, प्रसूतायाः च वर्तते।
वन्ध्या वा विधवा नारी, सुखिनी च इति मे मतिः ॥

शब्दार्थ—

लालने	३.	(बच्चे के) लालन	वन्ध्या, वा	९.	बाँझ, अथवा
पालने	४.	पालन में	विधवा नारी	१०.	विधवा स्त्री
दुःखम्	५.	कष्ट	सुखिनी	१२.	सुखी (है)
प्रसूतायाः	२.	जच्चे को	च	११.	ही
च	१.	तथा	इति	७.	अतः
वर्तते।	६.	होता है	मे, मतिः ॥	८.	मेरे, विचार से

श्लोकार्थ—तथा जच्चे को बच्चे के लालन-पालन में कष्ट होता है; अतः मेरे विचार से बाँझ अथवा विधवा स्त्री ही सुखी है।

पञ्चाशः श्लोकः

एवं कुतर्कयोगेन तत्फलं नैव भक्षितम्।
पत्या पृष्टं फलं भुक्तं भुक्तं चेति तयेरितम् ॥५०॥

पदच्छेद—

एवम् कुतर्क योगेन, तत् फलम् न एव भक्षितम्।
पत्या पृष्टम् फलम् भुक्तम्, भुक्तम् च इति तया ईरितम् ॥

शब्दार्थ—

एवम्	१.	इस प्रकार	पृष्टम्	१२.	पूछने पर
कुतर्क	२.	कुतर्क	फलम्	१०.	फल
योगेन	३.	उठने से (धुन्धुली ने)	भुक्तम्	११.	खाया (यह)
तत्	४.	उस	भुक्तम्	१४.	खा लिया
फलम्	५.	फल को	च	८.	तथा
न एव	६.	नहीं	इति	१५.	ऐसा
भक्षितम्।	७.	खाया	तया	१३.	उसने
पत्या	९.	पति के द्वारा	ईरितम् ॥	१६.	उत्तर दे दिया

श्लोकार्थ—इस प्रकार कुतर्क उठने से धुन्धुली ने उस फल को नहीं खाया तथा पति के द्वारा 'फल खाया' यह पूछने पर उसने 'खा लिया' ऐसा उत्तर दे दिया।

एकपञ्चाशः श्लोकः

एकदा भगिनी तस्यास्तद्गृहं स्वेच्छयाऽऽगता ।
तदग्रे कथितं सर्वं चिन्तेयं महती हि मे ॥५१॥

पदच्छेद—

एकदा भगिनी तस्याः, तद् गृहम् स्वेच्छया आगता ।
तद् अग्रे कथितम् सर्वम् , चिन्ता इयम् महती हि मे ॥

शब्दार्थ—

एकदा	१. एक समय	कथितम्	९. कह दी
भगिनी	३. बहिन	सर्वम्	८. सारी (बात)
तस्याः	२. उसकी	चिन्ता	१४. कष्ट (है)
तद् , गृहम्	५. उसके, घर	इयम्	१२. यह
स्वेच्छया	४. अपनी इच्छा से	महती	१३. बहुत बड़ा
आगता ।	६. आई (और)	हि	१०. कि
तद्, अग्रे	७. उसके, सामने (धुन्धुली ने)	मे ॥	११. मुझे

श्लोकार्थ—एक समय उसकी बहिन अपनी इच्छा से उसके घर आई और उसके सामने धुन्धुली ने सारी बात कह दी कि मुझे यह बहुत बड़ा कष्ट है ।

द्विपञ्चाशः श्लोकः

दुर्बला तेन दुःखेन ह्यनुजे करवाणि किम् ।
साब्रवीन्मम गर्भोऽस्ति तं दास्यामि प्रसूतितः ॥५२॥

पदच्छेद—

दुर्बला तेन दुःखेन, हि अनुजे करवाणि किम् ।
सा अब्रवीत् मम गर्भः अस्ति, तम् दास्यामि प्रसूतितः ॥

शब्दार्थ—

दुर्बला	५. दुबली (मैं)	अब्रवीत्	९. बोली (कि)
तेन	२. उस	मम	१०. मुझे
दुःखेन	३. दुःख से	गर्भः	११. गर्भ
हि	४. ही	अस्ति	१२. है
अनुजे	१. अरी बहिन !	तम्	१४. उसे
करवाणि	७. करूँ	दास्यामि	१५. तुम्हें दे दूँगी
किम् ।	६. क्या	प्रसूतितः॥	१३. प्रसव के बाद
सा	८. (उसकी) बहिन		

श्लोकार्थ—अरी बहिन ! उस दुःख से ही दुबली मैं क्या करूँ ? उसकी बहिन बोली कि मुझे गर्भ है, प्रसव के बाद उसे तुम्हें दे दूँगी ।

त्रिपञ्चाशः श्लोकः

तावत्कालं सगर्भेव गुप्ता तिष्ठ गृहे सुखम्।
वित्तं त्वं मत्पतेर्यच्छ स ते दास्यति बालकम् ।।५३।।

पदच्छेद—

तावत् कालम् सगर्भा इव, गुप्ता तिष्ठ गृहे सुखम् ।
वित्तम् त्वम् मत् पतेः यच्छ, सः ते दास्यति बालकम् ॥

शब्दार्थ—

तावत् कालम	१.	तब तक	वित्तम्	१०.	धन
सगर्भा	२.	गर्भिणी के	त्वम्	८.	तुम
इव	३.	समान	मत्, पतेः	९.	मेरे, पतिदेव को
गुप्ता	५.	छिपकर	यच्छ	११.	दे देना
तिष्ठ	७.	रहो	सः	१२.	वे
गृहे	४.	घर में	ते	१३.	तुम्हें
सुखम् ।	६.	आराम से	दास्यति	१५.	दे देंगे
			बालकम् ॥	१४.	(गर्भ का) बच्चा

श्लोकार्थ—तब तक गर्भिणी के समान घर में छिपकर आराम से रहो। तुम मेरे पतिदेव को धन दे देना; वे तुम्हें गर्भ का बच्चा दे देंगे।

चतुःपञ्चाशः श्लोकः

षाण्मासिको मृतो बाल इति लोको वदिष्यति ।
तं बालं पोषयिष्यामि नित्यमागत्य ते गृहे ।।५४।।

पदच्छेद—

षाण्मासिकः मृतः बालः, इति लोकः वदिष्यति ।
तम् बालम् पोषयिष्यामि, नित्यम् आगत्य ते गृहे ॥

शब्दार्थ—

षाण्मासिकः	५.	छः महीने का होकर	तम्	१०.	उस
मृतः	६.	मर गया (तथा मैं)	बालम्	११.	बालक का
बालः	४.	(मेरा) बालक	पोषयिष्यामि	१२.	पोषण किया करूँगी
इति	२.	ऐसा	नित्यम्	८.	प्रतिदिन
लोकः	१.	लोग	आगत्य	९.	आकर
वदिष्यति ।	३.	कहेंगे (कि)	ते, गृहे ॥	७.	तुम्हारे, घर

श्लोकार्थ—लोग ऐसा कहेंगे कि मेरा बालक छः महीने का होकर मर गया तथा मैं तुम्हारे घर प्रतिदिन आकर उस बालक का पोषण किया करूँगी।

पञ्चपञ्चाशः श्लोकः

फलमर्पय धेन्वै त्वं परीक्षार्थं तु साम्प्रतम् ।
तत्तदाचरितं सर्वं तथैव स्त्रीस्वभावतः ॥५५॥

पदच्छेद—

फलम् अर्पय धेन्वै त्वम्, परीक्षार्थम् तु साम्प्रतम् ।
तद् तदा आचरितम् सर्वम्, तथैव स्त्री स्वभावतः ॥

शब्दार्थ—

फलम्	५.	फल	तद्	११.	वह
अर्पय	७.	खिला दो	तदा	८.	उस समय (उसने)
धेन्वै	६.	गाय को	आचरितम्	१४.	किया
त्वम्	३.	तुम	सर्वम्	१२.	सब (काम)
परीक्षार्थम्	४.	परीक्षा करने के लिए	तथैव	१३.	उसी प्रकार से
तु	१.	तथा	स्त्री	९.	स्त्री
साम्प्रतम् ।	२.	इस समय	स्वभावतः ॥	१०.	स्वभाव के कारण

श्लोकार्थ—तथा इस समय तुम परीक्षा करने के लिए फल गाय को खिला दो। उस समय उसने स्त्री स्वभाव के कारण वह सब काम उसी प्रकार से किया।

षट्पञ्चाशः श्लोकः

अथ कालेन सा नारी प्रसूता बालकं तदा ।
आनीय जनको बालं रहस्ये धुन्धुलीं ददौ ॥५६॥

पदच्छेद—

अथ कालेन सा नारी, प्रसूता बालकम् तदा ।
आनीय जनकः बालम्, रहस्ये धुन्धुलीम् ददौ ॥

शब्दार्थ—

अथ	१.	तदनन्तर	आनीय	१०.	लाकर
कालेन	२.	समय आने पर	जनकः	८.	(उसके) पिता ने
सा	३.	उस	बालम्	९.	बच्चे को
नारी	४.	स्त्री ने	रहस्ये	११.	एकान्त में
प्रसूता	६.	जन्म दिया	धुन्धुलीम्	१२.	धुन्धुली को
बालकम्	५.	बालक को	ददौ ॥	१३.	दे दिया
तदा ।	७.	उस समय			

श्लोकार्थ—तदनन्तर समय आने पर उस स्त्री ने बालक को जन्म दिया। उस समय उसके पिता ने बच्चे को लाकर एकान्त में धुन्धुली को दे दिया।

सप्तपञ्चाशः श्लोकः

तया च कथितं भर्त्रे प्रसूतः सुखमर्भकः ।
लोकस्य सुखमुत्पन्नमात्मदेवप्रजोदयात् ॥५७॥

पदच्छेद—

तया च कथितम् भर्त्रे, प्रसूतः सुखम् अर्भकः ।
लोकस्य सुखम् उत्पन्नम्, आत्मदेव प्रजा उदयात् ॥

शब्दार्थ—

तया	२.	धुन्धुली ने	अर्भकः ।	५.	बालक
च	१.	समय से	लोकस्य	१०.	लोगों में (भी)
कथितम्	४.	कहा (कि)	सुखम्	११.	आनन्द
भर्त्रे	३.	अपने पति (आत्मदेव) से	उत्पन्नम्	१२.	छा गया था
प्रसूतः	७.	उत्पन्न हो गया है	आत्मदेव	८.	आत्मदेव को
सुखम्	६.	सुख-पूर्वक	प्रजा, उदयात् ॥	९.	पुत्र, उत्पन्न होने से

श्लोकार्थ—समय से धुन्धुली ने अपने पति आत्मदेव से कहा कि बालक सुख-पूर्वक उत्पन्न हो गया है। आत्मदेव को पुत्र उत्पन्न होने से लोगों में भी आनन्द छा गया था ।

अष्टपञ्चाशः श्लोकः

ददौ दानं द्विजातिभ्यो जातकर्म विधाय च ।
गीतवादित्रघोषोऽभूत्तद्द्वारे मङ्गलं बहु ॥५८॥

पदच्छेद—

ददौ दानम् द्विजातिभ्यः, जातकर्म विधाय च ।
गीत वादित्र घोषः अभूत्, तद् द्वारे मङ्गलम् बहु ॥

शब्दार्थ—

ददौ	५.	दिये	वादित्र	१२.	बजाने की
दानम्	४.	दान	घोषः	१३.	ध्वनि
द्विजातिभ्यः	३.	ब्राह्मणों को	अभूत्	१४.	होने लगी
जातकर्म	१.	(आत्मदेव) जातकर्म संस्कार	तद्	६.	उनके
विधाय	२.	करके	द्वारे	७.	दरवाजे पर
च ।	१०.	तथा	मङ्गलम्	९.	उत्सव
गीत	११.	गाने	बहु ॥	८.	अनेकों

श्लोकार्थ—आत्मदेव जातकर्म संस्कार करके ब्राह्मणों को दान दिये। उनके दरवाजे पर अनेकों उत्सव तथा गाने-बजाने की ध्वनि होने लगी ।

एकोनषष्टितमः श्लोकः

भर्तु रग्रेऽब्रवीद्वाक्यं स्तन्यं नास्ति कुचे मम ।
अन्यस्तन्येन निर्दुग्धा कथं पुष्णामि बालकम् ॥५९॥

पदच्छेद—

भर्तुः अग्रे अब्रवीत् वाक्यम्, स्तन्यम् न अस्ति कुचे मम ।
अन्य स्तन्येन निर्दुग्धा, कथम् पुष्णामि बालकम् ॥

शब्दार्थ—

भर्तुः	१. (धुन्धुली अपने) पति के	मम ।	५. मेरे
अग्रे	२. सामने	अन्य	१०. दूसरों के
अब्रवीत्	४. बोली (कि)	स्तन्येन	११. दूध से
वाक्यम्	३. (यह) वचन	निर्दुग्धा	९. दूध से रहित (मैं)
स्तन्यम्	७. दूध	कथम्	१३. कैसे
न अस्ति	८. नहीं है	पुष्णामि	१४. पोषण करूँ
कुचे	६. स्तनों में	बालकम् ॥	१२. बच्चे का

श्लोकार्थ—धुन्धुली अपने पति के सामने यह वचन बोली कि मेरे स्तनों में दूध नहीं है। दूध से रहित मैं दूसरों के दूध से बच्चे का कैसे पोषण करूँ।

षष्टितमः श्लोकः

मत्स्वसुश्च प्रसूताया मृतो बालस्तु वर्तते ।
तामाकार्य गृहे रक्ष सा तेऽर्भं पोषयिष्यति ॥६०॥

पदच्छेद—

मत् स्वसुः च प्रसूतायाः, मृतः बालः तु वर्तते ।
ताम् आकार्य गृहे रक्ष, सा ते अर्भम् पोषयिष्यति ॥

शब्दार्थ—

मत्	२. मेरी	ताम्	९. उसे
स्वसुः	४. बहिन का	आकार्य	१०. बुलाकर
च	८. अतः	गृहे	११. घर में
प्रसूतायाः	३. जच्चा	रक्ष	१२. रख लें
मृतः	६. मर गया	सा	१३. वह
बालः	५. बालक	ते	१४. आपके
तु	१. किन्तु हाँ	अर्भम्	१५. बच्चे का
वर्तते ।	७. है	पोषयिष्यति ॥	१६. पोषण कर देगी

श्लोकार्थ—किन्तु हाँ ! मेरी जच्चा बहिन का बालक मर गया है; अतः उसे बुलाकर घर में रख लें। वह आपके बच्चे का पोषण कर देगी।

एकषष्टितमः श्लोकः

पतिना तत्कृतं सर्वं पुत्ररक्षणहेतवे ।
पुत्रस्य धुन्धुकारीति नाम मात्रा प्रतिष्ठितम् ॥६१॥

पदच्छेद—

पतिना तद् कृतम् सर्वम्, पुत्र रक्षण हेतवे ।
पुत्रस्य धुन्धुकारी इति, नाम मात्रा प्रतिष्ठितम् ॥

शब्दार्थ—

पतिना	१. पति (आत्मदेव) ने		पुत्रस्य	८. अपने पुत्र का
तद्	४. वह		धुन्धुकारी	९. धुन्धुकारी
कृतम्	६. किया		इति	१०. यह
सर्वम्	५. सब		नाम	११. नाम
पुत्र, रक्षण	२. पुत्र की, रक्षा के		मात्रा	७. माता धुन्धुली ने
हेतवे ।	३. निमित्त		प्रतिष्ठितम् ॥	१२. रखा

श्लोकार्थ—पति आत्मदेव ने पुत्र की रक्षा के निमित्त वह सब किया। माता धुन्धुली ने अपने पुत्र का धुन्धुकारी यह नाम रखा ।

द्विषष्टितमः श्लोकः

त्रिमासे निर्गते चाथ सा धेनुः सुषुवेऽर्भकम् ।
सर्वाङ्गसुन्दरं दिव्यं निर्मलं कनकप्रभम् ॥६२॥

पदच्छेद—

त्रि मासे निर्गते च अथ, सा धेनुः सुषुवे अर्भकम् ।
सर्व अङ्ग सुन्दरम् दिव्यम्, निर्मलम् कनक प्रभम् ॥

शब्दार्थ—

त्रि, मासे	२. तीन, महीने		अर्भकम् ।	१३. एक बालक को
निर्गते	३. बीत जाने पर		सर्व, अङ्ग	६. सभी, अंगों से
च	१०. तथा		सुन्दरम्	७. सुन्दर
अथ	१. तदनन्तर		दिव्यम्	८. तेजस्वी
सा	४. उस		निर्मलम्	९. पवित्र
धेनुः	५. गऊ ने		कनक	११. सुवर्ण के समान
सुषुवे	१४. उत्पन्न किया		प्रभम् ॥	१२. कान्तिमान्

श्लोकार्थं—तदन्तर तीन महीने बीत जाने पर उस गऊ ने सभी अंगों से सुन्दर, तेजस्वी, पवित्र तथा सुवर्ण के समान कान्तिमान् एक बालक को उत्पन्न किया ।

त्रिषष्टितमः श्लोकः

दृष्ट्वा प्रसन्नो विप्रस्तु संस्कारान् स्वयमादधे ।
मत्वाऽऽश्चर्यं जनाः सर्वे दिदृक्षार्थं समागताः ॥६३॥

पदच्छेद—

दृष्ट्वा प्रसन्नः विप्रः तु, संस्कारान् स्वयम् आदधे ।
मत्वा आश्चर्यम् जनाः सर्वे, दिदृक्षार्थम् समागताः ॥

शब्दार्थ—

दृष्ट्वा	१.	(उसे) देखकर	मत्वा	११.	समझकर (उसे)
प्रसन्नः	२.	आनन्द मग्न	आश्चर्यम्	१०.	आश्चर्य
विप्रः	३.	ब्राह्मण (आत्मदेव) ने	जनाः	९.	लोग
तु	७.	तथा	सर्वे	८.	सभी
संस्कारान्	४.	(जातकर्म आदि) संस्कारों को	दिदृक्षार्थम्	१२.	देखने की इच्छा से
स्वयम्	५.	स्वयम्	समागताः ॥	१३.	आने लगे
आदधे ।	६.	किया			

श्लोकार्थ—उसे देखकर आनन्द मग्न ब्राह्मण आत्मदेव ने जातकर्म आदि संस्कारों को स्वयं किया तथा सभी लोग आश्चर्य समझकर उसे देखने की इच्छा से आने लगे ।

चतुष्षष्टितमः श्लोकः

भाग्योदयोऽधुना जात आत्मदेवस्य पश्यत ।
धेन्वा बालः प्रसूतस्तु देवरूपीति कौतुकम् ॥६४॥

पदच्छेद—

भाग्योदयः अधुना जातः, आत्मदेवस्य पश्यत ।
धेन्वा बालः प्रसूतः तु, देव रूपी इति कौतुकम् ॥

शब्दार्थ—

भाग्योदयः	४.	भाग्य का उदय	बालः	११.	बालक को
अधुना	२.	इस समय	प्रसूतः	१२.	जन्म दिया है
जातः	५.	हो गया है	तु	९.	भी
आत्मदेवस्य	३.	आत्मदेव के	देवरूपी	१०.	देवता के समान
पश्यत ।	१.	देखिये	इति	६.	यह
धेन्वा	८.	गाय ने	कौतुकम् ॥	७.	आश्चर्य (है कि)

श्लोकार्थ—देखिये ! इस समय आत्मदेव के भाग्य का उदय हो गया है । यह आश्चर्य है कि गाय ने भी देवता के समान बालक को जन्म दिया है ।

पञ्चषष्टितमः श्लोकः

न ज्ञातं तद्रहस्यं तु केनापि विधियोगतः ।
गोकर्णं तं सुतं दृष्ट्वा गोकर्णं नाम चाकरोत् ॥६५॥

पदच्छेद—

न ज्ञातम् तद् रहस्यम् तु, केन अपि विधि योगतः ।
गोकर्णम् तम् सुतम् दृष्ट्वा, गोकर्णम् नाम च अकरोत् ॥

शब्दार्थ—

न, ज्ञातम्	५.	नहीं, जान सका	तम्, सुतम्	७.	उस, पुत्र का
तद्, रहस्यम्	४.	उस, रहस्य को	दृष्ट्वा	९.	देखकर
तु	१.	किन्तु	गोकर्णम्	१०.	गोकर्ण
केन, अपि	२.	कोई, भी	नाम	११.	नाम
विधि, योगतः ।	३.	भाग्य के, संयोग से	च	६.	तदनन्तर (आत्मदेव ने)
गोकर्णम्	८.	गाय के समान कान	अकरोत् ॥	१२.	रख दिया

श्लोकार्थ—किन्तु कोई भी भाग्य के संयोग से उस रहस्य को नहीं जान सका । तदनन्तर आत्मदेव ने उस पुत्र का गाय के समान कान देखकर गोकर्ण नाम रख दिया ।

षट्षष्टितमः श्लोकः

कियत्कालेन तौ जातौ तरुणौ तनयावुभौ ।
गोकर्णः पण्डितो ज्ञानी धुन्धुकारी महाखलः ॥६६॥

पदच्छेद—

कियद् कालेन तौ जातौ, तरुणौ तनयौ उभौ ।
गोकर्णः पण्डितः ज्ञानी, धुन्धुकारी महाखलः ॥

शब्दार्थ—

कियद्	१.	कुछ	उभौ ।	४.	दोनों
कालेन	२.	समय बाद	गोकर्णः	८.	गोकर्ण
तौ	३.	वे	पण्डितः	९.	चतुर (और)
जातौ	७.	हो गये (उनमें)	ज्ञानी	१०.	ज्ञानी (तथा)
तरुणौ	६.	युवक	धुन्धुकारी	११.	धुन्धुकारी
तनयौ	५.	पुत्र	महाखलः ॥	१२.	महान् दुष्ट (था)

श्लोकार्थ—कुछ समय बाद वे दोनों पुत्र युवक हो गये । उनमें गोकर्ण चतुर और ज्ञानी तथा धुन्धुकारी महान् दुष्ट था ।

सप्तषष्टितमः श्लोकः

स्नानशौचक्रियाहीनो दुर्भक्षी क्रोधवर्धितः ।
दुष्परिग्रहकर्ता च शवहस्तेन भोजनम् ॥६७॥

पदच्छेद—

स्नान शौच क्रिया हीनः, दुर्भक्षी क्रोध वर्धितः ।
दुष्परिग्रह कर्ता च, शव हस्तेन भोजनम् ॥

शब्दार्थ—

स्नान	१. (धुन्धुकारी) नहान और	दुष्परिग्रह	७. बुरी वस्तुओं का संग्रह
शौच, क्रिया	२. शुद्धि के, आचार से	कर्ता	८. करने वाला
हीनः	३. रहित	च	९. और
दुर्भक्षी	४. अभक्ष्य खाने वाला	शव	१०. अशुद्ध
क्रोध	६. क्रोधी	हस्तेन	११. हाथ से
वर्धितः ।	५. बहुत	भोजनम् ॥	१२. खाने वाला (था)

श्लोकार्थ—धुन्धुकारी नहान और शुद्धि के अचार से रहित, अभक्ष्य खाने वाला, बहुत क्रोधी, बुरी वस्तुओं का संग्रह करने वाला और अशुद्ध हाथ से खाने वाला था ।

अष्टषष्टितमः श्लोकः

चौरः सर्वजनद्वेषी परवेश्मप्रदीपकः ।
लालनायार्भकान् धृत्वा सद्यः कूपे न्यपातयत् ॥६८॥

पदच्छेद—

चौरः सर्व जन द्वेषी, पर वेश्म प्रदीपकः ।
लालनाय अर्भकान् धृत्वा, सद्यः कूपे न्यपातयत् ॥

शब्दार्थ—

चौरः	१. (वह) चोर	अर्भकान्	७. बच्चों को
सर्व, जन	२. सभी, लोगों से	धृत्वा	८. पकड़कर
द्वेषी	३. वैर-भाव करने वाला	सद्यः	९. तत्काल
परवेश्म	४. दूसरों के घर	कूपे	१०. कुएँ में
प्रदीपकः ।	५. चोरी करने वाला (तथा)	न्यपातयत् ॥	११. धकेल देता था
लालनाय	६. खेल के बहाने		

श्लोकार्थ—वह चोर, सभी लोगों से वैर-भाव करने वाला, दूसरों के घर चोरी करने वाला तथा खेल के बहाने बच्चों को पकड़ कर तत्काल कूएँ में धकेल देता था ।

एकोनसप्ततितमः श्लोकः

हिंसकः शस्त्रधारी च दीनान्धानां प्रपीडकः।
चाण्डालाभिरतो नित्यं पाशहस्तः श्वसंगतः ॥६९॥

पदच्छेद—

हिंसकः शस्त्रधारी च, दीन अन्धानाम् प्रपीडकः।
चाण्डाल अभिरतः नित्यम्, पाश हस्तः श्वन् संगतः ॥

शब्दार्थ—

हिंसकः	१.	हिंसा करने वाला	चण्डाल	७.	चाण्डालों से
शस्त्रधारी	२.	हथियार रखने वाला	अभिरतः	८.	प्रेम करने वाला (वह धुन्धुकारी)
च	६.	तथा	नित्यम्	९.	सदा
दीन	३.	अनाथों और	पाश, हस्तः	१०.	फन्दा, हाथ में लिये हुये
अन्धानाम्	४.	अन्धों को	श्वन्	११.	कुत्तों को
प्रपीडकः।	५.	दुःख देने वाला	संगतः ॥	१२.	साथ में रखता था

श्लोकार्थ—हिंसा करने वाला, हथियार रखने वाला, अनाथों और अन्धों को दुःख देने वाला तथा चाण्डलों से प्रेम करने वाला वह धुन्धुकारी सदा फन्दा हाथ में लिये हुए कुत्तों को साथ में रखता था।

सप्ततितमः श्लोकः

तेन वेश्याकुसंगेन पित्र्यं वित्तं तु नाशितम्।
एकदा पितरौ ताडय्य पात्राणि स्वयमाहरत् ॥७०॥

पदच्छेद—

तेन वेश्या कुसंगेन, पित्र्यम् वित्तम् तु नाशितम्।
एकदा पितरौ ताड्य, पात्राणि स्वयम् आहरत् ॥

शब्दार्थ—

तेन	१.	उसने	एकदा	७.	एक दिन
वेश्या, कुसंगेन	२.	वेश्या की, कुसंगति से	पितरौ	८.	माता-पिता को
पित्र्यम्	३.	पिता का	ताडय	९.	मार-पीट कर
वित्तम्	४.	(सारा) धन	पात्राणि	१०.	बरतनों को
तु	६.	तथा	स्वयम्	११.	खुद
नाशितम्।	५.	नष्ट कर दिया	आहरत् ॥	१२.	चुरा लिया

श्लोकार्थ—उसने वेश्या की कुसंगति से पिता का सारा धन नष्ट कर दिया तथा एकदिन माता-पिता को मार पीट कर बरतनों को खुद चुरा लिया।

एकसप्ततितमः श्लोकः

तत्पिता कृपणः प्रोच्चैर्धनहीनो रुरोद ह ।
बन्ध्यत्वं तु समीचीनं कुपुत्रो दुःखदायकः ॥७१॥

पदच्छेद—

तत् पिता कृपणः प्रोच्चैः, धन हीनः रुरोद ह ।
बन्ध्यत्वम् तु समीचीनम्, कुपुत्रः दुःख दायकः ॥

शब्दार्थ—

तत्, पिता	१.	उसके, पिता (आत्मदेव)	बन्ध्यत्वम्	७.	बाँझ रहना ही
कृपणः	३.	व्याकुल होकर	तु	९.	क्योंकि
प्रोच्चैः	४.	जोर से	समीचीनम्	८.	अच्छा (है)
धन, हीनः	२.	संपत्ति से, रहित और	कुपुत्रः	१०.	कुपुत्र
रुरोद	५	रोने लगे	दुःख	११.	कष्ट
ह ।	६.	और कहने लगे कि	दायकः ॥	१२.	देने वाला (होता है)

श्लोकार्थ—उसके पिता आत्मदेव संपत्ति से रहित और व्याकुल होकर जोर से रोने लगे और कहने लगे कि बाँझ रहना ही अच्छा है; क्योंकि कुपुत्र कष्ट देने वाला होता है ।

द्विसप्ततितमः श्लोकः

क्व तिष्ठामि क्व गच्छामि को मे दुःखं व्यपोहयेत् ।
प्राणांस्त्यजामि दुःखेन हा कष्टं मम संस्थितम् ॥७२॥

पदच्छेद—

क्व तिष्ठामि क्व गच्छामि, कः मे दुःखम् व्यपोहयेत् ।
प्राणान् त्यजामि दुःखेन, हा कष्टम् मम संस्थितम् ॥

शब्दार्थ—

क्व	१.	कहाँ	प्राणान्	१०.	प्राणों को
तिष्ठामि	२.	रहूँ	त्यजामि	११.	छोड़ रहा हूँ
क्व	३.	कहाँ	दुःखेन	९.	(मैं) दुःख से
गच्छामि	४.	जाऊँ	हा	१२.	हाय !
कः	५.	कौन	कष्टम्	१४.	कष्ट
मे	६.	मेरे	मम	१३.	मुझे
दुःखम्	७.	कष्ट को	संस्थितम् ॥	१५.	हो गया है
व्यपोहयेत् ।	८.	दूर करेगा			

श्लोकार्थ—कहाँ रहूँ ? कहाँ जाऊँ ? कौन मेरे कष्ट को दूर करेगा ? मैं दुःख से प्राणों को छोड़ रहा हूँ । हाय ! मुझे कष्ट हो गया है ।

त्रिसप्ततितमः श्लोकः

तदानीं तु समागत्य गोकर्णो ज्ञानसंयुतः ।
बोधयामास जनकं वैराग्यं परिदर्शयन् ॥७३॥

पदच्छेद—

तदानीम् तु समागत्य, गोकर्णः ज्ञान संयुतः ।
बोधयामास जनकम्, वैराग्यम् परिदर्शयन् ॥

शब्दार्थ—

तदानीम्	२.	उस समय	संयुतः ।	४.	सम्पन्न
तु	१.	तदनन्तर	बोधयामास	१०.	समझाने लगे
समागत्य	६.	आकर	जनकम्	७.	पिता को
गोकर्णः	५.	गोकर्ण जी	वैराग्यम्	८.	संन्यास का मार्ग
ज्ञान	३.	ज्ञान से	परिदर्शयन् ॥	९.	दिखाते हुए

श्लोकार्थ—तदनन्तर उस समय ज्ञान से संपन्न गोकर्ण जी आकर पिता को संन्यास का मार्ग दिखाते हुए समझाने लगे ।

चतुस्सप्ततितमः श्लोकः

असारः खलु संसारो दुःखरूपी विमोहकः ।
पदच्छेद—

अत्र एव बहवः सन्ति, श्रोतारः मम निर्मलाः ।
आनीतानि विमानानि, न तेषाम् युगपत् कुतः ॥

शब्दार्थ—

अत्र एव	१.	यहीं पर	आनीतानि	१२.	लाये गये
बहवः	३.	अनेकों	विमानानि	९.	विमान
सन्तिः	६.	हैं	न	११.	नहीं
श्रोतारः	५.	श्रोता	तेषाम्	७.	उनके लिए
मम	२.	मेरी (कथा के)	युगपत्	८.	एक साथ
निर्मलाः ।	४.	शुद्ध मनवाले	कुतः ॥	१०.	क्यों

श्लोकार्थ—यहीं पर मेरी कथा के अनेकों शुद्ध मन वाले श्रोता हैं । उनके लिए एक साथ विमान क्यों नहीं लाये गये ?

सप्ततितमः श्लोकः

श्रवणं समभागेन सर्वेषामिह दृश्यते ।
फलभेदः कुतो जातः प्रब्रुवन्तु हरिप्रियाः ॥७०॥

पदच्छेद—

श्रवणम् सम भागेन, सर्वेषाम् इह दृश्यते ।
फल भेदः कुतः जातः, प्रब्रुवन्तु हरि प्रियाः ॥

शब्दार्थ—

श्रवणम्	३.	(कथा) श्रवण	फल, भेदः	६.	फल में, अन्तर
सम भागेन	४.	समान रूप से	कुतः	७.	क्यों
सर्वेषाम्	२.	सभी लोगों का	जातः	८.	हो गया
इह	१.	यहाँ	प्रब्रुवन्तु	१०.	बताएँ
दृश्यते ।	५.	हुआ है (किन्तु)	हरिप्रियाः ॥	९.	हे विष्णु के पार्षदगण !

श्लोकार्थ—यहाँ सभी लोगों का कथा श्रवण समानरूप से हुआ है; किन्तु फल में अन्तर क्यों हो गया ? हे विष्णु के पार्षदगण ! बतायें ।

एकसप्ततितमः श्लोकः

हरिदासा ऊचुः— श्रवणस्य विभेदेन फलभेदोऽत्र संस्थितः।
श्रवणं तु कृतं सर्वैर्न तथा मननं कृतम्।
फलभेदस्ततो जातो भजनादपि मानद ॥७१॥

पदच्छेद— श्रवणस्य विभेदेन, फलभेदः अत्र संस्थितः।
श्रवणम् तु कृतम् सर्वैः, न तथा मननम् कृतम्।
फल भेदः ततः जातः, भजनात् अपि मानद ॥

शब्दार्थ—

श्रवणस्य	३.	(कथा) सुनने में	तथा	११.	उस प्रकार से
विभेदेन	४.	अन्तर होने से	मननम्	१२.	चिन्तन
फल, भेदः	५.	फल में, भेद	कृतम्।	१४.	किया है
अत्र	२.	यहाँ	फल, भेदः	१८.	फल में, भिन्नता
संस्थितः।	६.	हो गया	ततः	१५.	अतः
श्रवणम्	७.	(कथा का) श्रवण	जातः	१६.	हो जाती (है)
तु	१०.	किन्तु	भजनात्	१६.	भजन करने पर
कृतम्	६.	किया (है)	अपि	१७.	भी
सर्वैः	८.	सबने	मानद॥	१.	हे सम्मानित गोकर्ण जी!
न	१३.	नहीं			

श्लोकार्थ—हे सम्मानित गोकर्णजी! यहाँ कथा सुनने में अन्तर होने से फल में भेद हो गया। कथा का श्रवण सबने किया है, किन्तु उस प्रकार से चिन्तन नहीं किया है। अतः भजन करने पर भी फल में भिन्नता हो जाती है।

द्विसप्ततितमः श्लोकः

सप्तरात्रमुपोष्यैव प्रेतेन श्रवणं कृतम्।
मननादि तथा तेन स्थिरचित्ते कृतं भृशम् ॥७२॥

पदच्छेद— सप्तरात्रम् उपोष्य एव, प्रेतेन श्रवणम् कृतम्।
मनन आदि तथा तेन, स्थिर चित्ते कृतम् भृशम् ॥

शब्दार्थ—

सप्तरात्रम्	२.	सात रातों तक	मनन आदि	१०.	चिन्तन इत्यादि
उपोष्य	३.	उपवास करके	तथा	७.	तथा
एव	४.	ही	तेन	८.	उसने
प्रेतेन	१.	प्रेत ने	स्थिर, चित्ते	६.	शान्त, मन से
श्रवणम्	५.	(कथा का) श्रवण	कृतम्	१२.	किया है
कृतम्।	६.	किया है	भृशम्॥	११.	खूब

श्लोकार्थ—प्रेत ने सात रातों तक उपवास करके ही कथा का श्रवण किया है तथा उसने शान्त मन से चिन्तन इत्यादि खूब किया है।

त्रिसप्ततितमः श्लोकः

अदृढं च हतं ज्ञानं प्रमादेन हतं श्रुतम् ।
संदिग्धो हि हतो मन्त्रो व्यग्रचित्तो हतो जपः ॥७३॥

पदच्छेद—

अदृढम् च हतम् ज्ञानम्, प्रमादेन हतम् श्रुतम् ।
संदिग्धः हि हतः मन्त्रः, व्यग्र चित्तः हतः जपः ॥

शब्दार्थ—

अदृढम्	१.	अस्थायी	**संदिग्धः**	७.	संदेह होते
च	११.	और	**हि**	८.	ही
हतम्	३.	समाप्त हो जाता है	**हतः**	१०.	अप्रभावी हो जाता है
ज्ञानम्	२.	ज्ञान	**मन्त्रः**	९.	मन्त्र
प्रमादेन	४.	आलस्य वश	**व्यग्र चित्तः**	१२.	अशान्त मन से
हतम्	६.	भूल जाते हैं	**हतः**	१४.	निष्फल हो जाता है
श्रुतम् ।	५.	वेदादि शास्त्र	**जपः ॥**	१३.	जप (भी)

श्लोकार्थ—अस्थायी ज्ञान समाप्त हो जाता है, आलस्य वश वेदादि शास्त्र भूल जाते हैं, सन्देह होते ही मन्त्र अप्रभावी हो जाता है और अशान्त-मन से जप भी निष्फल हो जाता है ।

चतुस्सप्ततितमः श्लोकः

अवैष्णवो हतो देशो हतं श्राद्धमपात्रकम् ।
हतमश्रोत्रिये दानमनाचारं हतं कुलम् ॥७४॥

पदच्छेद—

अवैष्णवः हतः देशः, हतम् श्राद्धम् अपात्रकम् ।
हतम् अश्रोत्रिये दानम्, अनाचारम् हतम् कुलम् ॥

शब्दार्थ—

अवैष्णवः	१.	विष्णु भक्तों से रहित	**हतम्**	९.	व्यर्थ (है तथा)
हतः	३.	तुच्छ (है)	**अश्रोत्रिये**	७.	वेद-विहीन को
देशः	२.	देश	**दानम्**	८.	दान देना
हतम्	६.	निन्दित (है)	**अनाचारम्**	१०.	आचार-हीन
श्राद्धम्	५.	श्राद्ध	**हतम्**	१२.	अशान्त (रहता है)
अपात्रकम् ।	४.	ब्राह्मण-विहीन	**कुलम् ॥**	११.	परिवार (भी)

श्लोकार्थ—विष्णु भक्तों से रहित देश तुच्छ है, ब्राह्मण-विहीन श्राद्ध निन्दित है, वेद-विहीन को दान देना व्यर्थ है तथा आचार-हीन परिवार भी अशान्त रहता है ।

पञ्चसप्ततितमः श्लोकः

विश्वासो गुरुवाक्येषु स्वस्मिन्दीनत्वभावना ।
मनोदोषजयश्चैव कथायां निश्चला मतिः ॥७५॥

पदच्छेद—

विश्वासः गुरु वाक्येषु, स्वस्मिन् दीनत्व भावना ।
मनः दोष जयः च एव, कथायाम् निश्चला मतिः ॥

शब्दार्थ—

विश्वासः	२.	विश्वास	जयः	७.	विजय
गुरु वाक्येषु	१.	गुरु के वचनों में	च	८.	और
स्वस्मिन्	३.	अपने में	एव	१२.	ही (फलदायक है)
दीनत्व	४.	दीनता के	कथायाम्	९.	कथा में
भावना ।	५.	भाव	निश्चला	१०.	स्थिर
मनः दोष	६.	मन के दोषों पर	मतिः ॥	११.	बुद्धि

श्लोकार्थ—गुरु के वचनों में विश्वास, अपने में दीनता के भाव, मन के दोषों पर विजय और कथा में स्थिर-बुद्धि ही फलदायक है ।

षट्सप्ततितमः श्लोकः

एवमादि कृतं चेत्स्यात्तदा वै श्रवणे फलम् ।
पुनः श्रवान्ते सर्वेषां वैकुण्ठे वसतिर्ध्रुवम् ॥७६॥

पदच्छेद—

एवम् आदि कृतम् चेत् स्यात्, तदा वै श्रवणे फलम् ।
पुनः श्रव अन्ते सर्वेषाम् , वैकुण्ठे वसतिः ध्रुवम् ॥

शब्दार्थ—

एवम् आदि	२.	इस प्रकार से	पुनः	८.	(इस प्रकार) फिर से
कृतम्	३.	(कथा) सुनी गयी	श्रव	९.	(कथा) सुनने
चेत्	१.	यदि	अन्ते	१०.	पर
स्यात्	४.	हो	सर्वेषाम्	११.	सबका
तदा वै	५.	तभी	वैकुण्ठे	१२.	वैकुण्ठ लोक में
श्रवणे	६.	सुनने का	वसतिः	१३.	निवास
फलम् ।	७.	फल (मिलता है)	ध्रुवम् ॥	१४.	निश्चित (है)

श्लोकार्थ—यदि इस प्रकार से कथा सुनी गयी हो तभी सुनने का फल मिलता है । इस प्रकार फिर से कथा सुनने पर सबका वैकुण्ठलोक में निवास निश्चित है ।

सप्तसप्ततितमः श्लोकः

गोकर्ण तव गोविन्दो गोलोकं दास्यति स्वयम् ।
एवमुक्त्वा ययुः सर्वे वैकुण्ठं हरिकीर्तनाः ॥७७॥

पदच्छेद—

गोकर्ण तव गोविन्दः, गोलोकम् दास्यति स्वयम् ।
एवम् उक्त्वा ययुः सर्वे, वैकुण्ठम् हरि कीर्तनाः ॥

शब्दार्थ—

गोकर्ण	१. हे गोकर्ण जी !	**एवम्**	७.	इस प्रकार
तव	४. आपको	**उक्त्वा**	८.	कहकर
गोविन्दः	२. गोविन्द भगवान्	**ययुः**	१२.	चले गये
गोलोकम्	५. गोलोक धाम	**सर्वे**	९.	सभी
दास्यति	६. देंगे	**वैकुण्ठम्**	११.	वैकुण्ठ लोक को
स्वयम् ।	३. स्वयम्	**हरि कीर्तनाः ॥**	१०.	विष्णु-पार्षद

श्लोकार्थ—हे गोकर्ण जी ! गोविन्द भगवान् स्वयम् आपको गोलोक धाम देंगे, इस प्रकार कह कर सभी विष्णु-पार्षद वैकुण्ठ लोक को चले गये ।

अष्टसप्ततितमः श्लोकः

श्रावणे मासि गोकर्णः कथामूचे तथा पुनः ।
सप्तरात्रवतीं भूयः श्रवणं तैः कृतं पुनः ॥७८॥

पदच्छेद—

श्रावणे मासि गोकर्णः, कथाम् ऊचे तथा पुनः ।
सप्त रात्रवतीम् भूयः, श्रवणम् तैः कृतम् पुनः ॥

शब्दार्थ—

श्रावणे	३. सावन के	**सप्त रात्रवतीम्**	५.	सात रातों वाली
मासि	४. महीने में	**भूयः**	९.	तथा
गोकर्णः	२. गोकर्ण जी ने	**श्रवणम्**	१२.	श्रवण
कथाम्	६. श्रीमद्भागवत कथा	**तैः**	१०.	उन (श्रोताओं ने)
ऊचे	८. कही	**कृतम्**	१३.	किया
तथा	१. तदनन्तर	**पुनः ॥**	११.	फिर से
पुनः ।	७. फिर से			

श्लोकार्थ—तदनन्तर गोकर्णजी ने सावन के महीने में सात रातों वाली श्रीमद्भागवतकथा फिर से कही तथा उन श्रोताओं ने फिर से श्रवण किया ।

एकोनाशीतितमः श्लोकः

कथासमाप्तौ यज्जातं श्रूयतां तच्च नारद ॥७९॥

पदच्छेद—

कथा समाप्तौ यद् जातम्, श्रूयताम् तद् च नारद ॥

शब्दार्थ—

कथा	३.	श्रीमद्भागवत कथा की	श्रूयताम्	८.	सुनें
समाप्तौ	४.	पूर्णाहुति पर	तद्	७.	उसे (आप)
यद्	५.	जो	च	१.	तथा
जातम्	६.	हुआ	नारद ॥	२.	हे नारद जी !

श्लोकार्थ—तथा हे नारदजी ! श्रीमद्भागवत कथा की पूर्णाहुति पर जो हुआ; उसे आप सुनें ।

अशीतितमः श्लोकः

विमानैः सह भक्तैश्च हरिराविर्बभूव ह ।
जयशब्दा नमश्शब्दास्तत्रासन् बहवस्तदा ॥८०॥

पदच्छेद—

विमानैः सह भक्तैः च, हरिः आविर्बभूव ह ।
जय शब्दाः नमः शब्दाः, तत्र आसन् बहवः तदा ॥

शब्दार्थ—

विमानैः	३.	विमानों	जय शब्दाः	१०.	जय-जयकार की ध्वनि (और)
सह	६.	साथ (वहाँ)	नमः	११.	नमोनमः की
भक्तैः	५.	भक्तों के	शब्दाः	१२.	ध्वनि
च	४.	और	तत्र	९.	वहाँ पर
हरिः	२.	भगवान् श्री हरि	आसन्	१४.	होती रही
आविर्बभूव	७.	प्रकट हुए	बहवः	१३.	बहुत समय तक
ह ।	८.	तथा	तदा ॥	१.	उस समय

श्लोकार्थ—उस समय भगवान् श्री हरि विमानों और भक्तों के साथ वहाँ प्रकट हुए तथा वहाँ पर जय-जयकार की ध्वनि और नमोनमः की ध्वनि बहुत समय तक होती रही ।

एकाशीतितमः श्लोकः

पाञ्चजन्यध्वनिं चक्रे हर्षात्तत्र स्वयं हरिः ।
गोकर्णं तु समालिङ्ग्याकरोत्स्वसदृशं हरिः ॥८१॥

पदच्छेद—

पाञ्चजन्य ध्वनिम् चक्रे, हर्षात् तत्र स्वयम् हरिः ।
गोकर्णम् तु समालिङ्ग्य, अकरोत् स्व सदृशम् हरिः ॥

शब्दार्थ—

पाञ्चजन्य	५.	पाञ्चजन्य शंख का	**गोकर्णम्**	१०.	गोकर्ण जी का
ध्वनिम्	६.	नाद	**तु**	८.	तथा
चक्रे	७.	किया	**समालिङ्ग्य**	११.	आलिगन करके (उन्हें)
हर्षात्	४.	प्रसन्नता से	**अकरोत्**	१४.	बना लिया
तत्र	१.	वहाँ पर	**स्व**	१२.	अपने
स्वयम्	३.	अपने आप	**सदृशम्**	१३.	समान
हरिः ।	२.	भगवान् श्रीहरि ने	**हरिः ॥**	९.	भगवान् श्रीहरि ने

श्लोकार्थ—वहाँ पर भगवान् श्रीहरि ने अपने आप प्रसन्नता से पाञ्चजन्य शंख का नाद किया तथा भगवान् श्रीहरि ने गोकर्ण जी का आलिगन करके उन्हें अपने समान बना लिया ।

द्वयशीतितमः श्लोकः

श्रोतॄनन्यान् घनश्यामान् पतिकौशेयवाससः ।
किरीटिनः कुण्डलिनस्तथा चक्रे हरिः क्षणात् ॥८२॥

पदच्छेद—

श्रोतॄन् अन्यान् घनश्यामान् , पीत कौशेय वाससः ।
किरीटिनः कुण्डलिनः, तथा चक्रे हरिः क्षणात् ॥

शब्दार्थ—

श्रोतॄन्	३.	श्रोताओं को	**कुण्डलिनः**	१०.	कुण्डलों से युक्त
अन्यान्	२.	दूसरे	**तथा**	९.	तथा
घनश्यामान्	५.	मेघ के समान साँवला	**चक्रे**	११.	बना दिया
पीतकौशेय	६.	पीताम्बर	**हरिः**	१.	भगवान् श्री हरि ने
वाससः ।	७.	धारी	**क्षणात् ॥**	४.	क्षण भर में
किरीटिनः	८.	मुकुट से सुशोभित			

श्लोकार्थ—भगवान् श्रीहरि ने दूसरे श्रोताओं को क्षण भर में मेघ के समान साँवला, पीताम्बर धारी, मुकुट से सुशोभित तथा कुण्डलों से युक्त बना दिया ।

त्र्यशीतितमः श्लोकः

तद्ग्रामे ये स्थिता जीवा आश्वचाण्डालजातयः ।
विमाने स्थापितास्तेऽपि गोकर्णकृपया तदा ॥८३॥

पदच्छेद— तद् ग्रामे ये स्थिताः जीवाः, आ श्वन् चाण्डाल जातयः ।
विमाने स्थापिताः ते अपि, गोकर्ण कृपया तदा ॥

शब्दार्थ—

तद्, ग्रामे	२. उस, गाँव में	जातयः ।	५. जाति
ये	७. जो	विमाने, स्थापिताः	१४. विमान में, बैठा लिये गये
स्थिताः	९. विद्यमान थे	ते	१२. वे
जीवाः	८. प्राणी	अपि	१३. सभी
आ	६. तक	गोकर्ण	१०. गोकर्णजी की
श्वन्	३. कुत्ते से लेकर	कृपया	११. कृपा से
चाण्डाल	४. चण्डाल	तदा ॥	१. उस समय

श्लोकार्थ—उस समय उस गाँव में कुत्ते से लेकर चण्डाल जाति तक जो प्राणी विद्यमान थे, गोकर्णजी की कृपा से वे सभी विमान में बैठा लिये गये ।

चतुरशीतितमः श्लोकः

प्रेषिता हरिलोके ते यत्र गच्छन्ति योगिनः ।
गोकर्णेन स गोपालो गोलोकं गोपवल्लभम् ।
कथाश्रवणतः प्रीतो निर्ययौ भक्तवत्सलः ॥८४॥

पदच्छेद— प्रेषिताः हरिलोके ते, यत्र गच्छन्ति योगिनः ।
गोकर्णेन सः गोपालः, गोलोकम् गोप वल्लभम् ।
कथा श्रवणतः प्रीतः, निर्ययौ भक्त वत्सलः ॥

शब्दार्थ—

प्रेषिताः	४. भेज दिये गये	सः, गोपालः	९. वे, भगवान् श्रीकृष्ण
हरि लोके	३. वैकुण्ठ धाम को	गोलोकम्	१३. गोलोक धाम को
ते	२. वे सभी	गोप वल्लभम् ।	१२. ग्वालों के प्रिय
यत्र	५. जहाँ (कि)	कथा, श्रवणतः	१०. श्रीमद्भागवत कथा के, सुनने से
गच्छन्ति	७. जाते हैं (तथा)	प्रीतः	११. प्रसन्न होकर (गोकर्ण के साथ)
योगिनः ।	६. योगिजन	निर्ययौ	१४. चले गये
गोकर्णेन	१. गोकर्ण के द्वारा	भक्त, वत्सलः ॥	८. भक्त, हितकारी

श्लोकार्थ—गोकर्ण के द्वारा वे सभी वैकुण्ठ धाम को भेज दिये गये, जहाँ कि योगिजन जाते हैं तथा भक्त-हितकारी वे भगवान् श्रीकृष्ण श्रीमद्भागवत कथा के सुनने से प्रसन्न होकर गोकर्ण के साथ ग्वालों के प्रिय गोलोक-धाम को चले गये ।

पञ्चाशीतितमः श्लोकः

अयोध्यावासिनः पूर्वं यथा रामेण संगताः ।
तथा कृष्णेन ते नीताः गोलोकं योगिदुर्लभम् ॥८५॥

पदच्छेद—

अयोध्या वासिनः पूर्वम्, यथा रामेण संगताः ।
तथा कृष्णेन ते नीताः, गोलोकम् योगि दुर्लभम् ॥

शब्दार्थ—

अयोध्या वासिनः	३. अयोध्यापुरी के निवासी लोग		कृष्णेन	७. भगवान् कृष्ण के द्वारा
पूर्वम्	२. पहले (त्रेता युग में)		ते	८. वे सब लोग
यथा	१. जैसे		नीताः	१२. पहुँचा दिये गये
रामेण	४. राम जी के साथ		गोलोकम्	११. गोलोक धाम को
संगताः ।	५. चले गये		योगि	९. योगियों को
तथा	६. उसी प्रकार		दुर्लभम् ॥	१०. दुर्लभ

श्लोकार्थ—जैसे पहले त्रेता युग में अयोध्यापुरी के निवासी लोग राम जी के साथ चले गये; उसी प्रकार भगवान् कृष्ण के द्वारा वे सब लोग योगियों को दुर्लभ गोलोक धाम को पहुँचा दिये गये ।

षडशीतितमः श्लोकः

यत्र सूर्यस्य सोमस्य सिद्धानां न गतिः कदा ।
तं लोकं हि गतास्ते तु श्रीमद्भागवतश्रवात् ॥८६॥

पदच्छेद—

यत्र सूर्यस्य सोमस्य, सिद्धानाम् न गतिः कदा ।
तम् लोकम् हि गताः ते तु, श्रीमद्भागवत श्रवात् ॥

शब्दार्थ—

यत्र	१. जहाँ		तम्, लोकम्	१३. उस, धाम को
सूर्यस्य	२. सूर्य का		हि	४. और
सोमस्य	३. चन्द्रमा का		गताः	१४. चले गये
सिद्धानाम्	५. सिद्धों का		ते	१२. वे सब (लोग)
न	८. नहीं (होता है)		तु	९. किन्तु
गतिः	६. जाना		श्रीमद्भागवत	१०. श्रीमद्भागवत कथा के
कदा ।	७. कभी		श्रवात् ॥	११. सुनने से

श्लोकार्थ—जहाँ सूर्य का, चन्द्रमा का और सिद्धों का जाना कभी नहीं होता है; किन्तु श्रीमद्भागवत-कथा के सुनने से वे सब लोग उस धाम को चले गये ।

सप्ताशीतितमः श्लोकः

ब्रूमोऽत्र ते किं फलवृन्दमुज्ज्वलम् , सप्ताहयज्ञेन कथासु संचितम् ।
कर्णेन गोकर्णकथाक्षरो यैः, पीतश्च ते गर्भगता न भूयः ॥८७॥

पदच्छेद— ब्रूमः अत्र ते किम् फल वृन्दम् उज्ज्वलम् , सप्ताह यज्ञेन कथासु संचितम् ।
कर्णेन गोकर्ण कथा अक्षरः यैः, पीतः च ते गर्भ गताः न भूयः ॥

शब्दार्थ—

ब्रूमः	८. कहें	गोकर्ण	११. गोकर्ण जी की
अत्र, ते	५. अब, आप लोगों से	कथा, अक्षरः	१२. कथा के, शब्दों का
किम्	७. क्या	यैः	९. जिन्होंने
फल, वृन्दम्	४. पुण्य, राशि के विषय में	पीतः	१३. पान किया है
उज्ज्वलम्,	३. निर्मल	च	६. और
सप्ताह, यज्ञेन	१. श्रीमद्भागवत सप्ताह, यज्ञ की	ते	१४. वे (लोग)
कथासु, संचितम् ।	२. कथाओं में, इकट्ठी की गयी	गर्भ, गताः, न	१६. गर्भ में, गये, नहीं
कर्णेन	१०. कान से	भूयः ॥	१५. फिर से

श्लोकार्थ—श्रीमद्भागवत सप्ताह-यज्ञ की कथाओं में इकट्ठी की गयी निर्मल पुण्यराशि के विषय में अब आप लोगों से और क्या कहें ? जिन्होंने कान से गोकर्ण जी की कथा के शब्दों का पान किया है; वे लोग फिर से गर्भ में नहीं गये ।

अष्टाशीतितमः श्लोकः

वाताम्बुपर्णाशनदेहशोषणैस्तपोभिरुग्रैश्चिरकालसंचितैः ।
योगैश्च संयान्ति न तां गतिं वै सप्ताहगाथाश्रवणेन यान्ति याम् ॥८८॥

पदच्छेद—
वात अम्बु पर्ण अशन देह शोषणैः, तपोभिः उग्रैः चिरकाल संचितैः ।
योगैः च संयान्ति न ताम् गतिम् वै, सप्ताह गाथा श्रवणेन यान्ति याम् ॥

शब्दार्थ—

वात, अम्बु	१. वायु, जल और	संयान्ति, न	१०. पाया जा सकता, नहीं
पर्ण, अशन	२. पत्तों के, आहार से	ताम्, गतिम्	९. उस, धाम को
देह, शोषणैः,	३. शरीर को, सुखा देने वाली	वै	८. निश्चयपूर्वक
तपोभिः, उग्रैः	४. तपस्या के द्वारा, कठिन	सप्ताह	१२. श्रीमद्भागवत सप्ताह की
चिरकाल, संचितैः ।	६. बहुत समय से; इकट्ठी की गयी	गाथा, श्रवणेन	१३. कथा को, सुनने से
योगैः	७. योग साधनाओं के द्वारा	यान्ति	१४. प्राप्त किया जाता है
च	५. और	याम् ॥	११. जिस (धाम) को

श्लोकार्थ—वायु, जल और पत्तों के आहार से शरीर को सुखा देने वाली कठिन तपस्या के द्वारा और बहुत समय से इकट्ठी की गयी योग साधनाओं के द्वारा निश्चयपूर्वक उस धाम को नहीं पाया जा सकता; जिस धाम को श्रीमद्भागवत सप्ताह की कथा को सुनने से प्राप्त किया जाता है ।

एकोननवतितमः श्लोकः

इतिहासमिमं पुण्यं शाण्डिल्योऽपि मुनीश्वरः ।
पठते चित्रकूटस्थो ब्रह्मानन्दपरिप्लुतः ॥८९॥

पदच्छेद—

इतिहासम् इमम् पुण्यम्, शाण्डिल्यः अपि मुनीश्वरः ।
पठते चित्रकूटस्थः, ब्रह्मानन्द परिप्लुतः ॥

शब्दार्थ—

इतिहासम्	९.	इतिहास को	मुनीश्वरः ।	४.	मुनीश्वर
इमम्	७.	इस	पठते	१०.	पढ़ते हैं
पुण्यम्	८.	पवित्र	चित्रकूटस्थः	१.	चित्रकूट में स्थित होकर
शाण्डिल्यः	५.	शाण्डिल्य	ब्रह्मानन्द	२.	ब्रह्मानन्द में
अपि	६.	भी	परिप्लुतः ॥	३.	डूबे हुए

श्लोकार्थ—चित्रकूट में स्थित होकर ब्रह्मानन्द में डूबे हुए मुनीश्वर शाण्डिल्य भी इस पवित्र इतिहास को पढ़ते हैं ।

नवतितमः श्लोकः

आख्यानमेतत्परमं पवित्रं श्रुतं सकृद्वै विदहेदघौघम् ।
श्राद्धे प्रयुक्तं पितृतृप्तिमावहेन्नित्यं सुपाठादपुनर्भवं च ॥९०॥

पदच्छेद—

आख्यानम् एतद् परमम् पवित्रम्, श्रुतम् सकृत् वै विदहेत् अघ ओघम् ।
श्राद्धे प्रयुक्तम् पितृ तृप्तिम् आवहेत्, नित्यम् सुपाठात् अपुनर्भवम् च ॥

शब्दार्थ—

आख्यानम्	२.	कथा	श्राद्धे	९.	श्राद्ध में
एतद्	१.	यह	प्रयुक्तम्	१०.	पाठ करने पर
परमम्, पवित्रम्	३.	अत्यन्त, पवित्र (है)	पितृ, तृप्तिम्	११.	पितरों को, संतोष
श्रुतम्	५.	सुनने पर	आवहेत्	१२.	प्रदान करती है
सकृत्	४.	एकबार	नित्यम्	१४.	प्रतिदिन
वै	६.	निश्चयपूर्वक	सुपाठात्	१५.	सुन्दर पाठ करने पर
विदहेत्	८.	जला देती है	अपुनर्भवम्	१६.	मोक्ष (देती है)
अघ, ओघम् ।	७.	पाप, समूह को	च ॥	१३.	तथा

श्लोकार्थ—यह कथा अत्यन्त पवित्र है, एकबार सुनने पर निश्चयपूर्वक पाप-समूह को जला देती है, श्राद्ध में पाठ करने पर पितरों को सन्तोष प्रदान करती है तथा प्रतिदिन सुन्दर पाठ करने पर मोक्ष देती है ।

इति श्रीपद्मपुराणे उत्तरखण्डे श्रीमद्भागवतमहात्म्ये विप्रमोक्षो नाम पञ्चमः अध्यायः ॥५॥

अथ षष्ठः अध्यायः

प्रथमः श्लोकः

कुमारा ऊचुः—

अथ ते सम्प्रवक्ष्यामः सप्ताहश्रवणे विधिम् ।
सहायैर्वसुभिश्चैव प्रायः साध्यो विधिः स्मृतः ॥१॥

पदच्छेद—

अथ ते सम्प्रवक्ष्यामः, सप्ताह श्रवणे विधिम् ।
सहायैः वसुभिः च एव, प्रायः साध्यः विधिः स्मृतः ॥

शब्दार्थ—

अथ	१.	अब (मैं)	वसुभिः	११.	धन से
ते	२.	आपको	च	१०.	और
सम्प्रवक्ष्यामः	६.	बताऊँगा	एव	१२.	ही
सप्ताह	३.	श्रीमद्भागवत सप्ताह	प्रायः	८.	अधिकतर
श्रवणे	४.	सुनने की	साध्यः	१३.	सम्पन्न की जाने वाली
विधिम् ।	५	विधि को	विधिः	७.	(यह) विधि
सहायैः	९.	सहायकों	स्मृतः ॥	१४.	कही गयी है

श्लोकार्थ—अब मैं आपको श्रीमद्भागवत सप्ताह सुनने की विधि को बताऊँगा। यह विधि अधिकतर सहायकों और धन से ही सम्पन्न की जाने वाली कही गयी है।

द्वितीयः श्लोकः

दैवज्ञं तु समाहूय मुहूर्त्तं पृच्छ्य यत्नतः ।
विवाहे यादृशं वित्तं तादृशं परिकल्पयेत् ॥२॥

पदच्छेद—

दैवज्ञम् तु समाहूय, मुहूर्त्तम् पृच्छ्य यत्नतः ।
विवाहे यादृशम् वित्तम्, तादृशम् परिकल्पयेत् ॥

शब्दार्थ—

दैवज्ञम्	१.	ज्योतिषी को	विवाहे	६.	विवाह में
तु	३.	तथा	यादृशम्	७.	जितना
समाहूय	२.	बुलाकर	वित्तम्	८.	धन (लगता है)
मुहूर्त्तम्	४.	शुभ मुहूर्त्त	तादृशम्	१०.	उतना (धन)
पृच्छ्य	५.	पूछकर	परिकल्पयेत् ॥	११.	इकट्ठा करना चाहिए
यत्नतः ।	९.	प्रयत्न पूर्वक			

श्लोकार्थ—ज्योतिषी को बुलाकर तथा शुभ मुहूर्त्त पूछकर विवाह में जितना धन लगता है; प्रयत्न पूर्वक उतना धन इकट्ठा करना चाहिए।

तृतीयः श्लोकः

नभस्य आश्विनोर्जौ च मार्गशीर्षः शुचिर्नभाः ।

एते मासाः कथारम्भे श्रोतॄणां मोक्षसूचकाः ॥३॥

पदच्छेद—

नभस्यः आश्विन ऊर्जौ च, मार्गशीर्षः शुचिः नभाः ।

एते मासाः कथा आरम्भे, श्रोतॄणाम् मोक्ष सूचकाः ॥

शब्दार्थ—

नभस्यः	५.	भादो	**एते**	१०.	ये (छः)
आश्विन	६.	क्वार	**मासाः**	११.	महीने
ऊर्जौ	७.	कार्तिक	**कथा**	१.	श्रीमद्भागवत कथा
च	८.	और	**आरम्भे**	२.	प्रारम्भ करने में
मार्गशीर्षः	९.	अगहन	**श्रोतॄणाम्**	१२.	श्रोताओं के
शुचिः	३.	आषाढ़	**मोक्ष**	१३.	मोक्ष के
नभाः ।	४.	श्रावण	**सूचकाः ॥**	१४.	कारण (हैं)

श्लोकार्थ—श्रीमद्भागवत कथा प्रारम्भ करने में आषाढ़, श्रावण, भादो, क्वार, कार्तिक और अगहन ये छः महीने श्रोताओं के मोक्ष के कारण हैं ।

चतुर्थः श्लोकः

मासानां विप्र हेयानि तानि त्याज्यानि सर्वथा ।

सहायाश्चेतरे तत्र कर्तव्याः सोद्यमाश्च ये ॥४॥

पदच्छेद—

मासानाम् विप्र हेयानि, तानि त्याज्यानि सर्वथा ।

सहायाः च इतरे तत्र, कर्तव्याः स उद्यमाः च ये ॥

शब्दार्थ—

मासानाम्	२.	महीनों में	**च**	८.	और
विप्र	१.	हे विप्र !	**इतरे**	११.	(उन) अन्य लोगों को
हेयानि	३.	(जो) निन्दित (हैं)	**तत्र**	५.	सप्ताह-यज्ञ में
तानि	४.	उन्हें	**कर्तव्याः**	१४.	बनाना चाहिये
त्याज्यानि	७.	छोड़ देना चाहिये	**स उद्यमाः**	१०.	परिश्रमी (हैं)
सर्वथा ।	६.	बिल्कुल	**च**	१२.	भी
सहायाः	१३.	सहायक	**ये ॥**	९.	जो

श्लोकार्थ—हे विप्र ! महीनों में जो निन्दित हैं, उन्हें सप्ताह-यज्ञ में बिल्कुल छोड़ देना चाहिये और जो परिश्रमी हैं, उन अन्य लोगों को भी सहायक बनाना चाहिये ।

पञ्चमः श्लोकः

देशे देशे तथा सेयं वार्ता प्रेष्या प्रयत्नतः ।
भविष्यति कथा चात्र आगन्तव्यं कुटुम्बिभिः ॥५॥

पदच्छेद—

देशे देशे तथा सा इयम्, वार्ता प्रेष्या प्रयत्नतः ।
भविष्यति कथा च अत्र, आगन्तव्यम् कुटुम्बिभिः ॥

शब्दार्थ—

देशे	२.	प्रत्येक	प्रयत्नतः ।	७.	प्रयासपूर्वक
देशे	३.	स्थान पर	भविष्यति	१२.	होगी (आपको)
तथा	१.	तथा	कथा	११.	श्रीमद्भागवत की कथा
सा	४.	कथा सुनने के	च	९.	कि
इयम्	५.	इस	अत्र	१०.	यहाँ पर
वार्ता	६.	समाचार को	आगन्तव्यम्	१४.	आना चाहिये
प्रेष्या	८.	भेजना चाहिए	कुटुम्बिभिः ॥	१३.	परिवार के साथ

श्लोकार्थ—तथा प्रत्येक स्थान पर कथा सुनने के इस समाचार को प्रयासपूर्वक भेजना चाहिए कि वहाँ पर श्रीमद्भागवत की कथा होगी। आपको परिवार के साथ आना चाहिए।

षष्ठः श्लोकः

दूरेहरिकथाः केचिद् दूरेचाच्युतकीर्तनाः ।
स्त्रियः शूद्रादयो ये च तेषां बोधो यतो भवेत् ॥६॥

पदच्छेद—

दूरे हरि कथाः केचित्, दूरे च अच्युत कीर्तनाः ।
स्त्रियः शूद्र आदयः ये च, तेषाम् बोधः यतः भवेत् ॥

शब्दार्थ—

दूरे	७.	दूर	शूद्र	३.	शूद्र
हरि कथाः	६.	भगवान् की कथा से	आदयः	४.	इत्यादि
केचित्	९.	कुछ (जो)	ये	५.	जो
दूरे	१२.	अलग (हो गये हैं)	च	२.	और
च	८.	तथा	तेषाम्	१३.	उन्हें (भी)
अच्युत	१०.	श्री कृष्ण के	बोधः	१४.	सूचना
कीर्तनाः ।	११.	भजन से	यतः	१६.	ऐसा उपाय करना चाहिए
स्त्रियः	१.	स्त्रियाँ	भवेत् ॥	१५.	हो जाय

श्लोकार्थ—स्त्रियाँ और शूद्र इत्यादि जो भगवान् की कथा से दूर तथा कुछ जो श्रीकृष्ण के भजन से अलग हो गये हैं, उन्हें भी सूचना हो जाय, ऐसा उपाय करना चाहिए।

सप्तमः श्लोकः

देशे देशे विरक्ता ये वैष्णवाः कीर्तनोत्सुकाः ।
तेष्वेव पत्रं प्रेष्यं च तल्लेखनमितीरितम् ॥७॥

पदच्छेद—

देशे देशे विरक्ताः ये, वैष्णवाः कीर्तन उत्सुकाः ।
तेषु एव पत्रम् प्रेष्यम् च, तद् लेखनम् इति ईरितम् ॥

शब्दार्थ—

देशे	१.	स्थान	एव	९.	अवश्य
देशे	२.	स्थान पर	पत्रम्	१०.	पत्र
विरक्ताः	६.	वैरागी (और)	प्रेष्यम्	११.	भेजना चाहिए
ये	५.	जो	च	१२.	तथा
वैष्णवाः	७.	वैष्णव जन (हैं)	तद्	१३.	उस (पत्र) का
कीर्तन	३.	भजन के	लेखनम्	१४.	लेख
उत्सुकाः ।	४.	प्रेमी	इति	१५.	ऐसा
तेषु	८.	उनके पास	ईरितम् ॥	१६.	होना चाहिए

श्लोकार्थ—स्थान-स्थान पर भजन के प्रेमी जो वैरागी और वैष्णव जन हैं, उनके पास अवश्य पत्र भेजना चाहिए तथा उस पत्र का लेख ऐसा होना चाहिए ।

अष्टमः श्लोकः

सतां समाजो भविता सप्तरात्रं सुदुर्लभः ।
अपूर्वरसरूपैव कथा चात्र भविष्यति ॥८॥

पदच्छेद—

सताम् समाजः भविता, सप्तरात्रम् सुदुर्लभः ।
अपूर्व रस रूपा एव, कथा च अत्र भविष्यति ॥

शब्दार्थ—

सताम्	३.	सज्जनों का	रस रूपा	१०.	रस से पूर्ण
समाजः	५.	समागम	एव	८.	निश्चय ही
भविता	६.	होगा	कथा	११.	श्रीमद्भागवत की कथा
सप्तरात्रम्	२.	सात रात्रों तक	च	७.	तथा
सुदुर्लभः ।	४.	बड़ा दुर्लभ	अत्र	१.	यहाँ पर
अपूर्व	९.	अद्भुत	भविष्यति ॥	१२.	होगी

श्लोकार्थ—यहाँ पर सात रातों तक सज्जनों का बड़ा दुर्लभ समागम होगा तथा निश्चय ही अद्भुत रस से पूर्ण श्रीमद्भागवत की कथा होगी ।

नवमः श्लोकः

श्रीभागवतपीयूषपानाय रसलम्पटाः ।
भवन्तश्च तथा शीघ्रमायात प्रेमतत्पराः ॥९॥

पदच्छेद—

श्रीभागवत पीयूष, पानाय रस लम्पटाः ।
भवन्तः च तथा शीघ्रम्, आयात प्रेम तत्पराः ॥

शब्दार्थ—

श्रीभागवत	६.	श्रीमद्भागवत कथारूपी	च	३.	और
पीयूष	७.	अमृत का	तथा	१.	तथा
पानाय	८.	पान करने के लिए	शीघ्रम्	९.	तत्काल
रस लम्पटाः ।	२.	रस के लोभी	आयात	१०.	पधारें
भवन्तः	५.	आप लोग	प्रेम तत्पराः ॥	४.	प्रेम में मतवाले

श्लोकार्थ—तथा रस के लोभी और प्रेम में मतवाले आप लोग श्रीमद्भागवत कथारूपी अमृत का पान करने के लिए तत्काल पधारें ।

दशमः श्लोकः

नावकाशः कदाचिच्चेद्दिनमात्रं तथापि तु ।
सर्वथाऽऽगमनं कार्यं क्षणोऽत्रैव सुदुर्लभः ॥१०॥

पदच्छेद—

न अवकाशः कदाचित् चेत्, दिनमात्रम् तथापि तु ।
सर्वथा आगमनम् कार्यम्, क्षणः अत्र एव सुदुर्लभः ॥

शब्दार्थ—

न	४.	नहीं (मिले)	सर्वथा	७.	अवश्य
अवकाशः	३.	समय	आगमनम्	८.	उपस्थित
कदाचित्	२.	कदाचित्	कार्यम्	९.	हों
चेत्	१.	यदि (आपको)	क्षणः	१२.	एक क्षण
दिन मात्रम्	६.	एक ही दिन के लिए	अत्र	११.	यहाँ का
तथापि	५.	तो भी	एव	१३.	भी
तु ।	१०.	क्योंकि	सुदुर्लभः ॥	१४.	अत्यन्त दुर्लभ (है)

श्लोकार्थ—यदि आपको कदाचित् समय नहीं मिले, तो भी एक ही दिन के लिए अवश्य उपस्थित हों, क्योंकि यहाँ का एक क्षण भी अत्यन्त दुर्लभ है ।

एकादशः श्लोकः

एवमाकारणं तेषां कर्तव्यं विनयेन च ।
आगन्तुकानां सर्वेषां वासस्थानानि कल्पयेत् ॥११॥

पदच्छेद—

एवम् आकारणम् तेषाम्, कर्तव्यम् विनयेन च ।
आगन्तुकानाम् सर्वेषाम्, वास स्थानानि कल्पयेत् ॥

शब्दार्थ—

एवम्	१. इस प्रकार		च ।	६. और
आकारणम्	४. आमन्त्रण		आगन्तुकानाम्	७. आये हुए
तेषाम्	३. उनका		सर्वेषाम्	८. सभी जनों के
कर्तव्यम्	५. करना चाहिए		वास, स्थानानि	९. रहने के वास्ते, स्थान
विनयेन	२. विनीतभाव से		कल्पयेत् ॥	१०. बनाना चाहिए

श्लोकार्थ—इस प्रकार विनीत भाव से उनका आमन्त्रण करना चाहिए और आये हुए सभी जनों के रहने के वास्ते स्थान बनाना चाहिए ।

द्वादशः श्लोकः

तीर्थे वापि वने वापि गृहे वा श्रवणं मतम् ।
विशाला वसुधा यत्र कर्तव्यं तत् कथास्थलम् ॥१२॥

पदच्छेद—

तीर्थे वापि वने वापि, गृहे वा श्रवणम् मतम् ।
विशाला वसुधा यत्र, कर्तव्यम् तत् कथा स्थलम् ॥

शब्दार्थ—

तीर्थे	१. तीर्थ में		मतम् ।	८. उत्तम (है)
वापि	२. अथवा		विशाला	१०. लम्बी-चौड़ी
वने	३. वन में		वसुधा	११. भूमि (हो)
वापि	४. या		यत्र	९. जहाँ पर
गृहे	५. घर में		कर्तव्यम्	१४. बनाना चाहिए
वा	६. भी		तत्	१२. उसे
श्रवणम्	७. (कथा) सुनना		कथा स्थलम् ।	१३. कथा का स्थान

श्लोकार्थ—तीर्थ में अथवा वन में या घर में भी कथा सुनना उत्तम है । जहाँ पर लम्बी-चौड़ी भूमि हो; उसे कथा का स्थान बनाना चाहिए ।

त्रयोदशः श्लोकः

शोधनं मार्जनं भूमेर्लेपनं धातुमण्डनम् ।
गृहोपस्करमुद्धृत्य गृहकोणे निवेशयेत् ॥१३॥

पदच्छेद—

शोधनम् मार्जनम् भूमेः, लेपनम् धातु मण्डनम् ।
गृह उपस्करम् उद्धृत्य, गृह कोणे निवेशयेत् ॥

शब्दार्थ—

शोधनम्	२. देखकर	मण्डनम् ।	६. सजावे (तथा)
मार्जनम्	३. झाड़े	गृह उपस्करम्	७. घर के, सामानों को
भूमेः	१. भूमि को	उद्धृत्य	८. उठाकर
लेपनम्	४. लीपे (और)	गृह कोणे	९. घर के कोने में
धातु	५. रंग-विरंगी गैरिकादि धातुओं से	निवेशयेत् ॥	१०. रख देना चाहिये

श्लोकार्थ—भूमि को देखकर झाड़े, लीपे और रंग-विरंगी गैरिकादि धातुओं से सजावे तथा घर के सामानों को उठाकर घर के कोने में रख देना चाहिए ।

चतुर्दशः श्लोकः

अर्वाक्पञ्चाहतो यत्नादास्तीर्णानि प्रमेलयेत् ।
कर्तव्यो मण्डपः प्रोच्चैः कदलीखण्डमण्डितः ॥१४॥

पदच्छेद—

अर्वाक् पञ्च अहतः यत्नात्, आस्तीर्णानि प्रमेलयेत् ।
कर्तव्यः मण्डपः प्रोच्चैः, कदली खण्ड मण्डितः ॥

शब्दार्थ—

अर्वाक्	३. पहले से (ही)	कर्तव्यः	१२. बनाना चाहिए
पञ्च	१. पाँच	मण्डपः	११. मण्डप
अहतः	२. दिन	प्रोच्चैः	१०. ऊँचा
यत्नात्	४. परिश्रम के साथ	कदली	७. केले के
आस्तीर्णानि	५. विस्तरों को	खण्ड	८. खम्भों से
प्रमेलयेत् ।	६. इकट्ठा करना चाहिए (तथा)	मण्डितः ॥	९. सुशोभित (एक)

श्लोकार्थ—पाँच दिन पहले से ही परिश्रम के साथ विस्तरों को इकट्ठा करना चाहिए तथा केले के खम्भों से सुशोभित एक ऊँचा मण्डप बनाना चाहिए ।

पञ्चदशः श्लोकः

फलपुष्पदलैर्विष्वग्वितानेन विराजितः ।
चतुर्दिक्षु ध्वजारोपो बहुसम्पद्विराजितः ॥१५॥

पदच्छेद—

फल पुष्प दलैः विष्वक्, वितानेन विराजितः ।
चतुर् दिक्षु ध्वज आरोपः, बहु सम्पद् विराजितः ॥

शब्दार्थ—

फल	२. फल		चतुर् दिक्षु	७. चारों दिशाओं में
पुष्प	३. फूल और		ध्वज	८. पताका
दलैः	४. पत्तों से (तथा)		आरोपः	९. लगावे (और)
विष्वक्	१. (मण्डप के) चारों ओर		बहु	१०. बहुत सी
वितानेन	५. चँदोवे से		सम्पद्	११. मांगलिक वस्तुओं से
विराजितः ।	६. अलंकृत (करे)		विराजितः ॥	१२. सजावे

श्लोकार्थ—मण्डप के चारों ओर फल, फूल और पत्तों से तथा चँदोवे से अलंकृत करे, चारों दिशाओं में पताका लगावे और बहुत सी मांगलिक वस्तुओं से सजावे ।

षोडशः श्लोकः

ऊर्ध्वं सप्तैव लोकाश्च कल्पनीयाः सविस्तरम् ।
तेषु विप्रा विरक्ताश्च स्थापनीयाः प्रबोध्य च ॥१६॥

पदच्छेद—

ऊर्ध्वम् सप्त एव लोकाः च, कल्पनीयाः सविस्तरम् ।
तेषु विप्राः विरक्ताः च, स्थापनीयाः प्रबोध्य च ॥

शब्दार्थ—

ऊर्ध्वम्	२. (मण्डप के) आगे		तेषु	९. उनमें
सप्त	४. सात		विप्राः	१०. ब्राह्मणों
एव	५. ही		विरक्ताः	१२. वैरागियों को
लोकाः	६. बैठक		च	८. और
च	१. तथा		स्थापनीयाः	१४. बैठावे
कल्पनीयाः	७. बनावे		प्रबोध्य	१३. बुलाकर
सविस्तरम् ।	३. विस्तार पूर्वक		च ॥	११. तथा

श्लोकार्थ—तथा मण्डप के आगे विस्तार-पूर्वक सात ही बैठक बनावे और उनमें ब्राह्मणों तथा वैरागियों को बुलाकर बैठावे ।

सप्तदशः श्लोकः

पूर्वं तेषामासनानि कर्तव्यानि यथोत्तरम् ।
वक्तुश्चापि तदा दिव्यमासनं परिकल्पयेत् ॥१७॥

पदच्छेद—

पूर्वम् तेषाम् आसनानि, कर्तव्यानि यथोत्तरम् ।
वक्तुः च अपि तदा दिव्यम्, आसनम् परिकल्पयेत् ॥

शब्दार्थ—

पूर्वम्	१.	पहले	च	६.	और
तेषाम्	२.	उन (ब्राह्मणों और विरक्तों) के	अपि	९.	भी
आसनानि	३.	आसनों को	तदा	७.	उस समय
कर्तव्यानि	५.	लगाना चाहिए	दिव्यम्	१०.	एक सुन्दर
यथोत्तरम् ।	४.	क्रम से	आसनम्	११.	आसन
वक्तुः	८.	वक्ता का	परिकल्पयेत् ॥	१२.	बिछावे

श्लोकार्थ—पहले उन ब्राह्मणों और विरक्तों के आसनों को क्रम से लगाना चाहिए और उस समय वक्ता का भी एक सुन्दर आसन बिछावे ।

अष्टादशः श्लोकः

उदङ्मुखो भवेद्वक्ता श्रोता वै प्राङ्मुखस्तदा ।
प्राङ्मुखश्चेद्भवेद्वक्ता श्रोता चोदङ्मुखस्तदा ॥१८॥

पदच्छेद—

उदङ् मुखः भवेत् वक्ता, श्रोता वै प्राङ् मुखः तदा ।
प्राङ् मुखः चेत् भवेत् वक्ता, श्रोता च उदङ् मुखः तदा ॥

शब्दार्थ—

उदङ् मुखः	२.	उत्तर मुख	चेत्	१०.	यदि
भवेत्	३.	होवे	भवेत्	१२.	हों
वक्ता	१.	कथावाचक	वक्ता	९.	कथावाचक
श्रोता	५.	सुनने वाले को	श्रोता	१४.	सुनने वाले को
वै	७.	ही (बैठना चाहिए)	च	८.	और
प्राङ् मुखः	६.	पूर्वमुख	उदङ् मुखः	१५.	उत्तर मुख (बैठना चाहिये)
तदा ।	४.	तो	तदा ॥	१३.	तो
प्राङ् मुखः	११.	पूर्वमुख			

श्लोकार्थ—कथावाचक उत्तरमुख होवे तो सुनने वाले को पूर्वमुख ही बैठना चाहिए और कथावाचक यदि पूर्वमुख हों तो सुनने वाले को उत्तरमुख बैठना चाहिए ।

एकोनविंशः श्लोकः

अथवा पूर्वदिग्ज्ञेया पूज्यपूजकमध्यतः ।
श्रोतॄणामागमे प्रोक्ता देशकालादिकोविदैः ॥१६॥

पदच्छेद—

अथवा पूर्व दिक् ज्ञेया, पूज्य पूजक मध्यतः ।
श्रोतॄणाम् आगमे प्रोक्ता, देश काल आदि कोविदैः ॥

शब्दार्थ—

अथवा	१.	अथवा	श्रोतॄणाम्	१०.	श्रोताओं के लिए
पूर्व दिक्	५.	पूर्व दिशा	आगमे	११.	(यही) नियम
ज्ञेया	६.	रहनी चाहिए	प्रोक्ता	१२.	कहा है
पूज्य	२.	वक्ता और	देश काल	७.	देश-काल
पूजक	३.	श्रोता के	आदि	८.	इत्यादि के
मध्यतः ।	४.	बीच	कोविदैः ॥	६.	विद्वानों ने

श्लोकार्थ—अथवा वक्ता और श्रोता के बीच पूर्व दिशा रहनी चाहिए। देश-काल इत्यादि के विद्वानों ने श्रोताओं के लिए यही नियम कहा है।

विंशः श्लोकः

विरक्तो वैष्णवो विप्रो वेदशास्त्रविशुद्धिकृत् ।
दृष्टान्तकुशलो धीरो वक्ता कार्योऽतिनिःस्पृहः ॥२०॥

पदच्छेद—

विरक्तः वैष्णवः विप्रः, वेद शास्त्र विशुद्धि कृत् ।
दृष्टान्त कुशलः धीरः, वक्ता कार्यः अति निःस्पृहः ॥

शब्दार्थ—

विरक्तः	८.	वैरागी	दृष्टान्त	४.	उदाहरण देने में
वैष्णवः	६.	वैष्णव	कुशलः	५.	चतुर
विप्रः	१०.	ब्राह्मण को	धीरः	६.	गम्भीर (और)
वेद शास्त्र	१.	वेद और शास्त्रों के अनुसार	वक्ता	११.	कथावाचक
विशुद्धि	२.	निर्मल	कार्यः	१२.	बनाना चाहिए
कृत् ।	३.	कर्म करने वाले	अति निःस्पृहः ॥	७.	अत्यन्त निर्लोभी

श्लोकार्थ—वेद और शास्त्रों के अनुसार निर्मल कर्म करने वाले, उदाहरण देने में चतुर, गम्भीर और अत्यन्त निर्लोभी वैरागी वैष्णव ब्राह्मण को कथावाचक बनाना चाहिए।

एकविंशः श्लोकः

अनेकधर्मविभ्रान्ताः स्त्रैणाः पाखण्डवादिनः ।
शुकशास्त्रकथोच्चारे त्याज्यास्ते यदि पण्डिताः ॥२१॥

पदच्छेद—

अनेक धर्म विभ्रान्ताः, स्त्रैणाः पाखण्ड वादिनः ।
शुक शास्त्र कथा उच्चारे, त्याज्याः ते यदि पण्डिताः ॥

शब्दार्थ—

अनेक	१. अनेक		कथा	१०. कथा के
धर्म	२. धर्मों के		उच्चारे	११. प्रवचन में
विभ्रान्ताः	३. चक्कर में पड़े हुए		त्याज्याः	१२. नहीं लेना चाहिए
स्त्रैणाः	४. स्त्रियों के बीच रहने वाले		ते	८. उसे
पाखण्ड वादिनः ।	५. पाखण्ड के प्रचारक को		यदि	७. भी
शुक शास्त्र	९. श्रीमद्भागवत की		पण्डिताः ॥	६. पण्डित होने पर

श्लोकार्थ— अनेक धर्मों के चक्कर में पड़े हुए, स्त्रियों के बीच रहने वाले तथा पाखण्ड के प्रचारक को पण्डित होने पर भी उसे श्रीमद्भागवत की कथा के प्रवचन में नहीं लेना चाहिये ।

द्वाविंशः श्लोकः

वक्तुः पार्श्वे सहायार्थमन्यः स्थाप्यस्तथाविधः ।
पण्डितः संशयच्छेत्ता लोकबोधनतत्परः ॥२२॥

पदच्छेद—

वक्तुः पार्श्वे सहायार्थम् , अन्यः स्थाप्यः तथाविधः ।
पण्डितः संशय छेत्ता, लोक बोधन तत्परः ॥

शब्दार्थ—

वक्तुः	१. कथा वाचक के	पण्डितः	११. विद्वान् को
पार्श्वे	२. पास में	संशय	७. संदेह
सहायार्थम्	३. सहायता के लिए	छेत्ता	८. मिटाने वाले
अन्यः	१०. एक दूसरे	लोक	४. लोगों को
स्थाप्यः	१२. बैठाना चाहिए	बोधन	५. समझाने में
तथाविधः ।	९. उसी प्रकार के	तत्परः ॥	६. कुशल (एवं)

श्लोकार्थ—कथावाचक के पास में सहायता के लिए लोगों को समझाने में कुशल एवं संदेह मिटाने वाले उसी प्रकार के एक दूसरे विद्वान् को बैठाना चाहिए ।

त्रयोविंशः श्लोकः

वक्त्रा क्षौरं प्रकर्तव्यं दिनादर्वाग्व्रताप्तये ।
अरुणोदयेऽसौ निर्वर्त्य शौचं स्नानं समाचरेत् ॥२३॥

पदच्छेद—

वक्त्रा क्षौरम् प्रकर्तव्यम् , दिनात् अर्वाक् व्रत आप्तये ।
अरुण उदये असौ निर्वर्त्य, शौचम् स्नानम् समाचरेत् ॥

शब्दार्थ—

वक्त्रा	१.	कथावाचक	**अरुण उदये**	८.	सूर्योदय से पूर्व
क्षौरम्	५.	क्षौर कर्म	**असौ**	७.	वह
प्रकर्तव्यम्	६.	करा लेवे (तथा)	**निर्वर्त्य**	१०.	निवृत्त होकर
दिनात्	३.	एक दिन	**शौचम्**	९.	शौचादि क्रियाओं से
अर्वाक्	४.	पहले	**स्नानम्**	११.	स्नान
व्रत आप्तये ।	२.	व्रत करने के लिए	**समाचरेत् ॥**	१२.	करे

श्लोकार्थ—कथावाचक व्रत करने के लिए एक दिन पहले क्षौर कर्म करा लेवे तथा वह सूर्योदय से पूर्व शौचादि क्रियाओं से निवृत्त होकर स्नान करे।

चतुर्विंशः श्लोकः

नित्यं संक्षेपतः कृत्वा सन्ध्याद्यं स्वं प्रयत्नतः ।
कथाविघ्नविघाताय गणनाथं प्रपूजयेत् ॥२४॥

पदच्छेद—

नित्यम् संक्षेपतः कृत्वा, सन्ध्या आद्यम् स्वम् प्रयत्नतः ।
कथा विघ्न विघाताय, गणनाथम् प्रपूजयेत् ॥

शब्दार्थ—

नित्यम्	१.	(वह वक्ता) प्रतिदिन	**प्रयत्नतः ।**	१०.	प्रयास-पूर्वक
संक्षेपतः	२.	संक्षेप से	**कथा**	७.	कथा की
कृत्वा	६.	सम्पन्न करके	**विघ्न**	८.	बाधाओं को
सन्ध्या	४.	संध्या वन्दन	**विघाताय**	९.	दूर करने के लिए
आद्यम्	५.	इत्यादि कर्म को	**गणनाथम्**	११.	गणेशजी का
स्वम्	३.	अपने	**प्रपूजयेत् ॥**	१२.	पूजन करे

श्लोकार्थ—वह वक्ता प्रतिदिन संक्षेप से अपने संध्या-वन्दन इत्यादि कर्म को सम्पन्न करके कथा की बाधाओं को दूर करने के लिए प्रयास-पूर्वक गणेश जी का पूजन करे।

पञ्चविंशः श्लोकः

पितॄन् संतर्प्य शुद्ध्यर्थं प्रायश्चित्तं समाचरेत् ।
मण्डलं च प्रकर्तव्यं तत्र स्थाप्यो हरिस्तथा ॥२५॥

पदच्छेद—

पितॄन् संतर्प्य शुद्ध्यर्थम् , प्रायश्चित्तम् समाचरेत् ।
मण्डलम् च प्रकर्तव्यम् , तत्र स्थाप्यः हरिः तथा ॥

शब्दार्थ—

पितॄन्	१.	पितरों का	च	६.	तदनन्तर
संतर्प्य	२.	तर्पण करके	प्रकर्तव्यम्	८.	निर्माण करे
शुद्ध्यर्थम्	३.	शरीर शुद्धि के लिए	तत्र	१०.	उसमें
प्रायश्चित्तम्	४.	प्रायश्चित्त	स्थाप्यः	१२.	स्थापना करे
समाचरेत् ।	५.	करे	हरिः	११.	भगवान् श्री हरि की
मण्डलम्	७.	सर्वतोभद्रमण्डल का	तथा ॥	९.	तथा

श्लोकार्थ—पितरों का तर्पण करके शरीर शुद्धि के लिए प्रायश्चित्त करे । तदनन्तर सर्वतोभद्रमण्डल का निर्माण करे तथा उसमें भगवान् श्रीहरि की स्थापना करे ।

षड्विंशः श्लोकः

कृष्णमुद्दिश्य मन्त्रेण चरेत्पूजाविधिं क्रमात् ।
प्रदक्षिणनमस्कारान् पूजान्ते स्तुतिमाचरेत् ॥२६॥

पदच्छेद—

कृष्णम् उद्दिश्य मन्त्रेण, चरेत् पूजा विधिम् क्रमात् ।
प्रदक्षिण नमस्कारान् , पूजा अन्ते स्तुतिम् आचरेत् ॥

शब्दार्थ—

कृष्णम्	१.	भगवान् श्रीकृष्ण को	प्रदक्षिण	१०.	प्रदक्षिणा (एवं)
उद्दिश्य	२.	ध्यान में रखकर	नमस्कारान्	११.	नमस्कार
मन्त्रेण	३.	मन्त्रों द्वारा	पूजा	७.	पूजा के
चरेत्	६.	सम्पन्न करे (और)	अन्ते	८.	अन्त में
पूजा, विधिम्	५.	पूजन, क्रिया को	स्तुतिम्	९.	प्रार्थना
क्रमात् ।	४.	क्रम से	आचरेत् ।	१२.	करे

श्लोकार्थ—भगवान् श्रीकृष्ण को ध्यान में रखकर मन्त्रों द्वारा क्रम से पूजन-क्रिया को सम्पन्न करे और पूजा के अन्त में प्रार्थना, प्रदक्षिणा एवम् नमस्कार करे ।

सप्तविंशः श्लोकः

संसारसागरे मग्नं दीनं मां करुणानिधे ।
कर्ममोहगृहीताङ्गं मामुद्धर भवार्णवात् ॥२७॥

पदच्छेद—

संसार सागरे मग्नम्, दीनम् माम् करुणानिधे ।
कर्म मोह गृहीत अङ्गम्, माम् उद्धर भव अर्णवात् ॥

शब्दार्थ—

संसार	२.	संसार रूपी	मोह	७.	अज्ञान से
सागरे	३.	समुद्र में	गृहीत	८.	जकड़े हुए
मग्नम्	४.	डूबे हुए	अङ्गम्	९.	शरीर वाले
दीनम्	११.	अनाथ का	माम्	५.	तथा
माम्	१०.	मुझ	उद्धर	१४.	उद्धार करो
करुणानिधे ।	१.	हे दया के सागर !	भव	१२.	संसार रूपी
कर्म	६.	कर्म और	अर्णवात् ॥	१३.	सागर से

श्लोकार्थ—हे दया के सागर ! संसार रूपी समुद्र में डूबे हुए तथा कर्म और अज्ञान से जकड़े हुए शरीर वाले मुझ अनाथ का संसार रूपी सागर से उद्धार करो ।

अष्टाविंशः श्लोकः

श्रीमद्भागवतस्यापि ततः पूजा प्रयत्नतः ।
कर्तव्या विधिना प्रीत्या धूपदीपसमन्विता ॥२८॥

पदच्छेद—

श्रीमद्भागवतस्य अपि, ततः पूजा प्रयत्नतः ।
कर्तव्या विधिना प्रीत्या, धूप दीप समन्विता ॥

शब्दार्थ—

श्रीमद्भागवतस्य	२.	श्रीमद्भागवत पुराण का	कर्तव्या	१०.	करना चाहिए
अपि	३.	भी	विधिना	५.	विधि-विधान से
ततः	१.	तदनन्तर	प्रीत्या	६.	प्रेमपूर्वक
पूजा	९.	पूजन	धूप दीप	७.	धूप-दीप के
प्रयत्नतः ।	४.	प्रयत्नपूर्वक	समन्विता ॥	८.	साथ

श्लोकार्थ—तदनन्तर श्रीमद्भागवत पुराण का भी प्रयत्न-पूर्वक विधि-विधान से प्रेम-पूर्वक धूप-दीप के साथ पूजन करना चाहिए ।

एकोनत्रिंशः श्लोकः

ततस्तु श्रीफलं धृत्वा नमस्कारं समाचरेत् ।
स्तुतिः प्रसन्नचित्तेन कर्तव्या केवलं तदा ॥२९॥

पदच्छेद—

ततः तु श्रीफलम् धृत्वा, नमस्कारम् समाचरेत् ।
स्तुतिः प्रसन्न चित्तेन, कर्तव्या केवलम् तदा ॥

शब्दार्थ—

ततः	१. उसके वाद	स्तुतिः	११. प्रार्थना
तु	६. तथा	प्रसन्न	८. प्रसन्न
श्रीफलम्	२. नारियल	चित्तेन	९. मन से
धृत्वा	३. चढ़ाकर	कर्तव्या	१२. करनी चाहिये
नमस्कारम्	४. प्रणाम	केवलम्	१०. केवल
समाचरेत् ।	५. करे	तदा ॥	७. उस समय

श्लोकार्थ—उसके वाद नारियल चढ़ाकर प्रणाम करे तथा उस समय प्रसन्न मन से केवल प्रार्थना करनी चाहिये ।

त्रिंशः श्लोकः

श्रीमद्भागवताख्योऽयं प्रत्यक्षः कृष्ण एव हि ।
स्वीकृतोऽसि मया नाथ मुक्त्यर्थं भवसागरे ॥३०॥

पदच्छेद—

श्रीमद्भागवत आख्यः अयम्, प्रत्यक्षः कृष्णः एव हि ।
स्वीकृतः असि मया नाथ, मुक्ति अर्थम् भव सागरे ॥

शब्दार्थ—

श्रीमद्भागवत	१. श्रीमद्भागवत	स्वीकृतः	१३. स्वीकार किये गये
आख्यः	२. नाम का	असि	१४. हैं
अयम्	३. यह (पुराण)	मया	१२. मेरे द्वारा
प्रत्यक्षः	४. साक्षात्	नाथ	८. हे स्वामिन् ! (आप)
कृष्णः	५. भगवान् श्रीकृष्णचन्द्र का	मुक्ति अर्थम्	११. मुक्ति के निमित्त
एव	६. ही (रूप है)	भव	९. संसार रूपी
हि ।	७. अतः	सागरे ॥	१०. सागर में

श्लोकार्थ—श्रीमद्भागवत नाम का यह पुराण साक्षात् भगवान् श्रीकृष्ण का ही रूप है । अतः हे स्वामिन् ! आप संसार रूपी सागर में मुक्ति के निमित्त मेरे द्वारा स्वीकार किये गये हैं ।

एकत्रिंशः श्लोकः

मनोरथो मदीयोऽयं सफलः सर्वथा त्वया ।
निर्विघ्नेनैव कर्तव्यो दासोऽहं तव केशव ॥३१॥

पदच्छेद—

मनोरथः मदीयः अयम् , सफलः सर्वथा त्वया ।
निर्विघ्नेन एव कर्तव्यः, दासः अहम् तव केशव ॥

शब्दार्थ—

मनोरथः	८.	मनोकामना को	निर्विघ्नेन	१०.	बिना बाधा के
मदीयः	६.	मेरी	एव	११.	ही
अयम्	७.	इस	कर्तव्यः	१३.	करें
सफलः	१२.	सफल	दासः	४.	दास (हूँ)
सर्वथा	९.	सब तरह से	अहम्	२.	मैं
त्वया ।	५.	आप	तव	३.	आपका
			केशव ॥	१.	हे केशव !

श्लोकार्थ—हे केशव ! मैं आपका दास हूँ । आप मेरी इस मनोकामना को सब तरह से बिना बाधा के ही सफल करें ।

द्वात्रिंशः श्लोकः

एवं दीनवचः प्रोच्य वक्तारं चाथ पूजयेत् ।
सम्भूष्य वस्त्रभूषाभिः पूजान्ते तं च संस्तवेत् ॥३२॥

पदच्छेद—

एवम् दीन वचः प्रोच्य, वक्तारम् च अथ पूजयेत् ।
सम्भूष्य वस्त्र भूषाभिः, पूजा अन्ते तम् च संस्तवेत् ॥

शब्दार्थ—

एवम्	१.	इस प्रकार	वस्त्र	८.	वस्त्रों और
दीन वचः	२.	दीनता से भरी वाणी	भूषाभिः	९.	आभूषणों से
प्रोच्य	३.	कह कर	पूजा	११.	पूजन के
वक्तारम्	५.	कथावाचक की	अन्ते	१२.	अन्त में
च अथ	४.	तदनन्तर	तम्	१३.	उनकी
पूजयेत् ।	६.	पूजा करे	च	७.	तथा (उनको)
सम्भूष्य	१०.	भूषित करके	संस्तवेत् ॥	१४.	स्तुति करे

श्लोकार्थ—इस प्रकार दीनता से भरी वाणी कह कर तदनन्तर कथावाचक की पूजा करे तथा उनको वस्त्रों और आभूषणों से भूषित करके पूजन के अन्त में उनकी स्तुति करे ।

त्रयस्त्रिंशः श्लोकः

शुकरूप प्रबोधज्ञ सर्वशास्त्रविशारद ।
एतत्कथाप्रकाशेन मदज्ञानं विनाशय ॥३३॥

पदच्छेद—

शुक रूप प्रबोधज्ञ, सर्व शास्त्र विशारद ।
एतद् कथा प्रकाशेन, मत् अज्ञानम् विनाशय ॥

शब्दार्थ—

शुक रूप	१. हे शुकदेव तुल्य !	कथा	६. श्रीमद्भागवत कथा के
प्रबोधज्ञ	२. ज्ञान सम्पन्न !	प्रकाशेन	७. प्रवचन से
सर्व शास्त्र	३. सभी शास्त्रों के	मत्	८. मेरे
विशारद ।	४. पण्डित ! (आप)	अज्ञानम्	९. अज्ञान को
एतद्	५. इस	विनाशय ॥	१०. दूर करें

श्लोकार्थ—हे शुकदेव तुल्य ! ज्ञान-सम्पन्न ! सभी शास्त्रों के पण्डित ! आप इस श्रीमद्भागवत कथा के प्रवचन से मेरे अज्ञान को दूर करें ।

चतुस्त्रिंशः श्लोकः

तदग्रे नियमः पश्चात्कर्तव्यः श्रेयसे मुदा ।
सप्तरात्रं यथाशक्त्या धारणीयः स एव हि ॥३४॥

पदच्छेद—

तद् अग्रे नियमः पश्चात् , कर्तव्यः श्रेयसे मुदा ।
सप्तरात्रम् यथाशक्त्या, धारणीयः सः एव हि ॥

शब्दार्थ—

तद्	२. उस (कथावाचक) की	मुदा ।	५. प्रसन्नता-पूर्वक
अग्रे	३. साक्षी में	सप्तरात्रम्	९. सात रातों तक
नियमः	६. व्रत	यथाशक्त्या	१०. शक्ति भर
पश्चात्	१. तदनन्तर	धारणीयः	१२. पालन करे
कर्तव्यः	७. धारण करे	सः एव	११. उसी (व्रत) का
श्रेयसे	४. कल्याण के लिए	हि ॥	८. तथा

श्लोकार्थ—तदनन्तर उस कथावाचक की साक्षी में कल्याण के लिए प्रसन्नता-पूर्वक व्रत धारण करे तथा सात रातों तक शक्ति भर उसी व्रत का पालन करे ।

पञ्चत्रिंशः श्लोकः

वरणं पञ्चविप्राणां कथाभङ्गनिवृत्तये ।
कर्तव्यं तैर्हरेर्जाप्यं द्वादशाक्षरविद्यया ॥३५॥

पदच्छेद—

वरणम् पञ्च विप्राणाम् , कथा भङ्ग निवृत्तये ।
कर्तव्यम् तैः हरेः जाप्यम् , द्वादशाक्षर विद्यया ॥

शब्दार्थ—

वरणम्	६.	वरण	कर्तव्यम्	७.	करे (तथा)
पञ्च	४.	पाँच	तैः	८.	वे (ब्राह्मण)
विप्राणाम्	५.	ब्राह्मणों का	हरेः	११.	भगवान् श्री हरि का
कथा	१.	कथा में	जाप्यम्	१२.	जप करें
भङ्ग	२.	बाधा के	द्वादशाक्षर	९.	द्वादशाक्षर
निवृत्तये ।	३.	निवारण के लिए	विद्यया ॥	१०.	मन्त्र से

श्लोकार्थ—कथा में बाधा के निवारण के लिए पाँच ब्राह्मणों का वरण करे तथा वे ब्राह्मण द्वादशाक्षर मन्त्र से भगवान् श्री हरि का जप करें ।

षट्त्रिंशः श्लोकः

ब्राह्मणान् वैष्णवांश्चान्यांस्तथा कीर्तनकारिणः ।
नत्वा सम्पूज्य दत्ताज्ञः स्वयमासनमाविशेत् ॥३६॥

पदच्छेद—

ब्राह्मणान् वैष्णवान् च अन्यान्, तथा कीर्तन कारिणः ।
नत्वा सम्पूज्य दत्त आज्ञः, स्वयम् आसनम् आविशेत् ॥

शब्दार्थ—

ब्राह्मणान्	१.	ब्राह्मणों	नत्वा	६.	प्रणाम करके
वैष्णवान्	२.	वैष्णवों	सम्पूज्य	८.	पूजन करके (और)
च	३.	और	दत्त आज्ञः	९.	(उनसे) आज्ञा लेकर
अन्यान्	४.	दूसरे	स्वयम्	१०.	अपने
तथा	७.	तथा	आसनम्	११.	आसन पर
कीर्तन कारिणः ।	५.	कीर्तन करने वालों को	आविशेत् ॥	१२.	बैठे

श्लोकार्थ—ब्राह्मणों, वैष्णवों और दूसरे कीर्तन करने वालों को प्रणाम करके तथा पूजन करके और उनसे आज्ञा लेकर अपने आसन पर बैठे ।

सप्तत्रिंशः श्लोकः

लोकवित्तधनागारपुत्रचिन्तां व्युदस्य च ।
कथाचित्तः शुद्धमतिः स लभेत्फलमुत्तमम् ॥३७॥

पदच्छेद—

लोक वित्त धन आगार, पुत्र चिन्ताम् व्युदस्य च ।
कथा चित्तः शुद्ध मतिः, सः लभेत् फलम् उत्तमम् ॥

शब्दार्थ—

लोक	१.	संसार की	कथा	९.	कथा में
वित्त	३.	अचल सम्पत्ति की	चित्तः	१०.	सावधान (एवं)
धन	२.	चल और	शुद्ध	११.	निर्मल
आगार	५.	घर और	मतिः	१२.	बुद्धि वाला
पुत्र	६.	सन्तान की	सः	१३.	वह (श्रोता)
चिन्ताम्	७.	चिन्ता को	लभेत्	१६.	प्राप्त करता है
व्युदस्य	८.	छोड़कर	फलम्	१५.	फल को
च ।	४.	तथा	उत्तमम् ॥	१४.	श्रेष्ठ

श्लोकार्थ—संसार की, चल और अचल सम्पत्ति की तथा घर और सन्तान की चिन्ता को छोड़कर कथा में सावधान एवं निर्मल बुद्धिवाला वह श्रोता श्रेष्ठ फल को प्राप्त करता है ।

अष्टात्रिंशः श्लोकः

आसूर्योदयमारभ्य सार्धत्रिप्रहरान्तकम् ।
वाचनीया कथा सम्यग्धीरकण्ठं सुधीमता ॥३८॥

पदच्छेद—

आ सूर्योदयम् आरभ्य, सार्धं त्रि प्रहर अन्तकम् ।
वाचनीया कथा सम्यक् , धीर कण्ठम् सुधीमता ॥

शब्दार्थ—

आ	७.	तक (तीन घण्टे का एक पहर)	वाचनीया	११.	कहनी चाहिए
सूर्योदयम्	२.	सूर्योदय से	कथा	१०.	सप्ताह कथा
आरभ्य	३.	प्रारम्भ करके	सम्यक्	८.	भली भाँति
सार्धं	४.	साढ़े	धीर कण्ठम्	९.	मधुर कण्ठ से
त्रि प्रहर	५.	तीन पहर के	सुधीमता ॥	१.	विद्वान् कथा वाचक को
अन्तकम् ।	६.	अन्त			

श्लोकार्थ—विद्वान् कथावाचक को सूर्योदय से प्रारम्भ करके साढ़े तीन पहर के अन्त तक भली-भाँति मधुर कण्ठ से सप्ताह-कथा कहनी चाहिए ।

एकोनचत्वारिंशः श्लोकः

कथाविरामः कर्तव्यो मध्याह्ने घटिकाद्वयम् ।
तत्कथामनु कार्यं वै कीर्तनं वैष्णवैस्तदा ॥३९॥

पदच्छेद—

कथा विरामः कर्तव्यः, मध्याह्ने घटिका द्वयम् ।
तद् कथाम् अनु कार्यम् वै, कीर्तनम् वैष्णवैः तदा ॥

शब्दार्थ—

कथा	४.	कथा का	कथाम्	८.	कथा के
विरामः	५.	विश्राम	अनु	९.	अन्त में
कर्तव्यः	६.	करे	कार्यम्	१४.	करें
मध्याह्ने	१.	दोपहर में	वै	१३.	अवश्य
घटिका	३.	घड़ी तक	कीर्तनम्	१२.	कीर्तन
द्वयम् ।	२.	दो	वैष्णवैः	११.	वैष्णव जन
तद्	७.	(तथा) उस	तदा ॥	१०.	उस समय

श्लोकार्थ—दोपहर में दो घड़ी तक कथा का विश्राम करे तथा उस कथा के अन्त में उस समय वैष्णव जन कीर्तन अवश्य करें ।

चत्वारिंशः श्लोकः

मलमूत्रजयार्थं हि लघ्वाहारः सुखावहः ।
हविष्यान्नेन कर्तव्यो ह्येकवारं कथार्थिना ॥४०॥

पदच्छेद—

मल मूत्र जयार्थम् हि, लघु आहारः सुख आवहः ।
हविष्य अन्नेन कर्तव्यः, हि एकवारम् कथा अर्थिना ॥

शब्दार्थ—

मल मूत्र	९.	मल और मूत्र को	अन्नेन	४.	अन्न से
जयार्थम्	१०.	वश में करने के लिए	कर्तव्यः	७.	आहार करें
हि	८.	क्योंकि	हि	६.	ही
लघु आहारः	११.	थोड़ा आहार	एकवारम्	५.	एक समय
सुख आवहः ।	१२.	सुखदायी (होता है)	कथा	१.	कथा के
हविष्य	३.	घी में पके	अर्थिना ॥	२.	श्रोता और वक्ता

श्लोकार्थ—कथा के श्रोता और वक्ता घी में पके अन्न से एक समय ही आहार करें; क्योंकि मल और मूत्र को वश में करने के लिए थोड़ा आहार सुखदायी होता है ।

एकचत्वारिंशः श्लोकः

उपोष्य सप्तरात्रं वै शक्तिश्चेच्छृणुयात्तदा ।
घृतपानं पयःपानं कृत्वा वै शृणुयात्सुखम् ॥४१॥

पदच्छेद—

उपोष्य सप्तरात्रम् वै, शक्तिः चेत् शृणुयात् तदा ।
घृत पानम् पयः पानम्, कृत्वा वै शृणुयात् सुखम् ॥

शब्दार्थ—

उपोष्य	५.	उपवास करके	घृत	८.	(अथवा) घी का
सप्तरात्रम्	४.	सात रातों तक	पानम्	९.	सेवन
वै	६.	ही	पयः पानम्	११.	दूध का पान
शक्तिः	२.	सामर्थ्य (हो)	कृत्वा	१२.	करके
चेत्	१.	यदि	वै	१०.	और
शृणुयात्	७.	(कथा) सुने	शृणुयात्	१४.	(कथा) सुननी चाहिए
तदा ।	३.	तब	सुखम् ॥	१३.	सुख-पूर्वक

श्लोकार्थ—यदि सामर्थ्य हो तब सात रातों तक उपवास करके ही कथा सुने । अथवा घी का सेवन और दूध का पान करके सुख-पूर्वक कथा सुननी चाहिए ।

द्विचत्वारिंशः श्लोकः

फलाहारेण वा भाव्यमेकभुक्तेन वा पुनः ।
सुखसाध्यं भवेद्यत्तु कर्तव्यं श्रवणाय तत् ॥४२॥

पदच्छेद—

फल आहारेण वा भाव्यम्, एक भुक्तेन वा पुनः ।
सुख साध्यम् भवेत् यद् तु, कर्तव्यम् श्रवणाय तद् ॥

शब्दार्थ—

फल आहारेण	२.	फल खाकर	सुख साध्यम्	१०.	सुख से करने योग्य
वा	१.	अथवा	भवेत्	११.	हो
भाव्यम्	७.	रहे	यद्	९.	जो
एक	५.	(दिन में) एक बार	तु	८.	इस प्रकार
भुक्तेन	६.	भोजन करके	कर्तव्यम्	१४.	करना चाहिये
वा	३.	या	श्रवणाय	१२.	(कथा) सुनने के लिए
पुनः ।	४.	फिर	तद् ॥	१३.	उसे

श्लोकार्थ—अथवा फल खाकर या फिर दिन में एकबार भोजन करके रहे । इस प्रकार जो सुख से करने योग्य हो; कथा सुनने के लिए उसे करना चाहिए ।

त्रिचत्वारिंशः श्लोकः

भोजनं तु वरं मन्ये कथाश्रवणकारकम् ।
नोपवासो वरः प्रो कथाविघ्नकरो यदि ॥४३॥

पदच्छेद—

भोजनम् तु वरम् मन्ये, कथा श्रवण कारकम् ।
न उपवासः वरः प्रोक्तः, कथा विघ्नकरः यदि ॥

शब्दार्थ—

भोजनम्	४.	भोजन करना	न	१३.	नहीं
तु	५.	भी	उपवासः	११.	व्रत
वरम्	६.	उचित	वरः	१२.	उचित
मन्ये	७.	माना गया है	प्रोक्तः	१४.	कहा गया है
कथा	१.	भागवत कथा	कथा	९.	कथा में
श्रवण	२.	सुनने में	विघ्नकरः	१०.	बाधक
कारकम् ।	३.	सहायक होने पर	यदि ॥	८.	किन्तु

श्लोकार्थ—भागवत कथा सुनने में सहायक होने पर भोजन करना भी उचित माना गया है, किन्तु कथा में बाधक व्रत उचित नहीं कहा गया है ।

चतुश्चत्वारिंशः श्लोकः

सप्ताहव्रतिनां पुंसां नियमाञ्छृणु नारद ।
विष्णुदीक्षाविहीनानां नाधिकारः कथाश्रवे ॥४४॥

पदच्छेद—

सप्ताह व्रतिनाम् पुंसाम्, नियमान् शृणु नारद ।
विष्णु दीक्षा विहीनानाम्, न अधिकारः कथा श्रवे ॥

शब्दार्थ—

सप्ताह	२.	भागवत-सप्ताह का	विष्णु	७.	भगवान् विष्णु की
व्रतिनाम्	३.	व्रत लेने वाले	दीक्षा	८.	दीक्षा से
पुंसाम्	४.	मनुष्यों के	विहीनानाम्	९.	रहित जनों का
नियमान्	५.	नियम	न	१२.	नहीं (है)
शृणु	६.	सुनें	अधिकारः	११.	अधिकार
नारद ।	१.	हे नारद जी ! (आप)	कथा श्रवे ॥	१०.	कथा सुनने में

श्लोकार्थ—हे नारद जी ! आप श्रीमद्भागवत-सप्ताह का व्रत लेने वाले मनुष्यों के नियम सुनें । भगवान् विष्णु की दीक्षा से रहित जनों का कथा सुनने में अधिकार नहीं है ।

पञ्चचत्वारिंशः श्लोकः

ब्रह्मचर्यमधःसुप्तिः पत्रावल्यां च भोजनम् ।
कथासमाप्तौ भुक्तिं च कुर्यान्नित्यं कथाव्रती ॥४५॥

पदच्छेद—

ब्रह्मचर्यम् अधः सुप्तिः, पत्रावल्याम् च भोजनम् ।
कथा समाप्तौ भुक्तिम् च, कुर्यात् नित्यम् कथाव्रती ॥

शब्दार्थ—

ब्रह्मचर्यम्	२.	ब्रह्मचर्य	कथा समाप्तौ	८.	कथा का विश्राम होने पर
अधः	३.	भूमि पर	भुक्तिम्	९.	आहार-ग्रहण
सुप्तिः	४.	शयन	च	१०.	इनका
पत्रावल्याम्	५.	पत्तल में	कुर्यात्	१२.	पालन करे
च	७.	और	नित्यम्	११.	प्रतिदिन
भोजनम् ।	६.	भोजन	कथाव्रती ॥	१.	कथा का व्रत लेनेवाले व्यास और श्रोता

श्लोकार्थ—कथा का व्रत लेने वाले व्यास और श्रोता ब्रह्मचर्य, भूमि पर शयन, पत्तल में भोजन और कथा का विश्राम होने पर आहार-ग्रहण; इनका प्रतिदिन पालन करे ।

षट्चत्वारिंशः श्लोकः

द्विदलं मधु तैलं च गरिष्ठान्नं तथैव च ।
भावदुष्टं पर्युषितं जह्यान्नित्यं कथाव्रती ॥४६॥

पदच्छेद—

द्विदलम् मधु तैलम् च, गरिष्ठ अन्नम् तथैव च ।
भाव दुष्टम् पर्युषितम्, जह्यात् नित्यम् कथा व्रती ॥

शब्दार्थ—

द्विदलम्	३.	दाल	च ।	१०.	तथा
मधु	४.	शहद	भाव दुष्टम्	९.	भावों से दूषित
तैलम्	५.	तेल	पर्युषितम्	११.	बासी भोजन का
च	७.	और	जह्यात्	१२.	सेवन नहीं करना चाहिए
गरिष्ठ अन्नम्	६.	गरिष्ठ अन्न	नित्यम्	२.	प्रतिदिन
तथैव	८.	उसी प्रकार	कथा व्रती ॥	१.	कथा का व्रत लेने वाले को

श्लोकार्थ—कथा का व्रत लेने वाले को प्रतिदिन दाल, शहद, तेल, गरिष्ठ-अन्न और उसी प्रकार भावों से दूषित तथा बासी भोजन का सेवन नहीं करना चाहिये ।

सप्तचत्वारिंशः श्लोकः

कामं क्रोधं मदं मानं मत्सरं लोभमेव च ।
दम्भं मोहं तथा द्वेषं दूरयेच्च कथाव्रती ॥४७॥

पदच्छेद—

कामम् क्रोधम् मदम् मानम्, मत्सरम् लोभम् एव च ।
दम्भम् मोहम् तथा द्वेषम्, दूरयेत् च कथा व्रती ॥

शब्दार्थ—

कामम्	४. काम	**दम्भम्**	१२. अहंकार
क्रोधम्	५. क्रोध	**मोहम्**	१३. ममता
मदम्	६. घमण्ड	**तथा**	११. तथा
मानम्	७. सम्मान	**द्वेषम्**	१५. वैर भाव को
मत्सरम्	८. ईर्ष्या	**दूरयेत्**	१६. दूर रखे
लोभम्	१०. लालच को	**च**	१४. और
एव	३. निश्चयपूर्वक	**कथा**	१. सप्ताह-कथा का
च ।	९. और	**व्रती ॥**	२. व्रत लेने वाला

श्लोकार्थ—सप्ताह-कथा का व्रत लेने वाला निश्चय-पूर्वक काम, क्रोध, घमण्ड, सम्मान, ईर्ष्या और लालच को तथा अहंकार, ममता और वैर भाव को दूर रखे ।

अष्टचत्वारिंशः श्लोकः

वेदवैष्णवविप्राणां गुरुगोव्रतिनां तथा ।
स्त्रीराजमहतां निन्दां वर्जयेद्यः कथाव्रती ॥४८॥

पदच्छेद—

वेद वैष्णव विप्राणाम्, गुरु गो व्रतिनाम् तथा ।
स्त्री राज महताम् निन्दाम्, वर्जयेत् यः कथाव्रती ॥

शब्दार्थ—

वेद	३. वेद-शास्त्र	**स्त्री**	१०. स्त्री
वैष्णव	४. विष्णु-भक्त	**राज**	११. राजा और
विप्राणाम्	५. ब्राह्मण	**महताम्**	१२. महान् लोगों की
गुरु	६. गुरु	**निन्दाम्**	१३. निन्दा करना
गो	७. गऊ और	**वर्जयेत्**	१४. छोड़ दे
व्रतिनाम्	८. व्रत करने वालों की	**यः**	१. जिसने
तथा ।	९. तथा	**कथाव्रती ॥**	२. कथा का व्रत लिया है (वह)

श्लोकार्थ—जिसने कथा का व्रत लिया है, वह वेद-शास्त्र, विष्णु-भक्त, ब्राह्मण, गुरु, गऊ और व्रत करने वालों की तथा स्त्री, राजा और महान् लोगों की निन्दा करना छोड दे ।

एकोनपञ्चाशः श्लोकः

रजस्वलान्त्यजम्लेच्छपतितव्रात्यकैस्तदा ।
द्विजद्विड्वेदबाह्यैश्च न वदेद्यः कथाव्रती ॥४९॥

पदच्छेद—

रजस्वला अन्त्यज म्लेच्छ, पतित व्रात्यकैः तदा ।
द्विज द्विष् वेदबाह्यैः च, न वदेत् यः कथाव्रती ॥

शब्दार्थ—

रजस्वला	४. मासिक धर्म से युक्त स्त्री	वेद	११.	वेद
अन्त्यज	५. चाण्डाल	बाह्यैः	१२.	बहिष्कृत शूद्रादि के साथ
म्लेच्छ	६. म्लेच्छ	च	१०.	और
पतित	७. पापी	न	१३.	नहीं
व्रात्यकैः	८. धर्म से भ्रष्ट	वदेत्	१४.	वार्तालाप करे
तदा ।	३. उस समय	यः	१.	जो
द्विज द्विष्	९. ब्राह्मण-द्रोही	कथाव्रती ॥	२.	कथाव्रती (है वह)

श्लोकार्थ—जो कथाव्रती है; वह उस समय मासिक धर्म से युक्त स्त्री, चाण्डाल, म्लेच्छ, पापी, धर्म से भ्रष्ट, ब्राह्मण-द्रोही और वेद-बहिष्कृत शूद्रादि के साथ वार्तालाप नहीं करे ।

पञ्चाशः श्लोकः

सत्यं शौचं दयां मौनमार्जवं विनयं तथा ।
उदारमानसं तद्वदेवं कुर्यात्कथाव्रती ॥५०॥

पदच्छेद—

सत्यम् शौचम् दयाम् मौनम्, आर्जवम् विनयम् तथा ।
उदार मानसम् तद्वत्, एवम् कुर्यात् कथाव्रती ॥

शब्दार्थ—

सत्यम्	३. सत्य-भाषण	उदार	१२.	उदारता का
शौचम्	४. पवित्रता	मानसम्	११.	मन की
दयाम्	५. करुणा	तद्वत्	१०.	उसी प्रकार
मौनम्	६. मौन	एवम्	१३.	भी
आर्जवम्	७. सरलता	कुर्यात्	१४.	बर्ताव करना चाहिए
विनयम्	८. नम्रता	कथा	१.	कथा का
तथा ।	९. तथा	व्रती ॥	२.	व्रत करने वाले को

श्लोकार्थ—कथा का व्रत करने वाले को सत्य-भाषण, पवित्रता, करुणा, मौन, सरलता, नम्रता तथा उसी प्रकार मन की उदारता का भी बर्ताव करना चाहिए ।

एकपञ्चाशः श्लोकः

दरिद्रश्च क्षयी रोगी निर्भाग्यः पापकर्मवान् ।
अनपत्यो मोक्षकामः शृणुयाच्च कथामिमाम् ॥५१॥

पदच्छेद—

दरिद्रः च क्षयी रोगी, निर्भाग्यः पाप कर्मवान् ।
अनपत्यः मोक्ष कामः, शृणुयात् च कथाम् इमाम् ॥

शब्दार्थ—

दरिद्रः	१.	निर्धन	**अनपत्यः**	८.	सन्तान हीन
च	५.	और	**मोक्ष**	१०.	मुक्ति का
क्षयी	२.	निर्बल	**कामः**	११.	इच्छुक (व्यक्ति)
रोगी	३.	रोगी	**शृणुयात्**	१४.	सुने
निर्भाग्यः	४.	भाग्यहीन	**च**	९.	तथा
पाप	६.	पाप	**कथाम्**	१३.	कथा को
कर्मवान् ।	७.	कर्म करने वाला	**इमाम् ॥**	१२.	इस

श्लोकार्थ—निर्धन, निर्बल, रोगी, भाग्यहीन और पाप कर्म करनेवाला, सन्तान-हीन तथा मुक्ति का इच्छुक व्यक्ति इस कथा को सुने ।

द्विपञ्चाशः श्लोकः

अपुष्पा काकवन्ध्या च वन्ध्या या च मृतार्भका ।
स्रवद्गर्भा च या नारी तया श्राव्या प्रयत्नतः ॥५२॥

पदच्छेद—

अपुष्पा काकवन्ध्या च, वन्ध्या या च मृत अर्भका ।
स्रवद् गर्भा च या नारी, तया श्राव्या प्रयत्नतः ॥

शब्दार्थ—

अपुष्पा	२.	रजोदर्शन से हीन (हो या)	**स्रवद्**	१३.	गिर जाता हो
काकवन्ध्या	३.	जिसके एक ही सन्तान होकर रह गयी हो	**गर्भा**	१२.	गर्भ
च	४.	और (जो)	**च**	९.	अथवा
वन्ध्या	५.	बाँझ (हो)	**या**	१०.	जिस
या	१.	जो (नारी)	**नारी**	११.	नारी का
च	६.	तथा (जिसको)	**तया**	१४.	उसे
मृत	८.	मर जाती हो	**श्राव्या**	१६.	(सप्ताह की कथा) सुननी चाहिए
अर्भका ।	७.	सन्तान होकर	**प्रयत्नतः ॥**	१५.	प्रयत्न-पूर्वक (भागवत)

श्लोकार्थ—जो नारी रजोदर्शन से हीन हो या जिसके एक ही सन्तान होकर रह गयी हो और जो बाँझ हो तथा जिसकी सन्तान होकर मर जाती हो अथवा जिस नारी का गर्भ गिर जाता हो; उसे प्रयत्न-पूर्वक भागवत सप्ताह की कथा सुननी चाहिए ।

त्रिपञ्चाशः श्लोकः

एतेषु विधिना श्रावे तदक्षयतरं भवेत् ।
अत्युत्तमा कथा दिव्या कोटियज्ञफलप्रदा ॥५३॥

पदच्छेद—

एतेषु विधिना श्रावे, तद् अक्षयतरम् भवेत् ।
अति उत्तमा कथा दिव्या, कोटि यज्ञ फल प्रदा ॥

शब्दार्थ—

एतेषु	१.	इन लोगों को	अति उत्तमा	८.	अत्यन्त श्रेष्ठ
विधिना	२.	विधि-पूर्वक	कथा	७.	श्रीमद्भागवत की कथा
श्रावे	३.	(कथा) सुनाने पर	दिव्या	९.	अलौकिक (और)
तद्	४.	उसका (फल)	कोटि	१०.	करोड़ों
अक्षयतरम्	५.	अक्षय	यज्ञ	११.	यज्ञों के
भवेत् ।	६.	होता है (इस प्रकार)	फल प्रदा ॥	१२.	फल को देने वाली है

श्लोकार्थ—इन लोगों को विधि-पूर्वक कथा सुनाने पर उसका फल अक्षय होता है। इस प्रकार श्रीमद्भागवत की कथा अत्यन्त श्रेष्ठ, अलौकिक और करोड़ों यज्ञों के फल को देनेवाली है।

चतुःपञ्चाशः श्लोकः

एवं कृत्वा व्रतविधिमुद्यापनमथाचरेत् ।
जन्माष्टमीव्रतमिव कर्तव्यं फलकाङ्क्षिभिः ॥५४॥

पदच्छेद—

एवम् कृत्वा व्रत विधिम्, उद्यापनम् अथ आचरेत् ।
जन्माष्टमी व्रतम् इव, कर्तव्यम् फल काङ्क्षिभिः ॥

शब्दार्थ—

एवम्	१.	इस प्रकार	जन्माष्टमी	९.	जन्माष्टमी
कृत्वा	३.	करके	व्रतम्	१०.	व्रत के
व्रत विधिम्	२.	कथा के व्रत और विधान को	इव	११.	समान (उद्यापन)
उद्यापनम्	५.	उद्यापन	कर्तव्यम्	१२.	करना चाहिए
अथ	४.	तदनन्तर	फल	७.	फल की
आचरेत् ।	६.	करे	काङ्क्षिभिः ॥	८.	इच्छा रखने वालों को

श्लोकार्थ—इस प्रकार कथा के व्रत और विधान को करके तदनन्तर उद्यापन करे। फल की इच्छा रखने वालों को जन्माष्टमी व्रत के समान उद्यापन करना चाहिये।

पञ्चपञ्चाशः श्लोकः

अकिंचनेषु भक्तेषु प्रायो नोद्यापनाग्रहः ।
श्रवणेनैव पूतास्ते निष्कामा वैष्णवा यतः ॥५५॥

पदच्छेद—

अकिंचनेषु भक्तेषु, प्रायः न उद्यापन आग्रहः ।
श्रवणेन एव पूताः ते, निष्कामाः वैष्णवाः यतः ॥

शब्दार्थ—

अकिंचनेषु	१. निर्धन	**एव**	१२.	ही
भक्तेषु	२. भक्तों के लिये	**पूताः**	१३.	पवित्र (हो जाते हैं)
प्रायः	५. प्रायः	**ते**	९.	वे
न	६. नहीं (है)	**निष्कामाः**	८.	कामनाओं से रहित
उद्यापन	३. उद्यापन को	**वैष्णवाः**	१०.	विष्णु के भक्त
आग्रहः ।	४. आवश्यकता	**यतः ॥**	७.	क्योंकि
श्रवणेन	११. (कथा) सुनने से			

श्लोकार्थ—निर्धन भक्तों के लिये उद्यापन की आवश्यकता प्रायः नहीं है, क्योंकि कामनाओं से रहित वे विष्णु के भक्त कथा सुनने से ही पवित्र हो जाते हैं ।

षट्पञ्चाशः श्लोकः

श्लोकार्थ—मुझ पापी के तीखे बाणों से घायल, छिन्न-भिन्न कवचवाले और लहु से लहुलुहान जो भगवान् मेरे वध के लियें अर्जुन के रोकने पर भी हठात् सामने झपटे; वे भगवान् श्रीकृष्ण मुझे सद्गति देने वाले होवें ।

एकोनचत्वारिंशः श्लोकः

विजयरथकुटुम्ब आत्ततोत्रे, धृतहयरश्मिनि तच्छ्रियेक्षणीये ।
भगवति रतिरस्तु मे मुमूर्षोर्यमिह निरीक्ष्य हता गताः सरूपम् ॥३९॥

पदच्छेद—विजय रथ कुटुम्बे आत्त तोत्रे, धृत हय रश्मिनि तत् श्रिया ईक्षणीये ।
भगवति रतिः अस्तु मे मुमूर्षोः, यम् इह निरीक्ष्य हताः गताः सरूपम् ॥

शब्दार्थ—

विजय रथ	१. अर्जुन के रथ की	रतिः अस्तु	१०. प्रीति होवे
कुटुम्बे	२. रक्षा में तत्पर	मे मुमूर्षोः,	९. मुझ मरने वाले की
आत्त तोत्रे,	३. चाबुक लिये हुए	यम्	११. जिन्हें
धृत	५. पकड़े हुए (तथा)	इह	१३. इस (युद्ध) में
हय रश्मिनि	४. घोड़ों की, लगाम	निरीक्ष्य	१२. देखकर
तत् श्रिया	६. उस शोभा से	हताः	१४. मारे गये (सैनिक)
ईक्षणीये ।	७. दर्शनीय	गताः	१६. प्राप्त हो गये (हैं)
भगवति	८. भगवान् श्रीकृष्ण में	सरूपम् ॥	१५. सारूप्य मुक्ति को

श्लोकार्थ—अर्जुन के रथ की रक्षा में तत्पर, चाबुक लिये हुए, घोड़ों की लगाम पकड़े हुए तथा उस शोभा से दर्शनीय भगवान् श्रीकृष्ण में मुझ मरने वाले की प्रीति होवे; जिन्हें देखकर इस युद्ध में मारे गये सैनिक सारूप्य मुक्ति को प्राप्त हो गये हैं ।

चत्वारिंशः श्लोकः

ललितगतिविलासवल्गुहास - प्रणयनिरीक्षणकल्पितोरुमानाः ।
कृतमनुकृतवत्य उन्मदान्धाः, प्रकृतिमगन् किल यस्य गोपवध्वः ॥४०॥

पदच्छेद—ललित गति विलास वल्गु हास, प्रणय निरीक्षण कल्पित उरु मानाः ।
कृतम् अनुकृतवत्यः उन्मद अन्धाः, प्रकृतिम् अगन् किल यस्य गोप वध्वः ॥

शब्दार्थ—

ललित गति	१. मनोहर गति	अनुकृतवत्यः	१०. अनुकरण करती हुई
विलास	२. हाव-भाव पूर्ण	उन्मद अन्धाः,	८. प्रेम दिवानी होकर
वल्गु हास,	३. मधुर मुसकान और	प्रकृतिम्	१२. स्वरूप को
प्रणय निरीक्षण	४. प्रेमभरी चितवन से	अगन्	१४. प्राप्त हो गयीं हैं
कल्पित	६. की गईं	किल	१३. ही
उरु मानाः ।	५. बहुत सम्मानित	यस्य	११. जिनके
कृतम्	९. लीला का	गोप वध्वः ॥	७. गोपियाँ

श्लोकार्थ—जिस भगवान् की मनोहर गति, हाव-भाव पूर्ण मधुर मुसकान और प्रेमभरी चितवन से बहुत सम्मानित की गयीं गोपियाँ प्रेम-दिवानी होकर लीला का अनुकरण करती हुईं जिनके स्वरूप को ही प्राप्त हो गयीं हैं ।

एकचत्वारिंशः श्लोकः

मुनिगणनृपवर्यसंकुलेऽन्तः, सदसि युधिष्ठिरराजसूय एषाम् ।
अर्हणमुपपेद ईक्षणीयो, मम दृशिगोचर एष आविरात्मा ॥४१॥

पदच्छेद—

मुनि गण नृप वर्य संकुले अन्तः, सदसि युधिष्ठिर राजसूये एषाम् ।
अर्हणम् उपपेदे ईक्षणीयः, मम दृशि गोचरः एषः आविरात्मा ॥

शब्दार्थ—

मुनि गण	३. मुनिजन और	अर्हणम्	८. पूजा
नृप वर्य	४. प्रधान राजाओं से	उपपेदे	९. प्राप्त की थी
संकुले	५. भरे	ईक्षणीयः,	१०. दर्शनीय
अन्तःसदसि	६. सभा भवन के अन्दर	मम	१२. मेरी
युधिष्ठिर	१. राजा युधिष्ठिर के	दृशि गोचरः	१३. आँखों के सामने
राजसूये	२. राजसूय यज्ञ में	एषः	११. ये (भगवान् श्रीकृष्ण)
एषाम् ।	७. (जिन्होंने) उन सबकी	आविरात्मा ॥	१४. साक्षात् उपस्थित (हैं)

श्लोकार्थ—राजा युधिष्ठिर के राजसूय यज्ञ में मुनिजन और प्रधान राजाओं से भरे सभा-भवन के अन्दर जिन्होंने उन सबकी पूजा प्राप्त की थी; दर्शनीय ये भगवान् श्रीकृष्ण मेरी आँखों के सामने साक्षात् उपस्थित हैं ।

द्विचत्वारिंशः श्लोकः

तमिममहमजं शरीरभाजां, हृदि हृदि धिष्ठितमात्मकल्पितानाम् ।
प्रतिदृशमिव नैकधार्कमेकं, समधिगतोऽस्मि विधूतभेदमोहः ॥४२॥

पदच्छेद—

तम् इमम् अहम् अजम् शरीर भाजाम् , हृदि हृदि धिष्ठितम् आत्म कल्पितानाम् ।
प्रतिदृशम् इव नैकधा अर्कम् एकम् , समधिगतः अस्मि विधूत भेद मोहः ॥

शब्दार्थ—

तम् , इमम्	११. अत्यन्त प्रसिद्ध इस	इव	२. जैसे
अहम्	६. (उसी प्रकार)मैं(स्वयम्)	नैकधा	५. अनेक रूपों में (दिखाई देता है)
अजम्	१२. अजन्मा को	अर्कम्	४. सूर्य
शरीर भाजाम् ,	८. समस्त प्राणियों के	एकम् ,	३. एक ही
हृदि हृदि	९. हृदय में	समधिगतः	१५. शरण
धिष्ठितम्	१०. विराजमान (एवं)	अस्मि	१६. लेता हूँ
आत्म कल्पितानाम् ।	७. परमात्मा से रचित	विधूत	१४. रहित होकर
प्रतिदृशम्	१. हर-एक की दृष्टि में	भेद, मोहः ॥	१३. भेद बुद्धि और अज्ञान से

श्लोकार्थ—हर-एक की दृष्टि में जैसे एक ही सूर्य अनेक रूपों में दिखाई देता है; उसी प्रकार मैं स्वयम् परमात्मा से रचित समस्त प्राणियों के हृदय में विराजमान एवं अत्यन्त प्रसिद्ध इस अजन्मा की भेदबुद्धि और अज्ञान से रहित होकर शरण लेता हूँ ।

त्रिचत्वारिंशः श्लोकः

सूत उवाच—

कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः ।

आत्मन्यात्मानमावेश्य सोऽन्तः श्वास उपारमत् ॥४३॥

पदच्छेद—

कृष्णे एवम् भगवति, मनः वाक् दृष्टि वृत्तिभिः ।

आत्मनि आत्मानम् आवेश्य, सः अन्तः श्वासः उपारमत् ॥

शब्दार्थ—

कृष्णे	८.	श्रीकृष्ण में	**आत्मानम्**	५.	अपनी आत्मा को
एवम्	१.	इस प्रकार	**आवेश्य**	६.	लगाकर (तथा)
भगवति	७.	भगवान्	**सः**	२.	वे (भीष्मपितामह जी)
मनः वाक्	३.	मन, वाणी	**अन्तः**	११.	अन्दर (रोककर)
दृष्टि वृत्तिभिः ।	४.	नेत्र और चित्तवृत्ति के साथ	**श्वासः**	१०.	प्राणवायु को
आत्मनि	६.	आत्मस्वरूप	**उपारमत् ॥**	१२.	चिर शान्त हो गये

श्लोकार्थं—इस प्रकार वे भीष्मपितामह जी मन, वाणी, नेत्र और चित्तवृत्ति के साथ अपनी आत्मा को आत्मस्वरूप भगवान् श्रीकृष्ण में लगाकर तथा प्राणवायु को अन्दर रोककर चिर शान्त हो गये ।

चतुश्चत्वारिंशः श्लोकः

सम्पद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्कले ।

सर्वे बभूवुस्ते तूष्णीं वयांसीव दिनात्यये ॥४४॥

पदच्छेद—

सम्पद्यमानम् आज्ञाय, भीष्मम् ब्रह्मणि निष्कले ।

सर्वे बभूवुः ते तूष्णीम्, वयांसि इव दिन अत्यये ॥

शब्दार्थ—

सम्पद्यमानम्	६.	लीन हुआ	**बभूवुः**	१२.	हो गये
आज्ञाय	७.	जानकर	**ते**	१.	वे
भीष्मम्	३.	भीष्मपितामह को	**तूष्णीम्**	११.	शान्त
ब्रह्मणि	५.	ब्रह्म में	**वयांसि**	९.	पक्षियों की
निष्कले ।	४.	निर्गुण	**इव**	१०.	भाँति
सर्वे	२.	सभी (उपस्थित जन)	**दिन अत्यये ॥**	८.	दिन के अन्त में

श्लोकार्थ—वे सभी उपस्थित जन भीष्मपितामह को निर्गुण ब्रह्म में लीन हुआ जानकर दिन के अन्त में पक्षियों की भाँति शान्त हो गये ।

पञ्चचत्वारिंशः श्लोकः

तत्र दुन्दुभयो नेदुर्देवमानववादिताः ।
शशंसुः साधवो राज्ञां खात्पेतुः पुष्पवृष्टयः ॥४५॥

पदच्छेद—

तत्र दुन्दुभयः नेदुः, देव मानव वादिताः ।
शशंसुः साधवः राज्ञाम्, खात् पेतुः पुष्प वृष्टयः ॥

शब्दार्थ—

तत्र	१.	(उस समय) वहाँ पर	शशंसुः	६.	प्रशंसा करने लगे (तथा)
दुन्दुभयः	५.	नगाड़े	साधवः	७.	संतजन
नेदुः	६.	बजने लगे	राज्ञाम्	८.	राजाओं की
देव	२.	देवताओं (और)	खात्	१०.	आकाश से
मानव	३.	मनुष्यों के द्वारा	पेतुः	१२.	होने लगी
वादिताः ।	४.	बजाये गये	पुष्प वृष्टयः ॥	११.	फूलों की वर्षा

श्लोकार्थ—उस समय वहाँ पर देवताओं और मनुष्यों के द्वारा बजाये गये नगाड़े बजने लगे । संतजन राजाओं की प्रशंसा करने लगे तथा आकाश से फूलों की वर्षा होने लगी ।

षट्चत्वारिंशः श्लोकः

तस्य निर्हरणादीनि सम्परेतस्य भार्गव ।
युधिष्ठिरः कारयित्वा मुहूर्तं दुःखितोऽभवत् ॥४६॥

पदच्छेद—

तस्य निर्हरण आदीनि, सम्परेतस्य भार्गव ।
युधिष्ठिरः कारयित्वा, मुहूर्तम् दुःखितः अभवत् ॥

शब्दार्थ—

तस्य	३.	उनके	युधिष्ठिरः	२.	युधिष्ठिर
निर्हरण	५.	दाह संस्कार	कारयित्वा	७.	कराकर
आदीनि	६.	आदि क्रियाओं को	मुहूर्तम्	८.	कुछ क्षणों के लिये
सम्परेतस्य	४.	मृत शरीर की	दुःखितः	९.	शोक मग्न
भार्गव ।	१.	हे शौनक जी !	अभवत् ॥	१०.	हो गये थे

श्लोकार्थ—हे शौनक जी ! युधिष्ठिर उनके मृत शरीर की दाह संस्कार आदि क्रियाओं को कराकर कुछ क्षणों के लिये शोक मग्न हो गये थे ।

सप्तचत्वारिंशः श्लोकः

तुष्टुवुर्मुनयो हृष्टाः कृष्णं तद्गुह्यनामभिः ।
ततस्ते कृष्णहृदयाः स्वाश्रमान् प्रययुः पुनः ॥४७॥

पदच्छेद—

तुष्टुवुः मुनयः हृष्टाः, कृष्णम् तद् गुह्य नामभिः ।
ततः ते कृष्ण हृदयाः, स्व आश्रमान् प्रययुः पुनः ॥

शब्दार्थ—

तुष्टुवुः	६.	स्तुति करने लगे	ततः	७.	उसके पश्चात्
मुनयः	१.	वे मुनिजन	ते	८.	उन्होंने
हृष्टाः	२.	प्रसन्न होकर	कृष्ण	१०.	कृष्णमय बनाकर
कृष्णम्	३.	भगवान् श्रीकृष्ण की	हृदयाः	९.	हृदय को
तद्	४.	उनके	स्व आश्रमान्	१२.	अपने आश्रमों को
गुह्य नामभिः ।	५.	रहस्यमय नामों से	प्रययुः	१३.	प्रस्थान किया
			पुनः ॥	११.	फिर

श्लोकार्थ—वे मुनिजन प्रसन्न होकर भगवान् श्रीकृष्ण की उनके रहस्यमय नामों से स्तुति करने लगे । उसके पश्चात् उन्होंने हृदय को कृष्णमय बनाकर फिर अपने आश्रमों को प्रस्थान किया ।

अष्टचत्वारिंशः श्लोकः

ततो युधिष्ठिरो गत्वा सहकृष्णो गजाह्वयम् ।
पितरं सान्त्वयामास गान्धारीं च तपस्विनीम् ॥४८॥

पदच्छेद—

ततः युधिष्ठिरः गत्वा, सह कृष्णः गजाह्वयम् ।
पितरम् सान्त्वयामास, गान्धारीम् च तपस्विनीम् ॥

शब्दार्थ—

ततः	१.	तदनन्तर	पितरम्	७.	चाचा धृतराष्ट्र को
युधिष्ठिरः	२.	युधिष्ठिर ने	सान्त्वयामास	११.	सान्त्वना दी थी
गत्वा	६.	जाकर	गान्धारीम्	१०.	चाची गान्धारी को
सह	४.	साथ	च	८.	और
कृष्णः	३.	भगवान् श्रीकृष्ण के	तपस्विनीम् ॥	९.	पतिव्रता
गजाह्वयम् ।	५.	हस्तिनापुर में			

श्लोकार्थ—तदनन्तर युधिष्ठिर ने भगवान् श्रीकृष्ण के साथ हस्तिनापुर में जाकर चाचा धृतराष्ट्र को और पतिव्रता चाची गान्धारी को सान्त्वना दी थी ।

एकोनपञ्चाशः श्लोकः

पित्रा चानुमतो राजा वासुदेवानुमोदितः।
चकार राज्यं धर्मेण पितृपैतामहं विभुः ॥४९॥

पदच्छेद—

पित्रा च अनुमतः राजा, वासुदेव अनुमोदितः।
चकार राज्यम् धर्मेण, पितृ पैतामहम् विभुः ॥

शब्दार्थ—

पित्रा	३.	चाचा धृतराष्ट्र की	चकार	१२.	शासन किया था
च	५.	और	राज्यम्	१०.	राज्य का
अनुमतः	४.	अनुमति से	धर्मेण	११.	धर्म पूर्वक
राजा	२.	राजा युधिष्ठिर ने	पितृ	८.	पिता
वासुदेव	६.	भगवान् श्रीकृष्ण का	पैतामहम्	९.	पितामह से प्राप्त
अनुमोदितः।	७.	समर्थन पाकर	विभुः ॥	१.	समर्थ

श्लोकार्थ—समर्थ राजा युधिष्ठिर ने चाचा धृतराष्ट्र की अनुमति से और भगवान् श्रीकृष्ण का समर्थन पाकर पिता-पितामह से प्राप्त राज्य का धर्मपूर्वक शासन किया था।

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे
युधिष्ठिरराज्यप्रलम्भो नाम नवमः अध्यायः ॥९॥

श्रीमद्भागवतमहापुराणम्

प्रथमः स्कन्धः

अथ दशमः अध्यायः

प्रथमः श्लोकः

शौनक उवाच---हत्वा स्वरिक्थस्पृध आततायिनो, युधिष्ठिरो धर्मभृतां वरिष्ठः ।
सहानुजैः प्रत्यवरुद्धभोजनः, कथं प्रवृत्तः किमकारषीत्ततः ॥१॥

पदच्छेद— हत्वा स्व रिक्थ स्पृधः आततायिनः, युधिष्ठिरः धर्म भृताम् वरिष्ठः ।
सह अनुजैः प्रत्यवरुद्ध भोजनः, कथम् प्रवृत्तः किम् अकारषीत् ततः ॥

शब्दार्थ—

हत्वा	११. मारकर	सह	७. साथ
स्व रिक्थ	८. अपनी पैतृक सम्पत्ति के	अनुजैः	६. भाइयों के
स्पृधः	९. विरोधी	प्रत्यवरुद्ध	४. दूर रहने वाले
आततायिनः,	१०. पापियों को	भोजनः	३. भोग विलास से
युधिष्ठिरः	५. महाराज युधिष्ठिर	कथम् , प्रवृत्तः	१२. कैसे, राज्यकार्य में प्रवृत्त हुये(और)
धर्म भृताम्	१. धार्मिकों में	किम् , अकारषीत्	१४. क्या, किया
वरिष्ठः ।	२. शिरोमणि (तथा)	ततः ॥	१३. उसके पश्चात् (उन्होंने)

श्लोकार्थ—धार्मिकों में शिरोमणि तथा भोग विलास से दूर रहने वाले महाराज युधिष्ठिर भाइयों के साथ अपनी पैतृक सम्पत्ति के विरोधी पापियों को मारकर कैसे राज्य कार्य में प्रवृत्त हुये और उसके पश्चात् उन्होंने क्या किया ?

द्वितीयः श्लोकः

सूत उवाच— वंशं कुरोर्वंशदवाग्निनिर्हृतं, संरोहयित्वा भवभावनो हरिः ।
निवेशयित्वा निजराज्य ईश्वरो, युधिष्ठिरं प्रीतमना बभूव ह ॥२॥

पदच्छेद— वंशम् कुरोः वंश दवाग्नि निर्हृतम् , संरोहयित्वा भव भावनः हरिः ।
निवेशयित्वा निज राज्ये ईश्वरः, युधिष्ठिरम् प्रीत मनाः बभूव ह ॥

शब्दार्थ—

वंशम्	७. कुल को	निवेशयित्वा	११. स्थापित करके
कुरोः	६. महाराज कुरु के	निज राज्ये	१०. उनके राज्य में
वंश	४. (आपसी कलहरूपी) बांस वनके	ईश्वरः,	२. सर्व समर्थ
दवाग्नि, निर्हृतम्	५. दावानल से, जले हुये	युधिष्ठिरम्	९. महाराज युधिष्ठिर को
संरोहयित्वा	८. (फिर से) जीवित करके (तथा)	प्रीत मनाः	१३. प्रसन्न चित्त
भव भावनः	१. संसार के रक्षक (एवं)	बभूव	१४. हो गये थे
हरिः ।	३. भगवान् श्रीकृष्ण	ह ॥	१२. निश्चय ही

श्लोकार्थ—संसार के रक्षक एवं सर्वसमर्थ भगवान् श्री कृष्ण आपसी कलहरूपी बांस वन के दावानल से जले हुये महाराज कुरु के कुल को फिर से जीवित करके तथा महाराज युधिष्ठिर को उनके राज्य में स्थापित करके निश्चय ही प्रसन्न चित्त हो गये थे ।

तृतीयः श्लोकः

निशम्य भीष्मोक्तमथाच्युतोक्तं, प्रवृत्तविज्ञानविधूतविभ्रमः ।
शशास गामिन्द्र इवाजिताश्रयः, परिध्युपान्तामनुजानुवर्तितः ॥३॥

पदच्छेद—

निशम्य भीष्म उक्तम् अथ अच्युत उक्तम् , प्रवृत्त विज्ञान विधूत विभ्रमः ।
शशास गाम् इन्द्रः इव अजित आश्रयः, परिधि उपान्ताम् अनुज अनुवर्तितः ॥

शब्दार्थ—

निशम्य	४. सुनकर	**शशास**	१६. शासन किया था
भीष्म उक्तम्	१. भीष्मपितामह के वचन को	**गाम् इन्द्रः इव**	१५. पृथ्वी का इन्द्र के समान
अथ	२. तथा	**अजित**	९. श्रीकृष्ण के
अच्युत उक्तम् ,	३. भगवान् श्रीकृष्ण की वाणी को	**आश्रयः,**	१०. सहारे (तथा)
प्रवृत्त	६. उदय हो जाने के कारण	**परिधि**	१३. समुद्रों से
विज्ञान	५. (हृदय में) विशेष ज्ञान का	**उपान्ताम्**	१४. घिरी हुई
विधूत	८. रहित (महाराज युधिष्ठिर ने)	**अनुज**	११. आज्ञाकारी
विभ्रमः ।	७. भ्रान्ति से	**अनुवर्तितः ॥**	१२. भाइयों की सहायता से

श्लोकार्थ—भीष्मपितामह के वचन को तथा भगवान् श्रीकृष्ण की वाणी को सुनकर हृदय में विशेष ज्ञान का उदय हो जाने के कारण भ्रान्ति से रहित महाराज युधिष्ठिर ने श्रीकृष्ण के सहारे तथा आज्ञाकारी भाइयों की सहायता से समुद्रों से घिरी हुई पृथ्वी का इन्द्र के समान शासन किया था ।

चतुर्थः श्लोकः

कामं ववर्ष पर्जन्यः सर्वकामदुघा मही ।
सिषिचुः स्म व्रजान् गावः पयसोधस्वतीर्मुदा ॥४॥

पदच्छेद—

कामम् ववर्ष पर्जन्यः, सर्व काम दुघा मही ।
सिषिचुः स्म व्रजान् गावः, पयसा ऊधस्वतीः मुदा ॥

शब्दार्थ—

कामम्	२. पर्याप्त	**सिषिचुः स्मः**	१२. सींचती थीं
ववर्ष	३. वर्षा करते थे	**व्रजान्**	९. गोशालाओं को
पर्जन्यः	१. (महाराज युधिष्ठिर के राज्य में) मेघ	**गावः**	८. गायें
सर्व काम	५. सभी कामनाओं को	**पयसा**	११. दूध से
दुघा	६. देने वाली (थी)	**ऊधस्वतीः**	७. बड़े-बड़े थनों वाली
मही ।	४. पृथ्वी	**मुदा ॥**	१०. प्रसन्नता पूर्वक

श्लोकार्थ—महाराज युधिष्ठिर के राज्य में मेघ पर्याप्त वर्षा करते थे । पृथ्वी सभी कामनाओं को देने वाली थी । बड़े-बड़े थनों वाली गायें गोशालाओं को प्रसन्नतापूर्वक दूध से सींचती थीं ।

पञ्चमः श्लोकः

नद्यः समुद्रा गिरयः सवनस्पतिवीरुधः ।
फलन्त्योषधयः सर्वाः काममन्वृतु तस्य वै ॥५॥

पदच्छेद—

नद्यः समुद्राः गिरयः, स वनस्पति वीरुधः ।
फलन्ति ओषधयः सर्वाः, कामम् अनु ऋतु तस्य वै ॥

शब्दार्थ—

नद्य	२. नदियाँ	ओषधयः	८. ओषधियां
समुद्राः	३. सभी समुद्र	सर्वाः	७. सभी
गिरयः	४. सारे पर्वत	कामम्	१०. इच्छानुसार
स वनस्पति	५. वनस्पतियों के साथ	अनु ऋतु	९. प्रत्येक ऋतु में
वीरुधः।	६. लतायें (और)	तस्य	१. महाराज युधिष्ठिर के राज्य में
फलन्ति	१२. फलती थीं	वै ॥	११. निश्चय पूर्वक

श्लोकार्थ—महाराज युधिष्ठिर के राज्य में नदियाँ, सभी समुद्र, सारे पर्वत, वनस्पतियों के साथ लतायें और सभी ओषधियाँ प्रत्येक ऋतु में इच्छानुसार निश्चय पूर्वक फलती थीं ।

षष्ठः श्लोकः

नाधयो व्याधयः क्लेशा दैवभूतात्महेतवः ।
अजातशत्रावभवन् जन्तूनां राज्ञि कर्हिचित् ॥६॥

पदच्छेद—

न आधयः व्याधयः क्लेशाः, दैव भूत आत्म हेतवः ।
अजात शत्रौ अभवन्, जन्तूनाम् राज्ञि कर्हिचित् ॥

शब्दार्थ—

न	१३. नहीं	हेतवः।	८. कारण से होने वाले
आधयः	९. मानसिक (या)	अजात	२. रहित
व्याधयः	१०. शारीरिक	शत्रौ	१. शत्रुओं से
क्लेशाः	११. कष्ट	अभवन्	१४. होते थे
दैव	५. देवताओं	जन्तूनाम्	४. प्राणियों को
भूत	६. अन्य प्राणियों (तथा)	राज्ञि	३. महाराज युधिष्ठिर के राज्य में
आत्म	७. अपने	कर्हिचित् ॥	१२. कभी

श्लोकार्थ—शत्रुओं से रहित महाराज युधिष्ठिर के राज्य में प्राणियों को देवताओं, अन्य प्राणियों तथा अपने कारण से होने वाले मानसिक या शारीरिक कष्ट कभी नहीं होते थे ।

सप्तमः श्लोकः

उषित्वा हास्तिनपुरे मासान् कतिपयान् हरिः ।
सुहृदां च विशोकाय स्वसुश्च प्रियकाम्यया ॥७॥

पदच्छेद—

उषित्वा हास्तिनपुरे, मासान् कतिपयान् हरिः ।
सुहृदाम् च विशोकाय , स्वसुः च प्रिय काम्यया ॥

शब्दार्थ—

उषित्वा	१२.	निवास किया था	च	१.	तदनन्तर
हास्तिनपुरे	११.	हस्तिनापुर के राज्य में	विशोकाय	४.	शोक रहित करने के लिये
मासान्	१०.	महीने	स्वसुः	६.	बहन सुभद्रा को
कतिपयान्	९.	कुछ	च	५.	तथा
हरिः ।	२.	भगवान् श्री कृष्ण ने	प्रिय	७.	प्रसन्न करने की
सुहृदाम्	३.	मित्र-सम्बन्धियों को	काम्यया ॥	८.	कामना से

श्लोकार्थ—तदनन्तर भगवान् श्रीकृष्ण ने मित्र-सम्बन्धियों को शोक रहित करने के लिये तथा बहन सुभद्रा को प्रसन्न करने की कामना से कुछ महीने हस्तिनापुर के राज्य में निवास किया था ।

अष्टमः श्लोकः

आमन्त्र्य चाभ्यनुज्ञातः परिष्वज्याभिवाद्य तम् ।
आरुरोह रथं कैश्चित्परिष्वक्तोऽभिवादितः ॥८॥

पदच्छेद—

आमन्त्र्य च अभ्यनुज्ञातः, परिष्वज्य अभिवाद्य तम् ।
आरुरोह रथम् कैश्चित्, परिष्वक्तः अभिवादितः ॥

शब्दार्थ—

आमन्त्र्य	१.	परामर्श करके	आरुरोह	८.	चढ़ गये (उस समय)
च	२.	और (जाने के लिये)	रथम्	७.	रथ पर
अभ्यनुज्ञातः	३.	(उनसे) अनुमति पाकर	कैश्चित्	९.	(समान आयु वाले) कुछ लोगों ने
परिष्वज्य	५.	आलिंगन (तथा)	परिष्वक्तः	१०.	(उनका) आलिगन किया (एवम्)
अभिवाद्य	६.	प्रणाम करके	अभिवादितः ॥	११.	(कम आयु वालों ने) प्रणाम किया
तम् ।	४.	उनका			

श्लोकार्थ—भगवान् श्रीकृष्ण राजा युधिष्ठिर से परामर्श करके और जाने के लिये उनसे अनुमति पाकर उनका आलिगन तथा प्रणाम करके रथ पर चढ़ गये। उस समय समान आयु वाले कुछ लोगों ने उनका आलिगन किया एवम् कम आयु वालों ने प्रणाम किया ।

नवमः श्लोकः

सुभद्रा द्रौपदी कुन्ती विराटतनया तथा ।
गान्धारी धृतराष्ट्रश्च युयुत्सुर्गौतमो यमौ ॥९॥

पदच्छेद—

सुभद्रा द्रौपदी कुन्ती, विराट तनया तथा ।
गान्धारी धृतराष्ट्रः च, युयुत्सुः गौतमः यमौ ॥

शब्दार्थ—

सुभद्रा	१.	(उस समय) सुभद्रा	गान्धारी	७.	गान्धारी
द्रौपदी	२.	द्रौपदी	धृतराष्ट्रः	८.	धृतराष्ट्र
कुन्ती	३.	कुन्ती	च	९.	और
विराट	४.	राजा विराट की पुत्री	युयुत्सुः	१०.	युयुत्सु
तनया	५.	उत्तरा	गौतमः	११.	कृपाचार्य
तथा ।	६.	तथा	यमौ ॥	१२.	नकुल एवं सहदेव (भगवान् के विरह को नहीं सह सके तथा मूर्छित होगये)

श्लोकार्थ—उस समय सुभद्रा, द्रौपदी, कुन्ती, राजा विराट की पुत्री उत्तरा तथा गान्धारी, धृतराष्ट्र और युयुत्सु, कृपाचार्य, नकुल एवं सहदेव भगवान् के विरह को नहीं सह सके तथा मूर्छित हो गये ।

दशमः श्लोकः

वृकोदरश्च धौम्यश्च स्त्रियो मत्स्यसुतादयः ।
न सेहिरे विमुह्यन्तो विरहं शार्ङ्गधन्वनः ॥१०॥

पदच्छेद—

वृकोदरः च धौम्यः च, स्त्रियः मत्स्य सुता आदयः ।
न सेहिरे विमुह्यन्तः, विरहम् शार्ङ्गधन्वनः ॥

शब्दार्थ—

वृकोदरः	१.	भीमसेन	आदयः ।	६.	इत्यादि
च	२.	और	न	११.	नहीं
धौम्यः	३.	धौम्य ऋषि	सेहिरे	१२.	सह सकी थीं
च	४.	तथा	विमुह्यन्तः	८.	मूर्छित होती हुई
स्त्रियः	७.	स्त्रियाँ	विरहम्	१०.	वियोग को
मत्स्य सुता	५.	सत्यवती	शार्ङ्गधन्वनः ॥	९.	शार्ङ्गपाणि भगवान् श्रीकृष्ण के

श्लोकार्थ—भीमसेन और धौम्य ऋषि तथा सत्यवती इत्यादि स्त्रियाँ मूर्छित होती हुई शार्ङ्गपाणि भगवान् श्रीकृष्ण के वियोग को नहीं सह सकी थीं ।

एकादशः श्लोकः

सत्सङ्गान्मुक्तदुःसङ्गो हातुं नोत्सहते बुधः ।
कीर्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनम् ॥११॥

पदच्छेद—

सत् सङ्गात् मुक्त दुःसङ्गः, हातुम् न उत्सहते बुधः ।
कीर्त्यमानम् यशः यस्य, सकृत् आकर्ण्य रोचनम् ॥

शब्दार्थ—

सत् सङ्गात्	१.	सत्सङ्ग के कारण	कीर्त्यमानम्	६.	गायी जाती हुई
मुक्त	३.	दूर रहने वाले	यशः	८.	कीर्ति को
दुःसङ्गः	२.	कुसङ्ग से	यस्य	५.	जिस (भगवान् श्रीकृष्ण) की
हातुम्	११.	(उसे) छोड़ने का	सकृत्	९.	एकबार भी
न	१२.	नहीं	आकर्ण्य	१०.	सुनकर
उत्सहते	१३.	उत्साह करते हैं	रोचनम् ॥	७.	रुचिकर
बुधः ।	४.	विद्वज्जन			

श्लोकार्थ—सत्सङ्ग के कारण कुसङ्ग से दूर रहने वाले विद्वज्जन जिस भगवान् श्रीकृष्ण की गायी जाती हुई रुचिकर कीर्ति को एकबार भी सुनकर उसे छोड़ने का उत्साह नहीं करते हैं ।

द्वादशः श्लोकः

तस्मिन्न्यस्तधियः पार्थाः सहेरन् विरहं कथम् ।
दर्शनस्पर्शसंलापशयनासनभोजनैः ॥१२॥

पदच्छेद—

तस्मिन् न्यस्त धियः पार्थाः, सहेरन् विरहम् कथम् ।
दर्शन स्पर्श संलाप, शयन आसन भोजनैः ॥

शब्दार्थ—

तस्मिन्	८.	उन भगवान् श्रीकृष्ण में	दर्शन	१.	दर्शन
न्यस्त	९.	अर्पित किये हुए	स्पर्श	२.	स्पर्श
धियः	७.	बुद्धि को	संलाप	३.	वार्तालाप
पार्थाः	१०.	पाण्डव	शयन	४.	सोना
सहेरन्	१३.	सह सकते थे	आसन	५.	उठना-बैठना (और)
विरहम्	११.	(उनके) वियोग को	भोजनैः ॥	६.	भोजन आदि क्रियाओं के द्वारा
कथम् ।	१२.	कैसे			

श्लोकार्थ—दर्शन, स्पर्श, वार्तालाप, सोना, उठना, बैठना और भोजन इत्यादि क्रियाओं के द्वारा बुद्धि को उन भगवान् श्रीकृष्ण में अर्पित किये हुये पाण्डव उनके वियोग को कैसे सह सकते थे ?

त्रयोदशः श्लोकः

सर्वे तेऽनिमिषैरक्षैस्तमनुद्रुतचेतसः ।
वीक्षन्तः स्नेहसम्बद्धा विचेलुस्तत्र तत्र ह ॥१३॥

पदच्छेद—

सर्वे ते अनिमिषैः अक्षैः, तम् अनुद्रुत चेतसः ।
वीक्षन्तः स्नेह सम्बद्धाः, विचेलुः तत्र तत्र ह ॥

शब्दार्थ—

सर्वे	४.	सभी (पाण्डव)	वीक्षन्तः	८.	देखते हुए
ते	३.	वे	स्नेह	९.	प्रेम से
अनिमिषैः	६.	अपलक	सम्बद्धाः	१०.	बँधे होने के कारण
अक्षैः	७.	आँखों से	विचेलुः	१४.	दौड़ने लगे
तम्	५.	उन (भगवान् श्रीकृष्ण) को	तत्र	१२.	इधर
अनुद्रुत	१.	द्रवित	तत्र	१३.	उधर
चेतसः ।	२.	हृदय वाले	ह ॥	११.	उस समय

श्लोकार्थ—द्रवित हृदय वाले वे सभी पाण्डव उन भगवान् श्रीकृष्ण को अपलक आँखों से देखते हुए प्रेम से बँधे होने के कारण उस समय इधर-उधर दौड़ने लगे ।

चतुर्दशः श्लोकः

न्यरुन्धन्नुद्गलद्बाष्पमौत्कण्ठ्याद्देवकीसुते ।
निर्यात्यगाराન्नोऽभद्रमिति स्याद्बान्धवस्त्रियः ॥१४॥

पदच्छेद—

न्यरुन्धन् उद्गलद् बाष्पम्, औत्कण्ठ्यात् देवकी सुते ।
निर्याति अगारात् नो अभद्रम्, इति स्यात् बान्धव स्त्रियः ॥

शब्दार्थ—

न्यरुन्धन्	१३.	रोक लिया	नो	७.	न
उद्गलद्	११.	निकलते हुए	अभद्रम्	६.	असगुन
बाष्पम्	१२.	आँसुओं को	इति	९.	इसलिये
औत्कण्ठ्यात्	१०.	उत्कण्ठा के वश	स्यात्	८.	होवे
देवकीसुते ।	५.	भगवान् श्रीकृष्ण को	बान्धव	१.	बान्धवों की
निर्याति	४.	निकलते समय	स्त्रियः ॥	२.	स्त्रियों ने
अगारात्	३.	भवन से			

श्लोकार्थ—बान्धवों की स्त्रियों ने भवन से निकलते समय भगवान् श्रीकृष्ण को असगुन न होवे; इसलिये उत्कण्ठा के वश निकलते हुए आँसुओं को रोक लिया ।

पञ्चदशः श्लोकः

मृदङ्गशङ्खभेर्यश्च वीणापणवगोमुखाः ।
घुन्घुर्यानकघण्टाद्या नेदुर्दुन्दुभयस्तथा ॥१५॥

पदच्छेद—

मृदङ्ग शङ्ख भेर्यः च, वीणा पणव गोमुखाः ।
घुन्धुरी आनक घण्टा आद्याः, नेदुः दुन्दुभयः तथा ॥

शब्दार्थ—

मृदङ्ग	१. (उस समय) मृदङ्ग	घुन्धुरी	८. घुन्धरी
शङ्ख	२. शंख	आनक	९. नगाड़े
भेर्यः	३. भेरी	घण्टा	१०. घण्टा
च	४. और	आद्याः	१३. इत्यादि बाजे
वीणा	५. वीणा	नेदुः	१४. बजने लगे
पणव	६. पणव	दुन्दुभयः	१२. दुन्दुभी
गोमुखाः ।	७. गोमुख	तथा ॥	११. एवम्

श्लोकार्थ—उस समय मृदङ्ग, शंख, भेरी और वीणा, पणव, गोमुख, घुन्धरी, नगाड़े घण्टा एवम् दुन्दुभी इत्यादि बाजे बजने लगे ।

षोडशः श्लोकः

प्रासादशिखरारूढाः कुरुनार्यो दिदृक्षया ।
ववृषुः कुसुमैः कृष्णं प्रेमव्रीडास्मितेक्षणाः ॥१६॥

पदच्छेद—

प्रासाद शिखर आरूढाः, कुरु नार्यः दिदृक्षया ।
ववृषुः कुसुमैः कृष्णम् , प्रेम व्रीडा स्मित ईक्षणाः ॥

शब्दार्थ—

प्रासाद	१. (उस समय) महल की	कुसुमैः	११. फूलों की
शिखर	२. अटारी पर	कृष्णम्	९. भगवान् श्रीकृष्ण को
आरूढाः	३. चढ़ी हुई	प्रेम	५. स्नेह
कुरु नार्यः	४. कुरु कुल की स्त्रियाँ	व्रीडा	६. लज्जा (और)
दिदृक्षया ।	१०. देखने की इच्छा से	स्मित	७. मुसकान भरी
ववृषुः	१२. वर्षा करने लगीं	ईक्षणाः ॥	८. चितवन से

श्लोकार्थ—उस समय महल की अटारी पर चढ़ी हुई कुरु कुल की स्त्रियाँ स्नेह, लज्जा और मुसकान भरी चितवन से भगवान् श्रीकृष्ण को देखने की इच्छा से फूलों की वर्षा करने लगीं ।

सप्तदशः श्लोकः

सितातपत्रं जग्राह मुक्तादामविभूषितम् ।
रत्नदण्डं गुडाकेशः प्रियः प्रियतमस्य ह ॥१७॥

पदच्छेद—

सित आतपत्रम् जग्राह, मुक्ता दाम विभूषितम् ।
रत्न दण्डम् गुडाकेशः, प्रियः प्रियतमस्य ह ॥

शब्दार्थ—

सित	८.	सफेद	रत्न दण्डम्	५.	रत्नों के दण्ड वाले (एवं)
आतपत्रम्	९.	छत्र	गुडाकेशः	२.	निद्रा को जीतने वाले
जग्राह	१०.	उठाया	प्रियः	३.	प्रिय (अर्जुन) ने
मुक्ता दाम	६.	मोतियों की झालर से	प्रियतमस्य	४.	प्रियतम भगवान् श्रीकृष्ण के
विभूषितम् ।	७.	सुशोभित	ह ॥	१.	उस समय

श्लोकार्थ—उस समय निद्रा को जीतने वाले प्रिय अर्जुन ने प्रियतम भगवान् श्रीकृष्ण के रत्नों के दण्ड वाले एवं मोतियों की झालर से सुशोभित सफेद छत्र उठाया ।

अष्टादशः श्लोकः

उद्धवः सात्यकिश्चैव व्यजने परमाद्भुते ।
विकीर्यमाणः कुसुमै रेजे मधुपतिः पथि ॥१८॥

पदच्छेद—

उद्धवः सात्यकिः च एव, व्यजने परम अद्भुते ।
विकीर्यमाणः कुसुमैः, रेजे मधुपतिः पथि ॥

शब्दार्थ—

उद्धवः	१.	(उस समय) उद्धव	अद्भुते ।	५.	विचित्र
सात्यकिः	३.	सात्यकि	विकीर्यमाणः	१०.	वर्षा से
च	२.	और	कुसुमैः	९.	पुष्पों की
एव	७.	इस प्रकार	रेजे	१२.	(भगवान् श्रीकृष्ण) सुशोभित हुये थे
व्यजने	६.	चँवर (डुलाने लगे)	मधुपतिः	११.	मधु दैत्य को मारने वाले
परम	४.	अत्यन्त	पथि ॥	८.	मार्ग में

श्लोकार्थ—उस समय उद्धव और सात्यकि अत्यन्त विचित्र चँवर डुलाने लगे । इस प्रकार मार्ग में पुष्पों की वर्षा से मधु दैत्य को मारने वाले भगवान् श्रीकृष्ण सुशोभित हुए थे ।

एकोनविंशः श्लोकः

अश्रूयन्ताशिषः सत्यास्तत्र तत्र द्विजेरिताः ।
नानुरूपानुरूपाश्च निर्गुणस्य गुणात्मनः ॥१६॥

पदच्छेद—

अश्रूयन्त आशिषः सत्याः, तत्र तत्र द्विज ईरिताः ।
न अनुरूप अनुरूपाः च, निर्गुणस्य गुणात्मनः ॥

शब्दार्थ—

अश्रूयन्त	११.	सुनाई पड़ने लगे	न अनुरूप	४.	अयोग्य
आशिषः	६.	आशीर्वाद	अनुरूपाः	७.	योग्य
सत्याः	८.	सत्य	च	५.	और
तत्र तत्र	१०.	जहाँ-तहाँ	निर्गुणस्य	३.	(भगवान् श्रीकृष्ण के) निर्गुण स्वरूप के
द्विज	१.	ब्राह्मणों के द्वारा	गुणात्मनः ॥	६.	सगुण रूप के
ईरिताः ।	२.	दिये गये			

श्लोकार्थ—ब्राह्मणों के द्वारा दिये गये भगवान् श्रीकृष्ण के निर्गुणस्वरूप के अयोग्य और सगुण रूप के योग्य सत्य आशीर्वाद जहाँ-तहाँ सुनाई पड़ने लगे ।

विंशः श्लोकः

अन्योन्यमासीत्संजल्प उत्तमश्लोकचेतसाम् ।
कौरवेन्द्रपुरस्त्रीणां सर्वश्रुतिमनोहरः ॥२०॥

पदच्छेद—

अन्योन्यम् आसीत् संजल्पः, उत्तम श्लोक चेतसाम् ।
कौरव इन्द्रपुर स्त्रीणाम्, सर्व श्रुति मनोहरः ॥

शब्दार्थ—

अन्योन्यम्	६.	आपसी	कौरव	३	कौरव (और)
आसीत्	१०.	लग रही थी	इन्द्रपुर	४.	इन्द्रप्रस्थ की
संजल्पः	७.	बातचीत	स्त्रीणाम्	५.	स्त्रियों की
उत्तमश्लोक	१.	पवित्रकीर्ति (भगवान् श्री कृष्ण) में	सर्वश्रुति	८.	सबके कानों को
चेतसाम् ।	२.	चित्त लगाई	मनोहरः ॥	६.	सुहावनी

श्लोकार्थ—उस समय पवित्र कीर्ति भगवान् श्रीकृष्ण में चित्त लगाई कौरव और इन्द्रप्रस्थ की स्त्रियों की आपसी बातचीत सबके कानों को सुहावनी लग रही थी ।

एकविंशः श्लोकः

स वै किलायं पुरुषः पुरातनो, य एक आसीदविशेष आत्मनि ।
अग्रे गुणेभ्यो जगदात्मनीश्वरे, निमीलितात्मन्निशि सुप्तशक्तिषु ॥२१॥

पदच्छेद— सः वै किल अयम् पुरुषः पुरातनः, यः एकः आसीत् अविशेषः आत्मनि ।
अग्रे गुणेभ्यः जगत् आत्मनि ईश्वरे, निमीलित आत्मन् निशि सुप्त शक्तिषु ॥

शब्दार्थ—

सः वै	४. वही	अग्रे	१५.	परे
किल	७. हैं	गुणेभ्यः	१४.	(सत, रज, तम) तीनों गुणों से
अयम्	३. ये	जगत् आत्मनि	१०.	विश्व की आत्मा
पुरुषः	६. परम पुरुष	ईश्वरे,	११.	ईश्वर में
पुरातनः,	५. सनातन	निमीलित	२.	छिपाई हुई (हे सखि !)
यः	८ जो	आत्मन्	१.	अपने को
एकः, आसीत्	१८. अकेले ही, विद्यमान थे	निशि	६.	प्रलय काल में
अविशेषः	१७. निर्गुण रूप से	सुप्त	१३.	सो जाने पर
आत्मनि ।	१६. अपने स्वरूप में	शक्तिषु ॥	१२.	प्रकृति के

श्लोकार्थ—अपने को छिपाई हुई हे सखि ! ये वही सनातन परम पुरुष हैं, जो प्रलय काल में विश्व की आत्मा ईश्वर में प्रकृति के सो जाने पर सत, रज, तम तीनों गुणों से परे अपने स्वरूप में निर्गुणरूप से अकेले ही विद्यमान थे ।

द्वाविंशः श्लोकः

स एव भूयो निजवीर्यचोदितां, स्वजीवमायां प्रकृतिं सिसृक्षतीम् ।
अनामरूपात्मनि रूपनामनी, विधित्समानोऽनुससार शास्त्रकृत् ॥२२॥

पदच्छेद— सः एव भूयः निज वीर्य चोदिताम्, स्व जीव मायाम् प्रकृतिम् सिसृक्षतीम् ।
अनामरूप आत्मनि रूप नामनी, विधित्समानः अनुससार शास्त्रकृत् ॥

शब्दार्थ—

सः एव	२. उन्हीं भगवान् श्री कृष्ण ने	सिसृक्षतीम् ।	१२.	सृष्टि करने की इच्छा वाली
भूयः	५. पुनः	अनामरूप	३.	नाम और रूप से रहित
निज वीर्य	८. अपनी काल शक्ति से	आत्मनि	४.	अपने स्वरूप में
चोदिताम्,	६. प्रेरित	रूप नामनी,	६.	नाम और रूप की
स्व जीव	१०. अपने अंशभूत जीवों को	विधित्समानः	७.	रचना करने की इच्छा करते ही
मायाम्	११. मोहित करने वाली (तथा)	अनुससार	१४.	अनुसरण किया था
प्रकृतिम्	१३. प्रकृति का	शास्त्रकृत् ॥	१.	वेद और शास्त्रों के रचयिता

श्लोकार्थ—वेद और शास्त्रों के रचयिता उन्हीं भगवान् श्री कृष्ण ने नाम और रूप से रहित अपने स्वरूप में पुनः नाम और रूप की रचना करने की इच्छा करते ही अपनी काल शक्ति से प्रेरित अपने अंशभूत जीवों को मोहित करने वाली तथा सृष्टि करने की इच्छा वाली प्रकृति का अनुसरण किया था ।

त्रयोविंशः श्लोकः

स वा अयं यत्पदमत्र सूरयो, जितेन्द्रिया निर्जितमातरिश्वनः ।
पश्यन्ति भक्त्युत्कलितामलात्मना, नन्वेष सत्त्वं परिमार्ष्टुमर्हति ॥२३॥

पदच्छेद—सः वा अयम् यत् पदम् अत्र सूरयः, जित इन्द्रियाः निर्जित मातरिश्वनः ।
पश्यन्ति भक्ति उत्कलित अमल आत्मना, ननु एषः सत्त्वम् परिमार्ष्टुम् अर्हति ॥

शब्दार्थ—

सः वा	२. वही हैं	पश्यन्ति	११. साक्षात्कार करते हैं
अयम्	१. ये	भक्ति उत्कलित	९. भक्ति से प्रफुल्लित और
यत्, पदम्	३. जिनके, स्वरूप का	अमल आत्मना,	१०. शुद्ध अन्तःकरण के द्वारा
अत्र	८. इस (संसार) में	ननु	१२. निश्चय पूर्वक
सूरयः,	७. योगिजन	एषः	१३. ये ही (भगवान् श्रीकृष्ण)
जित इन्द्रियाः	४. इन्द्रियों को वशमें रखनेवाले(और)	सत्त्वम्	१४. जीवों को
निर्जित	६. जीतने वाले	परिमार्ष्टुम्	१५. पवित्र करने में
मातरिश्वनः ।	५. प्राणवायु को	अर्हति ॥	१६. समर्थ हैं

श्लोकार्थ—ये वही हैं, जिनके स्वरूप का इन्द्रियों को वश में रखने वाले और प्राणवायु को जीतने वाले योगि जन इस संसार में भक्ति से प्रफुल्लित और शुद्ध अन्तःकरण के द्वारा साक्षात्कार करते हैं। निश्चयपूर्वक ये ही भगवान् श्रीकृष्ण जीवों को पवित्र करने में समर्थ हैं ।

चतुर्विंशः श्लोकः

स वा अयं सख्यनुगीतसत्कथो, वेदेषु गुह्येषु च गुह्यवादिभिः ।
य एक ईशो जगदात्मलीलया, सृजत्यवत्यत्ति न तत्र सज्जते ॥२४॥

पदच्छेद—सः वा अयम् सखि अनुगीत सत् कथः, वेदेषु गुह्येषु च गुह्य वादिभिः ।
यः एकः ईशः जगत् आत्म लीलया, सृजति अवति अत्ति न तत्र सज्जते ॥

शब्दार्थ—

सः वा	१९. वही हैं	यः, एकः	८. जो, एक अद्वितीय
अयम्	१८. ये	ईशः	९. ईश्वर
सखि	१. हे सखि !	जगत्	११. संसार का
अनुगीत	७. गान किया है (तथा)	आत्म लीलया,	१०. अपनी लीला से
सत् कथः,	६. जिनके सुन्दर गुणों का	सृजति	१२. सृजन
वेदेषु	३. वेदों में	अवति,	१३. पालन (और)
गुह्येषु	५. रहस्यात्मक शास्त्रों में	अत्ति	१४. संहार करते हैं (किन्तु)
च	४. और	न	१६. नहीं
गुह्य वादिभिः ।	२. रहस्य बताने वाले (वेद व्यास इत्यादि मुनियों ने)	तत्र	१५. उसमें
		सज्जते ॥	१७. आसक्त होते हैं

श्लोकार्थ—हे सखि ! रहस्य बताने वाले वेद व्यास इत्यादि मुनियों ने वेदों में और रहस्यात्मक शास्त्रों में जिनके सुन्दर गुणों का गान किया है तथा जो एक अद्वितीय ईश्वर अपनी लीला से संसार का सृजन, पालन और संहार करते हैं, किन्तु उसमें आसक्त नहीं होते हैं । ये वही हैं ।

पञ्चविंशः श्लोकः

यदा ह्यधर्मेण तमोधियो नृपा, जीवन्ति तत्रैष हि सत्त्वतः किल ।
धत्ते भगं सत्यमृतं दयां यशो, भवाय रूपाणि दधद्युगे युगे ॥२५॥

पदच्छेद—यदा हि अधर्मेण तमः धियः नृपाः, जीवन्ति तत्र एषः हि सत्त्वतः किल ।
धत्ते भगम् सत्यम् ऋतम् दयाम् यशः, भवाय रूपाणि दधत् युगे युगे ॥

शब्दार्थ—

यदा	१. जब	धत्ते	१६. प्रकट करते हैं
हि	४. ही	भगम्	१२. ऐश्वर्य
अधर्मेण	३. अधर्म से	सत्यम्	१३. सत्य
तमः धियः, नृपाः,	२. तामसी बुद्धि वाले, राजा लोग	ऋतम्	१४. ऋत (पारलौकिक सत्य)
जीवन्ति	५. जीते हैं	दयाम् , यशः,	१५. करुणा (और), कीर्ति को
तत्र, एषः हि	६. तब, यही (श्रीकृष्ण भगवान्)	भवाय	११. संसार के कल्याण के लिये
सत्त्वतः	८. सत्त्वगुण से	रूपाणि, दधत्	१०. अवतारों को, धारण करते हुये
किल ।	७. निश्चयपूर्वक	युगे, युगे ॥	९. प्रत्येक, युग में

श्लोकार्थ—जब तामसी बुद्धि वाले राजा लोग अधर्म से ही जीते हैं, तब यही श्रीकृष्ण भगवान् निश्चयपूर्वक सत्त्वगुण से प्रत्येक युग में अवतारों को धारण करते हुये संसार के कल्याण के लिये ऐश्वर्य, सत्य, ऋत, करुणा और कीर्ति को प्रकट करते हैं ।

षड्विंशः श्लोकः

अहो अलं श्लाघ्यतमं यदोः कुल-महो अलं पुण्यतमं मधोर्वनम् ।
यदेष पुंसामृषभः श्रियः पतिः, स्वजन्मना चङ्क्रमणेन चाञ्चति ॥२६॥

पदच्छेद—अहो अलम् श्लाघ्यतमम् यदोः कुलम् , अहो अलम् पुण्यतमम् मधोः वनम् ।
यत् एषः पुंसाम् ऋषभः श्रियः पतिः, स्व जन्मना चङ्क्रमणेन च अञ्चति ॥

शब्दार्थ—

अहो	१. सखि ! बड़े हर्ष का विषय है कि	यत्	८. क्योंकि
अलम्	३. अत्यन्त	एषः	११. इन (भगवान् श्रीकृष्ण) ने
श्लाघ्यतमम्	४. प्रशंसनीय है (और)	पुंसाम् , ऋषभः	९. पुरुषों में, श्रेष्ठ
यदोः कुलम् ,	२. यदुकुल	श्रियः पतिः,	१०. लक्ष्मी के पति
अहो	५. बड़ी खुशी की बात है (कि)	स्व जन्मना	१२. अपने जन्म से
अलम् , पुण्यतमम्	७. अति, पवित्र है	चङ्क्रमणेन	१४. भ्रमण से
मधोः वनम् ।	६. मधुवन	च	१३. और
		अञ्चति ॥	१५. (उन्हें) सुशोभित किया है

श्लोकार्थ—सखि ! बड़े हर्ष का विषय है कि यदुकुल अत्यन्त प्रशंसनीय है और बड़ी खुशी की बात है कि मधुवन अति पवित्र है, क्योंकि पुरुषों में श्रेष्ठ लक्ष्मी के पति इन भगवान् श्रीकृष्ण ने अपने जन्म से और भ्रमण से उन्हें सुशोभित किया है ।

सप्तविंशः श्लोकः

अहो बत स्वर्यशसस्तिरस्करी, कुशस्थली पुण्ययशस्करी भुवः ।
पश्यन्ति नित्यं यदनुग्रहेषितं, स्मितावलोकं स्वपतिं स्म यत्प्रजाः ॥२७॥

पदच्छेद— अहो बत स्वः यशसः तिरस्करी, कुशस्थली पुण्य यशस्करी भुवः ।
पश्यन्ति नित्यम् यत् अनुग्रह इषितम्, स्मित अवलोकम् स्व पतिम् स्म यत् प्रजाः ॥

शब्दार्थ—

अहो बत	१. अहा बड़ा आश्चर्य है कि	**नित्यम्**	१४. सदा
स्वः यशसः	२. स्वर्ग लोक की कीर्ति का	**यत्, अनुग्रह**	१०. स्वयं की, कृपा से
तिरस्करी,	३. तिरस्कार करने वाली	**इषितम्,**	११. प्राप्त हुये (और)
कुशस्थली	४. द्वारकापुरी	**स्मित अवलोकम्**	१२. मुस्कान भरी चितवन वाले
पुण्य	६. पुण्य (और)	**स्व पतिम्**	१३. अपने स्वामी (भगवान् श्रीकृष्ण) को
यशस्करी	७. यश को वढ़ाने वाली (हैं)	**स्म**	१६. है
भुवः ।	५. पृथ्वी के	**यत्**	८. क्योंकि
पश्यन्ति	१५. देखती रहती	**प्रजाः ॥**	९. वहाँ की जनता

श्लोकार्थ—अहा बड़ा आश्चर्य है कि स्वर्गलोक की कीर्ति का तिरस्कार करने वाली द्वारकापुरी पृथ्वी के पुण्य और यश को वढ़ाने वाली है। क्योंकि वहाँ कि जनता स्वयं की कृपा से प्राप्त हुये और मुसकान भरी चितवन वाले अपने स्वामी भगवान् श्री कृष्ण को सदा देखती रहती है।

अष्टाविंशः श्लोकः

नूनं व्रतस्नानहुतादिनेश्वरः, समर्चितो ह्यस्य गृहीतपाणिभिः ।
पिबन्ति याः सख्यधरामृतं मुहु-र्व्रजस्त्रियः सम्मुमुहुर्यदाशयाः ॥२८॥

पदच्छेद— नूनम् व्रत स्नान हुत आदिना ईश्वरः, समर्चितः हि अस्य गृहीत पाणिभिः ।
पिबन्ति या सखि अधर अमृतम् मुहुः, व्रज स्त्रियः सम्मुमुहुः यद् आशयाः ॥

शब्दार्थ—

नूनम्	७. निश्चय	**पिबन्ति**	१३. पान करती हैं
व्रत, स्नान	४. उपवास, स्नान (और)	**याः**	१०. जो कि
हुत आदिना	५. हवन आदि (अनुष्ठानों) के द्वारा	**सखि**	१. हे सखि !
ईश्वरः,	६. भगवान् श्री कृष्ण की	**अधर अमृतम्**	११. इनके अधर सुधा का
समर्चितः	९. बहुत पूजा की है	**मुहुः,**	१२. बार-बार
हि	८. ही	**व्रज स्त्रियः**	१५. गोपियाँ
अस्य	२. इन (भगवान् श्री कृष्ण) की	**सम्मुमुहुः**	१६. मूर्छित हो जाती थीं
गृहीत पाणिभिः ।	३. पटरानियों ने	**यद् आशयाः ॥**	१४. जिसकी कल्पना मात्र से

श्लोकार्थ—हे सखि ! इन भगवान् श्री कृष्ण की पटरानियों ने उपवास, स्नान और हवन आदि अनुष्ठानों के द्वारा भगवान् श्री कृष्ण की निश्चय ही बहुत पूजा की है, जो कि इनके अधर सुधा का बार-बार पान करती हैं, जिसकी कल्पना मात्र से गोपियाँ मूर्छित हो जाती थीं।

एकोनत्रिंशः श्लोकः

या वीर्यशुल्केन हृताः स्वयंवरे, प्रमथ्य चैद्यप्रमुखान् हि शुष्मिणः ।
प्रद्युम्नसाम्बाम्बसुतादयोऽपरा, याश्चाहृता भौमवधे सहस्रशः ॥२९॥

पदच्छेद—याः वीर्य शुल्केन हृताः स्वयंवरे, प्रमथ्य चैद्य प्रमुखान् हि शुष्मिणः ।
प्रद्युम्न साम्ब अम्ब सुत आदयः अपराः, याः च आहृताः भौम वधे सहस्रशः ॥

शब्दार्थ—

याः	८. जो	प्रद्युम्न, साम्ब	१०. प्रद्युम्न, साम्व
वीर्य	५. पराक्रम के	अम्ब सुत	११. अम्बादि पुत्रों वाली
शुल्केन	७. मूल्य से	आदयः	१२. सभी रानियाँ
हृताः	९. लाई गयी थीं वे	अपराः,	१८. दूसरी (रानियाँ भी धन्य हैं)
स्वयंवरे,	१. स्वयंवर में	याः	१६. जो
प्रमथ्य	४. मान मर्दन करके	च	१३. और
चैद्य प्रमुखान्	३. शिशुपाल आदि प्रधान राजाओं का	आहृताः	१७. लाई गई थीं (वे)
हि	६. ही	भौम वधे	१४. भौमासुर को मार कर
शुष्मिणः ।	२. घमंडी	सहस्रशः ॥	१५. हजारों की संख्या में

श्लोकार्थ—स्वयंवर में घमंडी शिशुपाल आदि प्रधान राजाओं का मानमर्दन करके पराक्रम के ही मूल्य से जो लाई गई थीं, वे प्रद्युम्न-साम्व, आम्वादि पुत्रों वाली सभी रानियाँ और भौमासुर को मार कर हजारों की संख्या में जो लाई गई थीं, वे दूसरी रानियाँ भी धन्य हैं।

त्रिंशः श्लोकः

एताः परं स्त्रीत्वमपास्तपेशलं, निरस्तशौचं बत साधु कुर्वते ।
यासां गृहात्पुष्करलोचनः पति-र्न जात्वपैत्याहृतिभिर्हृदि स्पृशन् ॥३०॥

पदच्छेद—एताः परम् स्त्रीत्वम् अपास्त पेशलम्, निरस्त शौचम् बत साधु कुर्वते ।
यासाम् गृहात् पुष्कर लोचनः पतिः, न जातु अपैति आहृतिभिः हृदि स्पृशन् ॥

शब्दार्थ—

एताः	१. इन सभी (रानियों) ने	यासाम्, गृहात्	९. जिनके, भवन से
परम्	७. अत्यन्त	पुष्कर लोचनः	१०. कमल नयन
स्त्रीत्वम्	६. स्त्री धर्म को	पतिः,	११. स्वामो (भगवान् श्रीकृष्ण)
अपास्त	३. रहित (तथा)	न	१६. नहीं
पेशलम्,	२. स्वतन्त्रता से	जातु	१५. कभी
निरस्त	५. दूर	अपैति	१७. दूर होते हैं
शौचम्	४. पवित्रता से	आहृतिभिः	१२. उपहारों के द्वारा
बत	१८. यह आश्चर्य है	हृदि	१३. हृदय को
साधु कुर्वते ।	८. पवित्र बना दिया	स्पृशन् ॥	१४. छूते हुये

श्लोकार्थ—इन सभी रानियों ने स्वतन्त्रता से रहित तथा पवित्रता से दूर स्त्री धर्म को अत्यन्त पवित्र बना दिया है, जिनके भवन से कमल नयन स्वामी भगवान् श्रीकृष्ण उपहारों के द्वारा हृदय को छूते हुये कभी दूर नहीं होते हैं, यह आश्चर्य है।

एकत्रिंशः श्लोकः

एवंविधा गदन्तीनां स गिरः पुरयोषिताम् ।
निरीक्षणेनाभिनन्दन् सस्मितेन ययौ हरिः ॥३१॥

पदच्छेद—

एवम् विधाः गदन्तीनाम्, सः गिरः पुर योषिताम् ।
निरीक्षणेन अभिनन्दन्, सस्मितेन ययौ हरिः ॥

शब्दार्थ—

एवम् विधाः	३.	इस प्रकार की	**निरीक्षणेन**	८.	चितवन से
गदन्तीनाम्	५.	बोलती हुई	**अभिनन्दन्**	९.	अभिनन्दन करते हुये
सः	१.	उन	**सस्मितेन**	७.	मुस्कान भरी
गिरः	४.	वाणी को	**ययौ**	१०.	प्रस्थान किया
पुर योषिताम् ।	६.	हस्तिनापुर की स्त्रियों का	**हरिः ॥**	२.	भगवान् श्रीकृष्ण ने

श्लोकार्थ—उन भगवान् श्रीकृष्ण ने इस प्रकार की वाणी को बोलती हुई हस्तिनापुर की स्त्रियों का मुसकान भरी चितवन से अभिनन्दन करते हुये प्रस्थान किया ।

द्वात्रिंशः श्लोकः

अजातशत्रुः पृतनां गोपीथाय मधुद्विषः ।
परेभ्यः शङ्कितः स्नेहात्प्रायुङ्क्त चतुरङ्गिणीम् ॥३२॥

पदच्छेद—

अजात शत्रुः पृतनाम्, गोपीथाय मधु द्विषः ।
परेभ्यः शङ्कितः स्नेहात्, प्रायुङ्क्त चतुरङ्गिणीम् ॥

शब्दार्थ—

अजात शत्रुः	१.	शत्रुओं से रहित (महाराज युधिष्ठिर) ने	**शङ्कितः**	३.	शंका से
पृतनाम्	८.	सेना को	**स्नेहात्**	६.	प्रेमवश
गोपीथाय	५.	रक्षा के लिये	**प्रायुङ्क्त**	९.	(उनके साथ) भेज दिया
मधु द्विषः ।	४.	मधुसूदन (भगवान् श्रीकृष्ण) की	**चतुरङ्गिणीम् ॥**	७.	रथ, हाथी, घोड़े और पैदल
परेभ्यः	२.	शत्रुओं की			

श्लोकार्थ—शत्रुओं से रहित महाराज युधिष्ठिर ने शत्रुओं की शंका से मधुसूदन भगवान् श्रीकृष्ण की रक्षा के के लिये प्रेमवश रथ, हाथी, घोड़े और पैदल सेना को उनके साथ भेज दिया ।

त्रयस्त्रिंशः श्लोकः

अथ दूरागताञ् शौरिः कौरवान् विरहातुरान् ।
संनिवर्त्य दृढं स्निग्धान् प्रायात्स्वनगरीं प्रियैः ॥३३॥

पदच्छेद—

अथ दूर आगतान् शौरिः, कौरवान् विरह आतुरान् ।
संनिवर्त्य दृढम् स्निग्धान्, प्रायात् स्व नगरीम् प्रियैः ॥

शब्दार्थ—

अथ	१. तदनन्तर	संनिवर्त्य	१०. लौटाकर
दूर	३. दूर तक	दृढम्	७. अत्यन्त
आगतान्	४. साथ में आये हुये	स्निग्धान्	८. प्रेम से युक्त
शौरिः	२. भगवान् श्रीकृष्ण ने	प्रायात्	१४. प्रस्थान किया
कौरवान्	९. कुरुवंशी पांडवों को	स्व	१२. अपनी
विरह	५. वियोग से	नगरीम्	१३. नगरी (द्वारकापुरी) को
आतुरान् ।	६. व्याकुल (और)	प्रियैः ॥	११. उद्धव, सात्यकि इत्यादि प्रियजनों के साथ

श्लोकार्थ—तदनन्तर भगवान् श्रीकृष्ण ने दूर तक साथ में आये हुये, वियोग से व्याकुल और अत्यन्त प्रेम से युक्त कुरुवंशी पाण्डवों को लौटाकर उद्धव, सात्यकि इत्यादि प्रियजनों के साथ अपनी नगरी द्वारकापुरी को प्रस्थान किया ।

चतुस्त्रिंशः श्लोकः

कुरुजाङ्गलपाञ्चालान् शूरसेनान् सयामुनान् ।
ब्रह्मावर्तं कुरुक्षेत्रं मत्स्यान् सारस्वतानथ ॥३४॥

पदच्छेद—

कुरु जाङ्गल पाञ्चालान्, शूरसेनान् स यामुनान् ।
ब्रह्मावर्तम् कुरुक्षेत्रम्, मत्स्यान् सारस्वतान् अथ ॥

शब्दार्थ—

कुरु जाङ्गल	२. कुरुक्षेत्र का जाङ्गल देश	ब्रह्मावर्तम्	६. ब्रह्मावर्त
पाञ्चालान्	३. पंजाब देश	कुरुक्षेत्रम्	७. कुरुक्षेत्र
शूरसेनान्	४. मथुरा देश	मत्स्यान्	८. मत्स्य देश और
स यामुनान् ।	५. यमुना नदी का तटवर्ती प्रदेश	सारस्वतान्	९. सारस्वत देशों को पार करते हुये चले
		अथ ॥	१. तदनन्तर (भगवान् श्री कृष्ण)

श्लोकार्थ—तदनन्तर भगवान् श्री कृष्ण कुरुक्षेत्र का जांगल देश, पंजाब देश, मथुरा देश, यमुना नदी का तटवर्ती प्रदेश, ब्रह्मावर्त, कुरुक्षेत्र, मत्स्यदेश और सारस्वत देशों को पार करते हुये चले ।

पञ्चत्रिंशः श्लोकः

मरुधन्वमतिक्रम्य सौवीराभीरयोः परान् ।
आनर्तान् भार्गवोपागाच्छ्रान्तवाहो मनाग्विभुः ॥३५॥

पदच्छेद— मरुधन्वम् अतिक्रम्य, सौवीर आभीरयोः परान् ।
आनर्तान् भार्गव उपागात्, श्रान्त वाहः मनाग् विभुः ॥

शब्दार्थ—

मरुधन्वम्	५.	मरुस्थल को	आनर्तान्	१०.	आनर्त देश में
अतिक्रम्य	६.	पार कर	भार्गव	१.	हे शौनक जी !
सौवीर	७.	सौवीर (और)	उपागात्	११.	पहुँचे
आभीरयोः	८.	आभीर देशों से	श्रान्त वाहः	३.	थके हुये घोड़ों वाले
परान् ।	९.	पश्चिम में स्थित	मनाग्	२.	कुछ
			विभुः ॥	४.	भगवान् श्रीकृष्ण

श्लोकार्थ—हे शौनक जी ! कुछ थके हुये घोड़ों वाले भगवान् श्री कृष्ण मरुस्थल को पार कर सौवीर और आभीर देशों से पश्चिम में स्थित आनर्त देश में पहुँचे ।

षट्त्रिंशः श्लोकः

तत्र तत्र ह तत्रत्यैर्हरिः प्रत्युद्यतार्हणः ।
सायं भेजे दिशं पश्चाद् गविष्ठो गां गतस्तदा ॥३६॥

पदच्छेद— तत्र तत्र ह तत्रत्यैः, हरिः प्रत्युद्यत अर्हणः ।
सायम् भेजे दिशम् पश्चात्, गविष्ठः गाम् गतः तदा ॥

शब्दार्थ—

तत्र	२.	उन	सायम्	१४.	सायंकाल का
तत्र	३.	उन स्थानों पर	भेजे	१५.	सन्ध्या वन्दन करते थे
ह	१.	यह प्रसिद्ध है कि	दिशम्	१३.	दिशा में
तत्रत्यैः	४.	वहाँ के निवासियों के द्वारा	पश्चात्	१२.	पश्चिम
हरिः	८.	भगवान् श्री कृष्ण	गविष्ठः	७.	रथ पर बैठे हुये
प्रत्युद्यत	५.	स्वयं समर्पित	गाम्	९.	पृथ्वी पर
अर्हणः ।	६.	पूजा को प्राप्त करते हुये (तथा)	गतः	१०.	उतर कर
			तदाः ॥	११.	उस समय

श्लोकार्थ—यह प्रसिद्ध है कि उन-उन स्थानों पर वहाँ के निवासियों के द्वारा स्वयं समर्पित पूजा को प्राप्त करते हुये तथा रथ पर बैठे हुये भगवान् श्री कृष्ण पृथ्वी पर उतर कर उस समय पश्चिम दिशा में सायंकाल का सन्ध्यावन्दन करते थे ।

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे नैमिषीयोपाख्याने
श्रीकृष्णद्वारकागमनं नाम दशमः अध्यायः ॥१०॥

श्रीमद्भागवतमहापुराणम्
प्रथमः स्कन्धः
अथ एकादशः अध्यायः
प्रथमः श्लोकः

सूत उवाच--- आनर्तान् स उपव्रज्य स्वृद्धाञ्जनपदान् स्वकान् ।
दध्मौ दरवरं तेषां विषादं शमयन्निव ॥१॥

पदच्छेद— आनर्तान् सः उपव्रज्य, स्वृद्धान् जनपदान् स्वकान् ।
दध्मौ दरवरम् तेषाम्, विषादम् शमयन् इव ॥

शब्दार्थ—

आनर्तान्	४. आनर्त	दध्मौ	१२. बजाया
सः	१. भगवान् श्रीकृष्ण ने	दरवरम्	११. श्रेष्ठ शंख को
उपव्रज्य	६. पहुँचकर	तेषाम्	७. वहाँ की जनता के
स्वृद्धान्	३. भरे-पूरे सम्पन्न	विषादम्	८. कष्ट को
जनपदान्	५. देश में	शमयन्	९. शान्त करते हुये
स्वकान् ।	२. अपने	इव ॥	१०. से

श्लोकार्थ—भगवान् श्रीकृष्ण ने अपने भरे-पूरे सम्पन्न आनर्त देश में पहुँचकर वहाँ की जनता के कष्ट को शान्त करते हुये से श्रेष्ठ शंख को बजाया ।

द्वितीयः श्लोकः

स उच्चकाशे धवलोदरो दरो-ऽप्युरुक्रमस्याधरशोणशोणिमा ।
दाध्मायमानः करकञ्जसम्पुटे, यथाब्जखण्डे कलहंस उत्स्वनः ॥२॥

पदच्छेद—सः उच्चकाशे धवल उदरः दरः, अपि उरुक्रमस्य अधर शोण शोणिमा ।
दाध्मायमानः कर कञ्ज सम्पुटे, यथा अब्ज खण्डे कल हंसः उत्स्वनः ॥

शब्दार्थ—

सः	१२. वह	दाध्मायमानः	८. बजाया जाता हुआ
उच्चकाशे	१४. अत्यन्त शोभित हो रहा था	कर, कञ्ज	६. हस्तरूपी, कमलों के
धवल, उदरः	९. सफेद, मध्य भागवाला तथा	सम्पुटे,	७. मध्य में
दरः, अपि	१३. शंख, भी	यथा	१. जैसे
उरुक्रमस्य	५. भगवान् श्रीकृष्ण के	अब्ज, खण्डे	२. कमल के, मध्य में
अधर	१०. अधरों की	कल हंसः	३. सुन्दर हंस
शोण, शोणिमा ।	११. लाली से, लाल	उत्स्वनः ॥	४. शब्द करता है (उसी प्रकार)

श्लोकार्थ—जैसे कमल के मध्य में सुन्दर हंस शब्द करता है, उसी प्रकार भगवान् श्रीकृष्ण के हस्तरूपी कमलों के मध्य में बजाया जाता हुआ, सफेद मध्य भाग वाला तथा अधरों की लाली से लाल वह शंख भी अत्यन्त शोभित हो रहा था ।

तृतीयः श्लोकः

तमुपश्रुत्य निनदं जगद्भयभयावहम् ।
प्रत्युद्ययुः प्रजाः सर्वा भर्तृदर्शनलालसाः ॥३॥

पदच्छेद—

तम् उपश्रुत्य निनदम् , जगद् भय भय आवहम् ।
प्रत्युद्ययुः प्रजाः सर्वाः, भर्तृ दर्शन लालसाः ॥

शब्दार्थ—

तम्	३.	उस	प्रत्युद्ययुः	१०.	सामने पहुँची
उपश्रुत्य	५.	सुनकर	प्रजाः	७.	जनता
निनदम्	४.	शंख ध्वनि को	सर्वाः	६.	सारी
जगद् भय	१.	जगत् के भय को	भर्तृ	८.	स्वामी के
भय आवहम् ।	२.	भयभीत कर देने वाली	दर्शन लालसाः ॥	९.	दर्शन की इच्छा से

श्लोकार्थ—जगत् के भय को भयभीत कर देने वाली उस शंख ध्वनि को सुनकर सारी जनता स्वामी के दर्शन की इच्छा से सामने पहुँची ।

चतुर्थः श्लोकः

तत्रोपनीतबलयो रवेर्दीपमिवादृताः ।
आत्मारामं पूर्णकामं निजलाभेन नित्यदा ॥४॥

पदच्छेद—

तत्र उपनीत बलयः, रवेः दीपम् इव आदृताः ।
आत्म आरामम् पूर्ण कामम् , निज लाभेन नित्यदा ॥

शब्दार्थ—

तत्र	१.	वहाँ की (जनता ने)	आदृताः ।	१२.	स्वागत किया
उपनीत	५.	समर्पित	आत्म	१०.	आत्मा में
बलयः	६.	उपहारों द्वारा	आरामम्	११.	विहार करने वाले (श्रीकृष्ण का)
रवेः	२.	सूर्य को	पूर्ण कामम्	९.	परिपूर्ण मनोरथों वाले (तथा)
दीपम्	३.	दीप दान के	निज लाभेन	७.	अपने आत्म लाभ से
इव	४.	समान	नित्यदा ॥	८.	सदा

श्लोकार्थ—वहाँ की जनता ने सूर्य को दीपदान के समान समर्पित उपहारों द्वारा अपने आत्मलाभ से सदा परिपूर्ण मनोरथों वाले तथा आत्मा में विहार करने वाले भगवान् श्रीकृष्ण का स्वागत किया ।

पञ्चमः श्लोकः

प्रीत्युत्फुल्लमुखाः प्रोचुर्हर्षगद्गदया गिरा ।
पितरं सर्वसुहृदमवितारमिवार्भकाः ॥५॥

पदच्छेद— प्रीति उत्फुल्ल मुखाः प्रोचुः, हर्ष गद् गदया गिरा ।
पितरम् सर्वं सुहृदम्, अवितारम् इव अर्भकाः ॥

शब्दार्थ—

प्रीति	७.	प्रसन्नता के कारण	पितरम्	३.	पिता से
उत्फुल्ल	८.	खिले	सर्व	१०.	सब के
मुखाः	९.	मुखवाले (वहाँ के निवासी)	सुहृदम्	११.	मित्र और
प्रोचुः	१३.	बोले	अवितारम्	१२.	संरक्षक (भगवान् श्री कृष्ण) से
हर्ष	४.	खुशी के मारे	इव	१.	जैसे
गद्गदया	५.	गद्गद	अर्भकाः ॥	२.	बच्चे
गिरा ।	६.	वाणी में (बोलते हैं, उसी तरह)			

श्लोकार्थ—जैसे बच्चे पिता से खुशी के मारे गद्गद वाणी में बोलते हैं, उसी तरह प्रसन्नता के कारण खिले मुखवाले वहाँ के निवासी सबके मित्र और संरक्षक भगवान् श्रीकृष्ण से बोले ।

षष्ठः श्लोकः

नताः स्म ते नाथ सदाङ्घ्रिपङ्कजं, विरिञ्चिवैरिञ्च्यसुरेन्द्रवन्दितम् ।
परायणं क्षेममिहेच्छतां परं, न यत्र कालः प्रभवेत् परः प्रभुः ॥६॥

पदच्छेद—नताः स्म ते नाथ सदा अङ्घ्रि पङ्कजम्, विरिञ्चि वैरिञ्च्य सुरेन्द्र वन्दितम् ।
परायणम् क्षेमम् इह इच्छताम् परम्, न यत्र कालः प्रभवेत् परः प्रभुः ॥

शब्दार्थ—

नताः स्म	१३.	प्रणत हैं	क्षेमम्	३.	कल्याण
ते	१०.	आपके	इह	२.	इस संसार में
नाथ	१.	हे स्वामिन् !	इच्छताम्	४.	चाहने वाले (लोगों) का
सदा	१२.	नित्य	परम्,	५.	सर्वोत्तम
अङ्घ्रि, पङ्कजम्	११.	चरण कमलों में (हम)	न	१७.	नहीं
विरिञ्चि वैरिञ्च्य	७.	ब्रह्मा, शम्भु और	यत्र	१४.	जहाँ पर
सुरेन्द्र	८.	इन्द्र से	कालः	१६.	काल (भी)
वन्दितम् ।	९.	पूजित	प्रभवेत्	१८.	समर्थ हो सकता है
परायणम्	६.	आश्रय (तथा)	परः प्रभुः ॥	१५.	सर्व शक्तिमान्

श्लोकार्थ—हे स्वामिन् ! इस संसार में कल्याण चाहने वाले लोगों का सर्वोत्तम आश्रय तथा ब्रह्मा, शम्भु और इन्द्र से पूजित आपके चरण कमलों में हम नित्य प्रणत हैं; जहाँ पर सर्व शक्तिमान् काल भी समर्थ नहीं हो सकता है ।

सप्तमः श्लोकः

भवाय नस्त्वं भव विश्वभावन, त्वमेव माताथ सुहृत् पतिः पिता ।
त्वं सद्गुरुर्नः परमं च दैवतं, यस्यानुवृत्त्या कृतिनो बभूविम ॥७॥

पदच्छेद— भवाय नः त्वम् भव विश्व भावन, त्वम् एव माता अथ सुहृत् पतिः पिता ।
त्वम् सद् गुरुः नः परमम् च दैवतम्, यस्य अनुवृत्त्या कृतिनः बभूविम ॥

शब्दार्थ—

भवाय	४. मंगल के लिये	**त्वम्**	९.	आपही
नः	३. हमारे	**सद् गुरुः**	११.	श्रेष्ठ गुरु
त्वम्	२. आप	**नः**	१०.	हमारे
भव	५. होवें	**परमम्**	१३.	सर्वोत्तम
विश्व भावन,	१. हे जगत् के रक्षक !	**च**	१२.	और
त्वम् एव माता	६. आप ही माता	**दैवतम्,**	१४.	देवता हैं
अथ	८. तथा	**यस्य अनुवृत्त्या**	१५.	जिस आपकी सेवा से (हमलोग)
सुहृत् पतिः पिता ।	७. मित्र, पति, पिता हैं	**कृतिनः बभूविम ॥**	१६.	भाग्यशाली हुये हैं

श्लोकार्थ—हे जगत् के रक्षक ! आप हमारे मंगल के लिये होवें । आप-ही माता, मित्र, पति और पिता हैं तथा आपही हमारे श्रेष्ठ गुरु और सर्वोत्तम देवता हैं; जिस आपकी सेवा से हम लोग भाग्यशाली हुये हैं ।

अष्टमः श्लोकः

अहो सनाथा भवता स्म यद्वयं, त्रैविष्टपानामपि दूरदर्शनम् ।
प्रेमस्मितस्निग्धनिरीक्षणाननं, पश्येम रूपं तव सर्वसौभगम् ॥८॥

पदच्छेद— अहो सनाथाः भवता स्म यत् वयम् , त्रैविष्टपानाम् अपि दूर दर्शनम् ।
प्रेम स्मित स्निग्ध निरीक्षण आननम्, पश्येम रूपम् तव सर्व सौभगम् ॥

शब्दार्थ—

अहो	१. सौभाग्य है कि	**प्रेम**	९.	प्रेमभरी
सनाथाः	४. सनाथ	**स्मित**	१०.	मुसकान और
भवता	३. आपसे	**स्निग्ध**	११.	भोली
स्म	५. हैं	**निरीक्षण**	१२.	चितवन वाले
यत्	६. क्योंकि	**आननम्**	१३.	मुख से युक्त
वयम् ,	२. हम लोग	**पश्येम**	१६.	(हम) देखते हैं
त्रैविष्टपानाम् अपि	७. देवताओं से भी	**रूपम्**	१५.	स्वरूप को
दूरं दर्शनम् ।	८. अलभ्य दर्शन वाले (तथा)	**तव सर्व सौभगम् ॥**	१४.	आपके सबसे सुन्दर

श्लोकार्थ—सौभाग्य है कि हम लोग आपसे सनाथ हैं; क्योंकि देवताओं से भी अलभ्य दर्शन वाले तथा प्रेमभरी मुसकान और भोली चितवन वाले मुख से युक्त आपके सबसे सुन्दर स्वरूप को हम देखते हैं ।

नवमः श्लोकः

यर्ह्यम्बुजाक्षापससार भो भवान्, कुरून् मधून् वाथ सुहृद्दिदृक्षया ।
तत्राब्दकोटिप्रतिमः क्षणो भवेद्, रविं विनाक्ष्णोरिव नस्तवाच्युत ॥९॥

पदच्छेद— यर्हि अम्बुज अक्ष अपससार भो भवान्, कुरून् मधून् वा अथ सुहृद् दिदृक्षया ।
तत्र अब्द कोटि प्रतिमः क्षणः भवेत्, रविम् विना अक्ष्णोः इव नः तव अच्युत ॥

शब्दार्थ—

यर्हि	३.	जब	तत्र	११.	उस समय
अम्बुज अक्ष	२.	कमलनयन !	अब्द कोटि	१९.	करोड़ों वर्षों के
अपससार	१०.	चले जाते हैं	प्रतिमः	२०.	समान
भो	१.	हे	क्षणः	१८.	एक क्षण
भवान्,	४.	आप	भवेत्,	२१.	हो जाता है
कुरून्	५.	पाण्डवों	रविम्	१३.	सूर्य के
मधून्	७.	मथुरावासी	विना अक्ष्णोः	१४.	विना आँखों के
वा अथ	६.	और	इव	१५.	समान
सुहृद्	८.	मित्रों को	नः	१७.	हमारा
दिदृक्षया ।	९.	देखने की इच्छा से	तव	१६.	आपके (विना)
			अच्युत ॥	१२.	हे श्री कृष्ण !

श्लोकार्थ—हे कमलनयन ! जब आप पाण्डवों और मथुरावासी मित्रों को देखने की इच्छा से चले जाते हैं; उस समय हे श्री कृष्ण ! सूर्य के विना आँखों के समान आप के विना हमारा एक क्षण करोड़ों वर्षों के समान हो जाता है ।

दशमः श्लोकः

इति चोदीरिता वाचः प्रजानां भक्तवत्सलः ।
शृण्वानोऽनुग्रहं दृष्ट्या वितन्वन् प्राविशत्पुरीम् ॥१०॥

पदच्छेद— इति, च उदीरिताः वाचः, प्रजानाम् भक्त वत्सलः ।
शृण्वानः अनुग्रहम् दृष्ट्या, वितन्वन् प्राविशत् पुरीम् ॥

शब्दार्थ—

इति	२.	इस प्रकार	शृण्वानः	६.	सुनते हुये
च	७.	और	अनुग्रहम्	८.	करुणामयी
उदीरिताः	३.	कही गई	दृष्ट्या	९.	दृष्टि से
वाचः	५.	वाणी को	वितन्वन्	१०.	देखते हुये
प्रजानाम्	४.	जनता की	प्राविशत्	१२.	प्रवेश किया
भक्त वत्सलः ।	१.	भगवान् श्री कृष्ण ने	पुरीम् ॥	११.	द्वारका पुरी में

श्लोकार्थ—भगवान् श्री कृष्ण ने इस प्रकार कही गई जनता की वाणी को सुनते हुये और करुणामयी दृष्टि से देखते हुये द्वारका पुरी में प्रवेश किया ।

एकादशः श्लोकः

मधुभोजदशार्हार्हकुकुरान्धकवृष्णिभिः ।
आत्मतुल्यबलैर्गुप्तां नागैर्भोगवतीमिव ॥११॥

पदच्छेद—

मधु भोज दशार्ह अर्ह, कुकुर अन्धक वृष्णिभिः ।
आत्म तुल्य बलैः गुप्ताम् , नागैः भोगवतीम् इव ॥

शब्दार्थ—

मधु	७. मधुकुल		**आत्म**	४. (उसी प्रकार वह नगरी) अपने
भोज	८. भोज		**तुल्य**	५. समान
दशार्ह	९. दशार्ह		**बलैः**	६. बलशाली
अर्ह	१०. अर्ह		**गुप्ताम्**	१३. सुरक्षित थी
कुकुर	११. कुकुर		**नागैः**	२. नागों से
अन्धक	१२. अन्धक (और)		**भोगवतीम्**	३. पातालपुरी (रक्षित है)
वृष्णिभिः ।	१३. वृष्णिकुल के यादवों से		**इव ॥**	१. जिस प्रकार

श्लोकार्थ—जिस प्रकार नागों से पातालपुरी रक्षित है, उसी प्रकार वह नगरी अपने समान बलशाली मधुकुल, भोज, दशार्ह, अर्ह, कुकुर, अन्धक और वृष्णि कुल के यादवों से सुरक्षित थी ।

द्वादशः श्लोकः

सर्वर्तुसर्वविभवपुण्यवृक्षलताश्रमैः ।
उद्यानोपवनारामैर्वृतपद्माकरश्रियम् ॥१२॥

पदच्छेद—

सर्व ऋतु सर्व विभव, पुण्य वृक्ष लता आश्रमैः ।
उद्यान उपवन आरामैः, वृत पद्माकर श्रियम् ॥

शब्दार्थ—

सर्व	१. (वह नगरी) सभी	**उद्यान**	७. बगीचे
ऋतु	२. ऋतुओं में	**उपवन**	८. वाटिका (तथा)
सर्व विभव	३. सारे वैभव	**आरामैः**	९. क्रीडा वनों से (एवं)
पुण्य वृक्ष	४. पवित्र वृक्षों (और)	**वृत**	१२. घिरी हुई (थी)
लता	५. लताओं के	**पद्माकर**	१०. सरोवर के कमलों की
आश्रमैः ।	६. कुंजों	**श्रियम् ।**	११. शोभा से

श्लोकार्थ—वह नगरी सभी ऋतुओं में सारे वैभव, पवित्र वृक्षों और लताओं के कुंजों, बगीचे, वाटिका तथा क्रीडा वनों से एवम् सरोवर के कमलों की शोभा से घिरी हुई थी ।

त्रयोदशः श्लोकः

गोपुरद्वारमार्गेषु　कृतकौतुकतोरणाम् ।
चित्रध्वजपताकाग्रैरन्तःप्रतिहतातपाम् ॥१३॥

पदच्छेद—

गोपुर द्वार मार्गेषु, कृत कौतुक तोरणाम् ।
चित्र ध्वज पताकाग्रैः, अन्तः प्रतिहत आतपाम् ॥

शब्दार्थ—

गोपुर	१.	नगर के फाटक	चित्र	७.	अनेक रंगों की
द्वार	२.	दरवाजों (और)	ध्वज	८.	ध्वजाओं (और)
मार्गेषु	३.	सड़कों पर	पताकाग्रैः	९.	झण्डियां से
कृत	६.	लगाई गई (थीं)	अन्तः	११.	अन्दर
कौतुक	४.	स्वागतार्थ	प्रतिहत	१२.	नहीं आरही थी
तोरणाम् ।	५.	वन्दनवारें	आतपाम् ॥	१०.	सूर्य की धूप

श्लोकार्थ—नगर के फाटक, दरवाजों और सड़कों पर स्वागतार्थ वन्दनवारें लगाई गई थीं। अनेक रंगों की ध्वजाओं और झण्डियों से सूर्य की धूप अन्दर नहीं आरही थी।

चतुर्दशः श्लोकः

सम्मार्जितमहामार्ग　रथ्यापणकचत्वराम् ।
सिक्तां गन्धजलैरुप्तां　फलपुष्पाक्षताङ्कुरैः ॥१४॥

पदच्छेद—

सम्मार्जित महामार्ग, रथ्या आपणक चत्वराम् ।
सिक्ताम् गन्ध जलैः उप्ताम्, फल पुष्प अक्षत अङ्कुरैः ॥

शब्दार्थ—

सम्मार्जित	५.	साफ सुथरे कर दिये गये थे	गन्ध जलैः	६.	सुगन्धित जल से
महामार्ग	१.	(वहाँ के) राजमार्ग	उप्ताम्	१२.	विखेरे गये थे
रथ्या	२.	गलियाँ	फल	८.	फल
आपणक	३.	छोटे-बड़े बाजार (और)	पुष्प	९.	फूल
चत्वराम् ।	४.	चौक	अक्षत	१०.	चावल और
सिक्ताम्	७.	सींचे गये थे (तथा)	अङ्कुरैः ॥	११.	दुर्वा अंकुर

श्लोकार्थ—वहां के राजमार्ग, गलियां, छोटे-बड़े बाजार और चौक साफ सुथरे कर दिये गये थे; सुगन्धित जल से सींचे गये थे तथा फल, फूल, चावल और दुर्वा अंकुर विखेरे गये थे।

पञ्चदशः श्लोकः

द्वारि द्वारि गृहाणां च दध्यक्षतफलेक्षुभिः ।
अलंकृतां पूर्णकुम्भैर्बलिभिर्धूपदीपकैः ॥१५॥

पदच्छेद—

द्वारि द्वारि गृहाणाम् च, दधि अक्षत फल इक्षुभिः ।
अलंकृताम् पूर्ण कुम्भैः, बलिभिः धूप दीपकैः ॥

शब्दार्थ—

द्वारि	२.	प्रत्येक	इक्षुभिः ।	७.	ईखों से
द्वारि	३.	दरवाजों पर	अलंकृताम्	१४.	सजाई गई थी
गृहाणाम्	१.	घरों के	पूर्ण	९.	जल से भरे
च	८.	और	कुम्भैः	१०.	कलशों से
दधि	४.	दही	बलिभिः	११.	उपहारों से (तथा)
अक्षत	५.	चावल	धूप	१२.	धूप और
फल	६.	फल (तथा)	दीपकैः ॥	१३.	दीपों से (वह नगरी)

श्लोकार्थ—घरों के प्रत्येक दरवाजों पर दही, चावल, फल तथा ईखों से और जल से भरे कलशों से, उपहारों से तथा धूप और दीपों से वह नगरी सजाई गई थी ।

षोडशः श्लोकः

निशम्य प्रेष्ठमायान्तं वसुदेवो महामनाः ।
अक्रूरश्चोग्रसेनश्च रामश्चाद्भुतविक्रमः ॥१६॥

पदच्छेद—

निशम्य प्रेष्ठम् आयान्तम्, वसुदेवः महामनाः ।
अक्रूरः च उग्रसेनः च, रामः च अद्भुत विक्रमः ॥

शब्दार्थ—

निशम्य	१२.	सुनकर (अत्यन्त हर्षित हुये)	च	४.	और
प्रेष्ठम्	१०.	अत्यन्त प्यारे भगवान् श्रीकृष्ण को	उग्रसेन	५.	उग्रसेन जी
आयान्तम्	११.	आया हुआ	च	६.	तथा
वसुदेवः	२.	वसुदेव जी	रामः	९.	बलराम जी
महामनाः ।	१.	उदार हृदय वाले	च	१३.	और (अगवानी करने गये)
अक्रूरः	३.	अक्रूर	अद्भुत	७.	अतुल
			विक्रमः ॥	८.	बलशाली

श्लोकार्थ—उदार हृदय वाले वसुदेव जी अक्रूर और उग्रसेन जी तथा अतुल बलशाली बलराम जी अत्यन्त प्यारे भगवान् श्री कृष्ण को आया हुआ सुनकर अत्यन्त हर्षित हुये और उनकी अगवानी करने गये ।

सप्तदशः श्लोकः

प्रद्युम्नश्चारुदेष्णश्च साम्बो जाम्बवतीसुतः ।
प्रहर्षवेगोच्छ्वशितशयनासनभोजनाः ॥१७॥

पदच्छेद— प्रद्युम्नः चारुदेष्णः च, साम्बः जाम्बवती सुतः ।
प्रहर्ष वेग उच्छशित, शयन आसन भोजनाः ॥

शब्दार्थ—

प्रद्युम्नः	१. प्रद्युम्न	प्रहर्ष वेग	६. प्रसन्नता के कारण
चारुदेष्णः	२. चारुदेष्ण	उच्छशित	१०. छोड़ दिया
च	३. और	शयन	७. सोना
साम्बः	५. साम्ब ने	आसन	८. बैठना और
जाम्बवती सुतः ।	४. जाम्बवती के पुत्र	भोजनाः ॥	९. भोजन करना

श्लोकार्थ—प्रद्युम्न, चारुदेष्ण और जाम्बवती के पुत्र साम्ब ने प्रसन्नता के कारण सोना, बैठना और भोजन करना छोड़ दिया ।

अष्टादशः श्लोकः

वारणेन्द्रं पुरस्कृत्य ब्राह्मणैः ससुमङ्गलैः ।
शङ्खतूर्यनिनादेन ब्रह्मघोषेण चाहताः ।
प्रत्युज्जग्मू रथैर्हृष्टाः प्रणयागतसाध्वसाः ॥१८॥

पदच्छेद— वारणेन्द्रम् पुरस्कृत्य, ब्राह्मणैः स सुमङ्गलैः ।
शङ्ख तूर्य निनादेन, ब्रह्म घोषेण च आदृताः ।
प्रत्युज्जग्मुः रथैः हृष्टाः, प्रणय आगत साध्वसाः ॥

शब्दार्थ—

वारणेन्द्रम्	४. गजराज को	च	१०. तथा
पुरस्कृत्य	५. आगे करके	आदृताः ।	१४. आदर पूर्वक (भगवान् श्रीकृष्ण की)
ब्राह्मणैः	६. ब्राह्मणों और	प्रत्युज्जग्मुः	१५. अगवानी करने के लिये गये ।
स सुमङ्गलैः ।	७. मंगलकारी वस्तुओं को लेकर	रथैः	१३. रथों पर चढ़कर
शङ्ख तूर्य	८. शंख और तुरही की	हृष्टाः	१२. प्रसन्न होते हुये (और)
निनादेन	९. ध्वनि	प्रणय	१. प्रेम के
ब्रह्म घोषेण	११. वेद पाठ के साथ	आगत	२. कारण
		साध्वसाः ॥	३. घबड़ाये हुये (वे लोग)

आगस्कृत्	६.	पाप करने वाला (है)	**अपि**	९.	भी (मैं)
निरङ्कुशः	३.	उद्दण्ड (व्यक्ति)	**स**	११.	साथ (उसकी)
आहर्ता।	१३.	उखाड़ देने वाला	**अङ्गदम् ॥**	१०.	बाजूबन्द के

श्लोकार्थ—मेरे राज्य में जो उद्दण्ड व्यक्ति निरपराध प्राणियों के प्रति पाप करने वाला है, साक्षात् देवता होने पर भी मैं बाजूबन्द के साथ उसकी भुजाओं को उखाड़ देने वाला हूँ।

षोडशः श्लोकः

राज्ञो हि परमो धर्मः स्वधर्मस्थानुपालनम्।
शासतोऽन्यान् यथाशास्त्रमनापद्युत्पथानिह ॥१६॥

पदच्छेद—

राज्ञः हि परमः धर्मः, स्व धर्मस्थ अनुपालनम्।
शासतः अन्यान् यथा शास्त्रम्, अनापदि उत्पथान् इह ॥

शब्दार्थ—

राज्ञः	८.	राजा का	**शासतः**	७.	दण्ड देने वाले
हि	१२.	ही	**अन्यान्**	४.	असज्जन (व्यक्तियों) को
परमः	१३.	परम	**यथा**	६.	अनुसार
धर्मः	१४.	धर्म (है)	**शास्त्रम्**	५.	शास्त्र के
स्व	९.	अपने	**अनापदि**	२.	संकट के बिना ही
धर्मस्थ	१०.	धर्म में स्थित (जनों का)	**उत्पथान्**	३.	कुमार्ग में जाने वाले
अनुपालनम्।	११.	पालन करना	**इह ॥**	१.	इस संसार में

श्लोकार्थ—इस संसार में संकट के बिना ही कुमार्ग में जाने वाले असज्जन व्यक्तियों को शास्त्र के अनुसार दण्ड देने वाले राजा का अपने धर्म में स्थित जनों का पालन करना ही परम धर्म है।

सप्तदशः श्लोकः

एतद्वः पाण्डवेयानां युक्तमार्ताभयं वचः ।
येषां गुणगणैः कृष्णो दौत्यादौ भगवान् कृतः ॥१७॥

पदच्छेद—

एतत् वः पाण्डवेयानाम्, युक्तम् आर्त अभयम् वचः ।
येषाम् गुण गणैः कृष्णः, दौत्य आदौ भगवान् कृतः ॥

शब्दार्थ—

एतत्	३.	यह	येषाम्	८.	जिनके
वः	५.	आप	गुण	९.	उत्तम गुणों के
पाण्डवेयानाम्	६.	पाण्डववंशी राजाओं के	गणैः	१०.	समूह से (प्रसन्न होकर)
युक्तम्	७.	योग्य है	कृष्णः	१२.	श्रीकृष्ण ने
आर्त	१.	दुखियों को	दौत्य आदौ	१३.	दूत, सारथी (इत्यादि का काम)
अभयम्	२.	अभय देने वाली	भगवान्	११.	भगवान्
वचः ।	४.	वाणी	कृतः ॥	१४.	किया था

श्लोकार्थ—दुखियों को अभय देने वाली यह वाणी आप पाण्डववंशी राजाओं के योग्य है, जिनके उत्तम गुणों के समूह से प्रसन्न होकर भगवान् श्रीकृष्ण ने दूत, सारथी इत्यादि का काम किया था ।

अष्टादशः श्लोकः

न वयं क्लेशबीजानि यतः स्युः पुरुषर्षभ ।
पुरुषं तं विजानीमो वाक्यभेदविमोहिताः ॥१८॥

पदच्छेद—

न वयम् क्लेश बीजानि, यतः स्युः पुरुष ऋषभ ।
पुरुषम् तम् विजानीमः, वाक्य भेद विमोहिताः ॥

शब्दार्थ—

न	९.	नहीं	ऋषभ ।	२.	श्रेष्ठ
वयम्	६.	हम सब	पुरुषम्	८.	पुरुष को
क्लेश	१२.	कष्टों के	तम्	७.	उस
बीजानि	१३.	बीज	विजानीमः	१०.	जानते हैं
यतः	११.	जिससे	वाक्य	३.	शास्त्रों के
स्युः	१४.	उत्पन्न होते हैं	भेद	४.	भेद से
पुरुष	१.	हे पुरुष	विमोहिताः ॥	५.	भ्रम में पड़े हुये

श्लोकार्थ—हे पुरुष श्रेष्ठ ! शास्त्रों के भेद से भ्रम में पड़े हुये हम सब उस पुरुष को नहीं जानते हैं, जिससे कष्टों के बीज उत्पन्न होते हैं ।

एकोनविंशः श्लोकः

केचिद् विकल्पवसना आहुरात्मानमात्मनः ।
दैवमन्ये परे कर्म स्वभावमपरे प्रभुम् ॥१९॥

पदच्छेद—

केचित् विकल्प वसनाः, आहुः आत्मानम् आत्मनः ।
दैवम् अन्ये परे कर्म, स्वभावम् अपरे प्रभुम् ॥

शब्दार्थ—

केचित्	३.	कुछ (व्यक्ति)	अन्ये	५.	दूसरे लोग
विकल्प	१.	तर्क का	परे	७.	कोई
वसनाः	२.	बाना पहिने	कर्म	८.	कर्म को (कोई)
आहुः	१३.	बताते हैं	स्वभावम्	९.	स्वभाव को (और)
आत्मानम्	४.	अपने को	अपरे	१०.	कुछ लोग
आत्मनः ।	१२.	अपना कारण	प्रभुम् ॥	११.	ईश्वर को
दैवम्	६.	भाग्य को			

श्लोकार्थ—तर्क का बाना पहिने कुछ व्यक्ति अपने को, दूसरे लोग भाग्य को, कोई कर्म को, कोई स्वभाव को और कुछ लोग ईश्वर को अपना कारण बताते हैं ।

विंशः श्लोकः

अप्रतर्क्यादनिर्देश्यादिति केष्वपि निश्चयः ।
अत्रानुरूपं राजर्षे विमृश स्वमनीषया ॥२०॥

पदच्छेद—

अप्रतर्क्यात् अनिर्देश्यात्, इति केषु अपि निश्चयः ।
अत्र अनुरूपम् राजर्षे, विमृश स्व मनीषया ॥

शब्दार्थ—

अप्रतर्क्यात्	१.	(वह कारण) तर्क से परे है (एवं)	अत्र	८.	इस (विषय) में
अनिर्देश्यात्	२.	वाणी से बतलाया नहीं जा सकता है	अनुरूपम्	११.	उचित-अनुचित का
इति	३.	ऐसा	राजर्षे	७.	हे राजा परीक्षित् !
केषु	५.	कुछ लोगों का	विमृश	१२.	विचार कर लीजिये
अपि	४.	भी	स्व	९.	अपनी
निश्चयः ।	६.	निश्चय है (अतः)	मनीषया ॥	१०.	बुद्धि से

श्लोकार्थ—वह कारण तर्क से परे है एवं वाणी से बतलाया नहीं जा सकता है, ऐसा भी कुछ लोगों का निश्चय है । अतः, हे राजा परीक्षित् ! इस विषय में अपनी बुद्धि से उचित-अनुचित का विचार कर लीजिये ।

एकविंशः श्लोकः

सूत उवाच-- एवं धर्मे प्रवदति स सम्राड् द्विजसत्तम ।
समाहितेन मनसा विखेदः पर्यचष्ट तम् ॥२१॥

पदच्छेद---

एवम् धर्मे प्रवदति, सः सम्राट् द्विज सत्तम ।
समाहितेन मनसा, विखेदः पर्यचष्ट तम् ॥

शब्दार्थ--

एवम्	३.	इस प्रकार	समाहितेन	८.	सावधान
धर्मे	२.	धर्म के	मनसा	९.	मन से
प्रवदति	४.	कहते रहने पर	विखेदः	७.	शोक से रहित होकर
सः	५.	उस	पर्यचष्ट	११.	पूछा
सम्राट्	६.	सम्राट् (राजा परीक्षित्) ने	तम् ॥	१०.	उस (वृषभरूप धर्म) से
द्विज सत्तम ।	१.	हे ऋषि श्रेष्ठ शौनक जी !			

श्लोकार्थ—हे ऋषि श्रेष्ठ शौनक जी ! धर्म के इस प्रकार कहते रहने पर उस सम्राट् राजा परीक्षित् ने शोक से रहित होकर सावधान मन से उस वृषभ रूप धर्म से पूछा ।

द्वाविंशः श्लोकः

राजोवाच— धर्मं ब्रवीषि धर्मज्ञ धर्मोऽसि वृषरूपधृक् ।
यदधर्मकृतः स्थानं सूचकस्यापि तद् भवेत् ॥२२॥

पदच्छेद---

धर्मम् ब्रवीषि धर्मज्ञ, धर्मः असि वृष रूप धृक् ।
यत् अधर्म कृतः स्थानम्, सूचकस्य अपि तद् भवेत् ॥

शब्दार्थ—

धर्मम्	२.	धर्म का	यत्	११.	जो
ब्रवीषि	३.	उपदेश कर रहे हैं	अधर्म	९.	पाप
धर्मज्ञ	१.	हे धर्म के जानकार ! (आप)	कृतः	१०.	करने वाले (व्यक्ति) को
धर्मः	७.	(साक्षात्) धर्मराज	स्थानम्	१२.	फल मिलता है (उसकी)
असि	८.	हैं	सूचकस्य	१३.	सूचना देने वाले (व्यक्ति को)
वृष	४.	बैल का	अपि	१४.	भी
रूप	५.	रूप	तद्	१५.	वही (फल)
धृक् ।	६.	धारण किये हुये (आप)	भवेत् ॥	१६.	मिलता है

श्लोकार्थ—हे धर्म के जानकार ! आप धर्म का उपदेश कर रहे हैं । बैल का रूप धारण किये हुये आप साक्षात् धर्मराज हैं । पाप करने वाले व्यक्ति को जो फल मिलता है, उसकी सूचना देने वाले व्यक्ति को भी वही फल मिलता है ।

त्रयोविंशः श्लोकः

अथवा देवमायाया नूनं गतिरगोचरा ।
चेतसो वचसश्चापि भूतानामिति निश्चयः ॥२३॥

पदच्छेद—

अथवा देव मायायाः, नूनम् गतिः अगोचरा ।
चेतसः वचसः च अपि, भूतानाम् इति निश्चयः ॥

शब्दार्थ—

अथवा	१.	अथवा	**वचसः**	१०.	वाणी से
देव	४.	देवताओं की	**च**	९.	और
मायायाः	५.	माया का	**अपि**	११.	भी
नूनम्	१२.	निश्चय ही	**भूतानाम्**	७.	प्राणियों के
गतिः	६.	स्वरूप	**इति**	२.	यह
अगोचरा ।	१३.	परे है	**निश्चयः ॥**	३.	सिद्धान्त है (कि)
चेतसः	८.	मन से			

श्लोकार्थ—अथवा यह सिद्धान्त है कि देवताओं की माया का स्वरूप प्राणियों के मन से और वाणी से भी निश्चय ही परे है ।

चतुर्विंशः श्लोकः

तपः शौचं दया सत्यमिति पादाः कृते कृताः ।
अधर्मांशैस्त्रयो भग्नाः स्मयसङ्गमदैस्तव ॥२४॥

पदच्छेद—

तपः शौचम् दया सत्यम् , इति पादाः कृते कृताः ।
अधर्म अंशैः त्रयः भग्नाः, स्मय सङ्ग मदैः तव ॥

शब्दार्थ—

तपः	३.	तपस्या	**अधर्म**	१३.	पाप के
शौचम्	४.	पवित्रता	**अंशैः**	१४.	अंशों से
दया	५.	दया (और)	**त्रयः**	१५.	तीन पैर
सत्यम्	६.	सत्य	**भग्नाः**	१६.	टूट गये हैं
इति	७.	ये	**स्मय**	१०.	(अब) अभिमान
पादाः	८.	चार चरण	**सङ्ग**	११.	आसक्ति (और)
कृते	१.	सतयुग में	**मदैः**	१२.	मदरूप
कृताः ।	९.	कल्पित थे (किन्तु)	**तव ॥**	२.	आपके

श्लोकार्थ—सतयुग में आपके तपस्या, पवित्रता, दया और सत्य ये चार चरण कल्पित थे; किन्तु अब अभिमान, आसक्ति और मदरूप पाप के अंशों से तीन पैर टूट गये हैं ।

पञ्चविंशः श्लोकः

इदानीं धर्मपादस्ते सत्यं निर्वर्तयेद् यतः ।
तं जिघृक्षत्यधर्मोऽयमनृतेनैधितः कलिः ॥२५॥

पदच्छेद—

इदानीम् धर्म पादः ते, सत्यम् निर्वर्तयेत् यतः ।
तम् जिघृक्षति अधर्मः अयम्, अनृतेन एधितः कलिः ॥

शब्दार्थ—

इदानीम्	३.	अब (आप)	तम्	१३.	उसे (भी)
धर्म	१.	हे धर्मराज !	जिघृक्षति	१४.	ग्रस लेना चाहता है
पादः	६.	चरण से	अधर्मः	११.	पापी
ते	४.	अपने	अयम्	१०.	यह
सत्यम्	५.	सत्यरूपी	अनृतेन	८.	झूठ से
निर्वर्तयेत्	७.	जीवित हैं (अतः)	एधितः	९.	पुष्ट हुआ
यतः ।	२.	क्योंकि	कलिः ॥	१२.	कलियुग

श्लोकार्थ—हे धर्मराज ! क्योंकि अब आप अपने सत्यरूपी चरण से जीवित हैं, अतः झूठ से पुष्ट हुआ यह पापी कलियुग उसे भी ग्रस लेना चाहता है ।

षड्विंशः श्लोकः

इयं च भूर्भगवता न्यासितोरुभरा सती ।
श्रीमद्भिस्तत्पदन्यासैः सर्वतः कृतकौतुका ॥२६॥

पदच्छेद—

इयम् च भूः भगवता, न्यासित उरु भरा सती ।
श्रीमद्भिः तत् पद न्यासैः, सर्वतः कृत कौतुका ॥

शब्दार्थ—

इयम्	४.	(अतः उस समय) यह	सती ।	६.	देवी
च	८.	और	श्रीमद्भिः	७.	शोभा से सम्पन्न
भूः	५.	पृथ्वी	तत्	९.	भगवान् के
भगवता	१.	भगवान् श्रीकृष्ण ने	पद न्यासैः	१०.	चरण चिह्नों से
न्यासित	३.	दूर कर दिया था	सर्वतः	११.	चारों तरफ
उरु भरा	२.	महान् भूभार को	कृत कौतुका ॥	१२.	उत्सवमयी थी

श्लोकार्थ—भगवान् श्रीकृष्ण ने महान् भूभार को दूर कर दिया था; अतः उस समय यह पृथ्वी देवी शोभा से सम्पन्न और भगवान् के चरण चिह्नों से चारों तरफ उत्सवमयी थी ।

सप्तविंशः श्लोकः

शोचत्यश्रुकला साध्वी दुर्भगेवोज्झिताधुना ।
अब्रह्मण्या नृपव्याजाः शूद्रा भोक्ष्यन्ति मामिति ॥२७॥

पदच्छेद—

शोचति अश्रु कला साध्वी, दुर्भगा इव उज्झिता अधुना ।
अब्रह्मण्याः नृप व्याजाः, शूद्राः भोक्ष्यन्ति माम् इति ॥

शब्दार्थ—

शोचति	१४.	चिन्ता कर रही है	अब्रह्मण्याः	४.	ब्राह्मण द्रोही
अश्रु कला	१३.	आँसू भरकर	नृप	२.	राजा के
साध्वी	१०.	(यह) देवी पृथ्वी	व्याजाः	३.	वेश में
दुर्भगा	११.	अभागिन के	शूद्राः	५.	शूद्र लोग
इव	१२.	समान	भोक्ष्यन्ति	७.	शासन करेंगे
उज्झिता	९.	(भगवान् के द्वारा) छोड़ी गई	माम्	६.	मेरे पर
अधुना ।	१.	अब	इति ॥	८.	इस विचार से

श्लोकार्थ—'अब राजा के वेश में ब्राह्मण-द्रोही शूद्र लोग मेरे पर शासन करेंगे' इस विचार से भगवान् के द्वारा छोड़ी गई यह देवी पृथ्वी अभागिन के समान आँसू भर कर चिन्ता कर रही है।

अष्टाविंशः श्लोकः

इति धर्मं महीं चैव सान्त्वयित्वा महारथः ।
निशातमाददे खड्गं कलयेऽधर्महेतवे ॥२८॥

पदच्छेद—

इति धर्मम् महीम् च एव, सान्त्वयित्वा महारथः ।
निशातम् आददे खड्गम्, कलये अधर्म हेतवे ॥

शब्दार्थ—

इति	१.	इस प्रकार	निशातम्	११.	तेज धार वाली
धर्मम्	२.	धर्म को	आददे	१३.	उठाई
महीम्	४.	पृथ्वी को	खड्गम्	१२.	तलवार
च	३.	और	कलये	१०.	कलियुग को (मारने के लिये)
एव	५.	भी	अधर्म	८.	पाप का
सान्त्वयित्वा	६.	सान्त्वना देकर	हेतवे ॥	९.	कारण
महारथः ।	७.	महारथी (परीक्षित् ने)			

श्लोकार्थ—इस प्रकार धर्म को और पृथ्वी को भी सान्त्वना देकर महारथी परीक्षित् ने पाप का कारण कलियुग को मारने के लिये तेज धार वाली तलवार उठाई।

एकोनत्रिंशः श्लोकः

तं जिघांसुमभिप्रेत्य विहाय नृपलाञ्छनम् ।
तत्पादमूलं शिरसा समगाद् भयविह्वलः ॥२९॥

पदच्छेद—

तम् जिघांसुम् अभिप्रेत्य, विहाय नृप लाञ्छनम् ।
तत् पाद मूलम् शिरसा, समगात् भय विह्वलः ॥

शब्दार्थ—

तम्	१. उन (राजा परीक्षित्) को	पाद	१०. चरण
जिघांसुम्	२. वध का इच्छुक	मूलम्	११. तल में
अभिप्रेत्य	३. जानकर (कलियुग ने)	शिरसा	१२. शिर को
विहाय	६. उतार दिया और	समगात्	१३. रख दिया
नृप	४. राजा के	भय	७. भय से
लाञ्छनम् ।	५. चिह्नों को	विह्वलः ॥	८. व्याकुल होता हुआ
तत्	९. उनके		

श्लोकार्थ—उन राजा परीक्षित् को वध का इच्छुक जानकर कलियुग ने राजा के चिह्नों को उतार दिया और भय से व्याकुल होता हुआ उनके चरण तल में शिर को रख दिया ।

त्रिंशः श्लोकः

पतितं पादयोर्वीरः कृपया दीनवत्सलः ।
शरण्यो नावधीच्छ्लोक्य आह चेदं हसन्निव ॥३०॥

पदच्छेद—

पतितम् पादयोः वीरः, कृपया दीन वत्सलः ।
शरण्यः न अवधीत् श्लोक्यः, आह च इदम् हसन् इव ॥

शब्दार्थ—

पतितम्	७. पड़े हुए (कलियुग) का	अवधीत्	९. वध किया
पादयोः	६. पैरों में	श्लोक्यः	३. यशस्वी (एवम्)
वीरः	४. वीर (राजा परीक्षित्) ने	आह	१४. कहा
कृपया	५. दयापूर्ण होकर	च	१०. और
दीन वत्सलः ।	२. अनाथों के रक्षक	इदम्	१३. इस प्रकार
शरण्यः	१. शरणागत पालक	हसन्	११. हसते हुये
न	८. नहीं	इव ॥	१२. से

श्लोकार्थ—शरणागत पालक, अनाथों के रक्षक, यशस्वी एवम् वीर राजा परीक्षित् ने दयापूर्ण होकर पैरों में पड़े हुए कलियुग का वध नहीं किया और हँसते हुये-से इस प्रकार कहा ।

एकत्रिंशः श्लोकः

राजोवाच—न ते गुडाकेशयशोधराणां, बद्धाञ्जलेर्वै भयमस्ति किंचित्।
न वर्तितव्यं भवता कथंचन, क्षेत्रे मदीये त्वमधर्मबन्धुः ॥३१॥

पदच्छेद—

न ते गुडाकेश यशोधराणाम्, बद्ध अञ्जलेः वै भयम् अस्ति किंचित्।
न वर्तितव्यम् भवता कथंचन, क्षेत्रे मदीये त्वम् अधर्म बन्धुः ॥

शब्दार्थ—

न	७. नहीं	न	१५. नहीं
ते, गुडाकेश	२. तुम्हें, अर्जुन की	वर्तितव्यम्	१६. रहना चाहिये
यशोधराणाम्,	३. कीर्ति को धारण करने वाले	भवता	११. तुम्हें
बद्ध अञ्जलेः	१. हाथ जोड़े हुए	कथंचन,	१४. किसी भी प्रकार से
वै	६. ही	क्षेत्रे	१३. राज्य में
भयम्	५. भय	मदीये	१२. मेरे
अस्ति	८. होना चाहिये	त्वम्	९. तुम
किंचित्।	४. (राजाओं से) कोई	अधर्म, बन्धुः ॥	१०. पाप के, सहायक (हो अतः)

श्लोकार्थ—हाथ जोड़े हुए तुम्हें अर्जुन की कीर्ति को धारण करने वाले राजाओं से कोई भय ही नहीं होना चाहिए। तुम पाप के सहायक हो, अतः तुम्हें मेरे राज्य में किसी भी प्रकार से नहीं रहना चाहिए।

द्वात्रिंशः श्लोकः

त्वां वर्तमानं नरदेवदेहे - ष्वनुप्रवृत्तोऽयमधर्मपूगः।
लोभोऽनृतं चौर्यमनार्यमंहो, ज्येष्ठा च माया कलहश्च दम्भः ॥३२॥

पदच्छेद—

त्वाम् वर्तमानम् नरदेव देहेषु, अनुप्रवृत्तः अयम् अधर्म पूगः।
लोभः अनृतम् चौर्यम् अनार्यम् अंहः, ज्येष्ठा च माया कलहः च दम्भः ॥

शब्दार्थ—

त्वाम्	१. तुम्हारे	लोभः, अनृतम्	५. लोभ, झूठ
वर्तमानम्	२. रहने से	चौर्यम्, अनार्यम्	६. चोरी, दुष्टता
नरदेव	३. राजाओं के	अंहः, ज्येष्ठा	७. पाप, दरिद्रता
देहेषु,	४. शरीर में	च	८. और
अनुप्रवृत्तः	१४. प्रवेश कर गया है	माया, कलहः	९. छल-कपट, कलह (तथा)
अयम्	१२. यह	च	११. स्वरूप
अधर्म पूगः।	१३. अधर्म का समूह	दम्भः ॥	१०. घमंड

श्लोकार्थ—तुम्हारे रहने से राजाओं के शरीर में लोभ, झूठ, चोरी, दुष्टता, पाप, दरिद्रता और छल-कपट, कलह तथा घमंड स्वरूप यह अधर्म का समूह प्रवेश कर गया है।

त्रयस्त्रिंश: श्लोकः

न वर्तितव्यं तदधर्मबन्धो, धर्मेण सत्येन च वर्तितव्ये ।
ब्रह्मावर्ते यत्र यजन्ति यज्ञै-र्यज्ञेश्वरं यज्ञवितानविज्ञाः ॥३३॥

पदच्छेद— न वर्तितव्यम् तद् अधर्म बन्धो, धर्मेण सत्येन च वर्तितव्ये ।
ब्रह्मावर्ते यत्र यजन्ति यज्ञैः, यज्ञेश्वरम् यज्ञ वितान विज्ञाः ॥

शब्दार्थ—

न	१५. नहीं	ब्रह्मावर्ते	२. भारतवर्ष में
वर्तितव्यम्	१६. रहना चाहिए	यत्र	१. इस
तद्	९. इसलिए	यजन्ति	८. पूजन करते हैं
अधर्म बन्धो,	१०. पाप के साथी (हे कलियुग !)	यज्ञैः,	६. यज्ञों से
धर्मेण	११. (तुम्हें) धर्म	यज्ञेश्वरम्	७. यज्ञ भगवान् का
सत्येन	१३. सत्य से	यज्ञ	३. यज्ञ की
च	१२. और	वितान	४. पद्धति के
वर्तितव्ये ।	१४. रहने योग्य (इस देश में)	विज्ञाः ॥	५. जानकार विद्वान्

श्लोकार्थ—इस भारतवर्ष में यज्ञ की पद्धति के जानकार विद्वान् यज्ञों से यज्ञ-भगवान् का पूजन करते हैं; इसलिए पाप के साथी हे कलियुग ! तुम्हें धर्म और सत्य से रहने योग्य इस देश में नहीं रहना चाहिये ।

चतुस्त्रिंश: श्लोकः

यस्मिन् हरिर्भगवानिज्यमान, इज्यामूर्तिर्यजतां शं तनोति ।
कामानमोघान् स्थिरजङ्गमाना-मन्तर्बहिर्वायुरिवैष आत्मा ॥३४॥

पदच्छेद— यस्मिन् हरिः भगवान् इज्यमानः, इज्या मूर्तिः यजताम् शम् तनोति ।
कामान् अमोघान् स्थिर जङ्गमानाम्, अन्तः बहिः वायुः इव एषः आत्मा ॥

शब्दार्थ—

यस्मिन्	१. इस देश में	अमोघान्	७. पूर्ण करते हैं (और)
हरिः भगवान्	३. भगवान् श्रीहरि	स्थिर	१४. जड़ और
इज्यमानः,	४. यज्ञों से प्रसन्न किये जाते हुए	जङ्गमानाम्,	१५. चेतन की
इज्या-मूर्तिः	२. यज्ञ-स्वरूप	अन्तः बहिः	११. अन्दर और बाहर (विद्यमान)
यजताम्	५. यज्ञ करने वालों की	वायुः	१२. पवन के
शम्	८. (उनका) कल्याण	इव	१३. समान
तनोति ।	९. करते हैं	एषः	१०. ये (श्रीहरि)
कामान्	६. कामनाओं को	आत्मा ॥	१६. आत्मा (हैं)

श्लोकार्थ—इस देश में यज्ञ स्वरूप भगवान् श्रीहरि यज्ञों से प्रसन्न किए जाते हुए यज्ञ करने वालों की कामनाओं को पूर्ण करते हैं और उनका कल्याण करते हैं। ये श्रीहरि अन्दर और बाहर विद्यमान पवन के समान जड़ और चेतन की आत्मा हैं।

पञ्चत्रिंशः श्लोकः

सूत उवाच— परीक्षितैवमादिष्टः स कलिर्जातवेपथुः ।
तमुद्यतासिमाहेदं दण्डपाणिमिवोद्यतम् ॥३५॥

पदच्छेद—

परीक्षिता एवम् आदिष्टः, सः कलिः जात वेपथुः ।
तम् उद्यत असिम् आह इदम्, दण्ड पाणिम् इव उद्यतम् ॥

शब्दार्थ—

परीक्षिता	१.	राजा परीक्षित् से	उद्यत	११.	उठाये हुए
एवम्	२.	इस प्रकार	असिम्	१०.	तलवार
आदिष्टः	३.	आदेश पाकर	आह	१४.	बोला
सः	५.	वह	इदम्	१३.	यह
कलिः	६.	कलियुग	दण्ड पाणिम्	८.	यमराज के
जात वेपथुः ।	४.	काँपता हुआ	इव	९.	समान
तम्	१२.	राजा परीक्षित् से	उद्यतम् ॥	७.	(दण्ड) उठाये हुए

श्लोकार्थ—राजा परीक्षित् से इस प्रकार आदेश पाकर काँपता हुआ वह कलियुग दण्ड उठाये हुए यमराज के समान तलवार उठाये हुए राजा परीक्षित् से यह बोला ।

षट्त्रिंशः श्लोकः

कलिरुवाच— यत्र क्वचन वत्स्यामि सार्वभौम तवाज्ञया ।
लक्षये तत्र तत्रापि त्वामात्तेषुशरासनम् ॥३६॥

पदच्छेद—

यत्र क्वचन वत्स्यामि, सार्वभौम तव आज्ञया ।
लक्षये तत्र तत्र अपि, त्वाम् आत्त इषु शरासनम् ॥

शब्दार्थ—

यत्र	४.	जहाँ	लक्षये	१२.	देखता हूँ
क्वचन	५.	कहीं भी	तत्र तत्र अपि	७.	वहाँ-वहाँ पर
वत्स्यामि	६.	रहता हूँ	त्वाम्	८.	आपको
सार्वभौम	१.	हे राजन् !	आत्त	११.	चढ़ाये हुए
तव	२.	आपकी	इषु	१०.	बाण
आज्ञया ।	३.	आज्ञा से (मैं)	शरासनम् ॥	९.	धनुष पर

श्लोकार्थ—हे राजन् ! आपकी आज्ञा से मैं जहाँ कहीं भी रहता हूँ, वहाँ-वहाँ पर आपको धनुष पर बाण चढ़ाये हुए देखता हूँ ।

सप्तत्रिंशः श्लोकः

तन्मे धर्मभृतां श्रेष्ठ स्थानं निर्देष्टुमर्हसि ।
यत्रैव नियतो वत्स्य आतिष्ठंस्तेऽनुशासनम् ॥३७॥

पदच्छेद—

तद् मे धर्म भृताम् श्रेष्ठ, स्थानम् निर्देष्टुम् अर्हसि ।
यत्र एव नियतः वत्स्ये, आतिष्ठन् ते अनुशासनम् ॥

शब्दार्थ—

तद्	१.	इसलिए	यत्र	८.	जहाँ
मे	४.	मुझे	एव	९.	कि
धर्मभृताम्	२.	धर्मात्माओं में	नियतः	१३.	निश्चित रूप से
श्रेष्ठ	३.	श्रेष्ठ (हे राजन् ! आप)	वत्स्ये	१४.	निवास कर सकूँ
स्थानम्	५.	(वह) स्थान	आतिष्ठन्	१२.	पालन करता हुआ
निर्देष्टुम्	६.	बताने में	ते	१०.	आपके
अर्हसि ।	७.	समर्थ हैं	अनुशासनम् ॥	११.	आदेश का

श्लोकार्थ—इसलिए धर्मात्माओं में श्रेष्ठ हे राजन् ! आप मुझे वह स्थान बताने से समर्थ हैं; जहाँ कि मैं आपके आदेश का पालन करता हुआ निश्चित रूप से निवास कर सकूँ।

अष्टात्रिंशः श्लोकः

सूत उवाच— **अभ्यर्थितस्तदा तस्मै स्थानानि कलये ददौ ।**
द्यूतं पानं स्त्रियः सूना यत्राधर्मश्चतुर्विधः ॥३८॥

पदच्छेद—

अभ्यर्थितः तदा तस्मै, स्थानानि कलये ददौ ।
द्यूतम् पानम् स्त्रियः सूनाः, यत्र अधर्मः चतुर्विधः ॥

शब्दार्थ—

अभ्यर्थितः	१.	(कलियुग के) माँगने पर परीक्षित् ने	पानम्	६.	मदिरा
तदा	२.	उस समय	स्त्रियः	७.	स्त्री सहवास (और)
तस्मै	३.	उस	सूनाः	८.	हिंसा का
स्थानानि	९.	स्थान	यत्र	११.	जहाँ कि
कलये	४.	कलियुग को	अधर्मः	१३.	पाप (रहते हैं)
ददौ ।	१०.	दिया	चतुर्विधः ॥	१२.	चार प्रकार के
द्यूतम्	५.	जूआ			

श्लोकार्थ—कलियुग के माँगने पर परीक्षित् ने उस समय उस कलियुग को जूआ, मदिरा, स्त्री-सहवास और हिंसा का स्थान दिया, जहाँ कि चार प्रकार के पाप रहते हैं।

एकोनचत्वारिंशः श्लोकः

पुनश्च याचमानाय जातरूपमदात्प्रभुः ।
ततोऽनृतं मदं कामं रजो वैरं च पञ्चमम् ॥३९॥

पदच्छेद—

पुनः च याचमानाय, जातरूपम् अदात् प्रभुः ।
ततः अनृतम् मदम् कामम् , रजः वैरम् च पञ्चमम् ॥

शब्दार्थ—

पुनः	२.	फिर से (कलियुग के) द्वारा	अनृतम्	८.	झूठ
च	१.	तथा	मदम्	९.	मद
याचमानाय	३.	याचना करने पर	कामम्	१०.	काम वासना
जातरूपम्	५.	उसे सुवर्ण का स्थान	रजः	११.	रजोगुण
अदात्	६.	दिया	वैरम्	१४.	कलह (भी दिया)
प्रभुः ।	४.	समर्थ (राजा परीक्षित् ने)	च	१२.	और
ततः	७.	उसके बाद (उन्होंने उसे)	पञ्चमम् ॥	१३.	पाँचवा स्थान

श्लोकार्थं—तथा फिर से कलियुग के द्वारा याचना करने पर समर्थ राजा परीक्षित् ने उसे सुवर्ण का स्थान दिया। उसके बाद उन्होंने उसे झूठ, मद, कामवासना, रजोगुण और पाँचवा स्थान कलह भी दिया।

चत्वारिंशः श्लोकः

अमूनि पञ्चस्थानानि ह्यधर्मप्रभवः कलिः ।
औत्तरेयेण दत्तानि न्यवसत्तन्निदेशकृत् ॥४०॥

पदच्छेद—

अमूनि पञ्च स्थानानि, हि अधर्म प्रभवः कलिः ।
औत्तरेयेण दत्तानि, न्यवसत् तत् निदेशकृत् ॥

शब्दार्थ—

अमूनि	६.	इन	कलिः ।	३.	कलियुग
पञ्च	७.	पाँच	औत्तरेयेण	४.	राजा परीक्षित् के द्वारा
स्थानानि	८.	स्थानों पर	दत्तानि	५.	दिये गये
हि	९.	ही	न्यवसत्	१२.	निवास करने लगा
अधर्म	१.	पाप का	तत्	१०.	उनके
प्रभवः	२.	मूल कारण	निदेशकृत् ॥	११.	आदेश का पालन करता हुआ

श्लोकार्थं—पाप का मूल कारण कलियुग राजा परीक्षित् के द्वारा दिये गये इन पाँच स्थानों पर ही उनके आदेश का पालन करता हुआ निवास करने लगा।

एकचत्वारिंशः श्लोकः

अथैतानि न सेवेत बुभूषुः पुरुषः क्वचित् ।
विशेषतो धर्मशीलो राजा लोकपतिर्गुरुः ॥४१॥

पदच्छेद—

अथ एतानि न सेवेत, बुभूषुः पुरुषः क्वचित् ।
विशेषतः धर्म शीलः, राजा लोक पतिः गुरुः ॥

शब्दार्थ—

अथ	१.	इसलिये	क्वचित् ।	१०.	कभी
एतानि	६.	इन स्थानों का	विशेषतः	४.	विशेष रूप से
न	११.	नहीं	धर्म शीलः	५.	धार्मिक
सेवेत	१२.	सेवन करना चाहिये	राजा	६.	राजा
बुभूषुः	२.	कल्याण के इच्छुक	लोक पतिः	७.	लोक नायक (और)
पुरुषः	३.	पुरुषों को	गुरुः ॥	८.	गुरु जनों को

श्लोकार्थ—इसलिए कल्याण के इच्छुक पुरुषों को, विशेष रूप से धार्मिक राजा, लोकनायक और गुरुजनों को इन स्थानों का कभी सेवन नहीं करना चाहिये ।

द्विचत्वारिंशः श्लोकः

वृषस्य नष्टांस्त्रीन् पादान् तपः शौचं दयामिति ।
प्रतिसंदध आश्वास्य महीं च समवर्धयत् ॥४२॥

पदच्छेद—

वृषस्य नष्टान् त्रीन् पादान्, तपः शौचम् दयाम् इति ।
प्रतिसंदधे आश्वास्य, महीम् च समवर्धयत् ॥

शब्दार्थ—

वृषस्य	१.	(राजा परीक्षित् ने) बैल रूपधारी धर्म के	इति ।	६.	इन
नष्टान्	२.	टूटे हुये	प्रति	६.	पुनः
त्रीन्	७.	तीनों	संदधे	१०.	जोड़ दिया
पादान्	८.	पैरों को	आश्वास्य	१३.	आश्वासन देकर
तपः	३.	तपस्या	महीम्	१२.	पृथ्वी को
शौचम्	४.	पवित्रता (और)	च	११.	तथा
दयाम्	५.	दया रूप वाले	समवर्धयत् ॥	१४.	निर्भय किया

श्लोकार्थ—राजा परीक्षित् ने बैल रूपधारी धर्म के टूटे हुये तपस्या, पवित्रता और दया रूपवाले इन तीनों पैरों को पुनः जोड़ दिया तथा पृथ्वी को आश्वासन देकर निर्भय किया ।

त्रिचत्वारिंशः श्लोकः

स एष एतर्ह्यध्यास्त आसनं पार्थिवोचितम् ।
पितामहेनोपन्यस्तं राज्ञारण्यं विविक्षता ॥४३॥

पदच्छेद—

सः एषः एतर्हि अध्यास्ते, आसनम् पार्थिव उचितम् ।
पितामहेन उपन्यस्तम् , राज्ञा अरण्यम् विविक्षता ॥

शब्दार्थ—

सः	१०.	वे ही	उचितम् ।	७.	योग्य
एषः	११.	ये (राजा परीक्षित्)	पितामहेन	३.	पितामह
एतर्हि	९.	इस समय	उपन्यस्तम्	५.	दिये गये
अध्यास्ते	१२.	विराजमान हैं	राज्ञा	४.	राजा (युधिष्ठिर) के द्वारा
आसनम्	८.	सिंहासन पर	अरण्यम्	१.	वन में
पार्थिव	६.	राजाओं के	विविक्षताः ॥	२.	जाते हुए

श्लोकार्थ—वन में जाते हुए पितामह राजा युधिष्ठिर के द्वारा दिये गये राजाओं के योग्य सिंहासन पर इस समय वे ही ये राजा परीक्षित् विराजमान हैं ।

चतुश्चत्वारिंशः श्लोकः

आस्तेऽधुना स राजर्षिः कौरवेन्द्रश्रियोल्लसन् ।
गजाह्वये महाभागश्चक्रवर्ती बृहच्छ्रवाः ॥४४॥

पदच्छेद—

आस्ते अधुना सः राजर्षिः, कौरवेन्द्र श्रिया उल्लसन् ।
गजाह्वये महाभागः, चक्रवर्ती बृहत् श्रवाः ॥

शब्दार्थ—

आस्ते	१२.	विद्यमान हैं	उल्लसन् ।	११.	शोभित होते हुये
अधुना	७.	इस समय	गजाह्वये	८.	हस्तिनापुर में
सः	६.	वे (राजा परीक्षित्)	महाभागः	१.	परम सौभाग्यशाली
राजर्षिः	५.	राजर्षि	चक्रवर्ती	४.	चक्रवर्ती सम्राट् (एवम्)
कौरवेन्द्र	९.	कौरवों की	बृहत्	२.	बड़े
श्रिया	१०.	राजलक्ष्मी से	श्रवाः ॥	३.	यशस्वी

श्लोकार्थ—परम सौभाग्यशाली, बड़े यशस्वी, चक्रवर्ती सम्राट् एवम् राजर्षि वे राजा परीक्षित् इस समय हस्तिनापुर में कौरवों की राजलक्ष्मी से शोभित होते हुए विद्यमान हैं ।

पञ्चचत्वारिंशः श्लोकः

इत्थम्भूतानुभावोऽयमभिमन्युसुतो नृपः ।
यस्य पालयतः क्षोणीं यूयं सत्राय दीक्षिताः ॥४५॥

पदच्छेद—

इत्थंभूत अनुभावः अयम् , अभिमन्यु सुतः नृपः ।
यस्य पालयतः क्षोणीम् , यूयम् सत्राय दीक्षिताः ॥

शब्दार्थ—

इत्थंभूत	५. इस प्रकार के		यस्य	७. जिनके द्वारा
अनुभावः	६. प्रभाव वाले हैं		पालयतः	९. पालन करते रहने पर
अयम्	३. ये		क्षोणीम्	८. पृथ्वी का
अभिमन्यु	१. अभिमन्यु के		यूयम्	१०. आप सब लोग
सुतः	२. पुत्र		सत्राय	११. दीर्घकालीन यज्ञ में
नृपः ।	४. राजा परीक्षित्		दीक्षिताः ॥	१२. दीक्षित हुए हैं

श्लोकार्थ—अभिमन्यु के पुत्र ये राजा परीक्षित् इस प्रकार के प्रभाव वाले हैं; जिनके द्वारा पृथ्वी का पालन करते रहने पर आप सब लोग दीर्घकालीन यज्ञ में दीक्षित हुए हैं।

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे
कलिनिग्रहो नाम सप्तदशः अध्यायः ॥१७॥

श्रीमद्भागवतमहापुराणम्
प्रथमः स्कन्धः
अथ अष्टादशः अध्यायः
प्रथमः श्लोकः

सूत उवाच—

यो वै द्रौण्यस्त्रविप्लुष्टो न मातुरुदरे मृतः।
अनुग्रहाद् भगवतः कृष्णस्याद्भुतकर्मणः ॥१॥

पदच्छेद—

यः वै द्रौणि अस्त्र विप्लुष्टः, न मातुः उदरे मृतः।
अनुग्रहात् भगवतः, कृष्णस्य अद्भुत कर्मणः ॥

शब्दार्थ—

यः	१.	जो (राजा परीक्षित्)	उदरे	३.	गर्भ में
वै	६.	भी	मृतः।	१२.	मरे थे
द्रौणि	४.	अश्वत्थामा के	अनुग्रहात्	१०.	कृपा से
अस्त्र, विप्लुष्टः	५.	ब्रह्मास्त्र से, जलकर	भगवतः, कृष्णस्य	९.	भगवान् श्रीकृष्ण की
न	११.	नहीं	अद्भुत	७.	अनोखी
मातुः	२.	माता (उत्तरा) के	कर्मणः ॥	८.	लीलायें करने वाले

श्लोकार्थ—जो राजा परीक्षित् माता उत्तरा के गर्भ में अश्वत्थामा के ब्रह्मास्त्र से जलकर भी अनोखी लीलायें करने वाले भगवान् श्रीकृष्ण की कृपा से नहीं मरे थे।

द्वितीयः श्लोकः

ब्रह्मकोपोत्थिताद् यस्तु तक्षकात्प्राणविप्लवात्।
न सम्मुमोहोरुभयाद् भगवत्यर्पिताशयः ॥२॥

पदच्छेद—

ब्रह्म कोप उत्थितात् यः तु, तक्षकात् प्राण विप्लवात्।
न सम्मुमोह उरु भयात्, भगवति अर्पित आशयः ॥

शब्दार्थ—

ब्रह्म कोप	५.	ब्राह्मण के शाप से	न	११.	नहीं
उत्थितात्	६.	उत्पन्न हुए	सम्मुमोह	१२.	मोहित हुए थे
यः	४.	वही (राजा परीक्षित्)	उरु भयात्	७.	बड़े भयानक (और)
तु	१०.	भी	भगवति	१.	भगवान् श्रीकृष्ण में
तक्षकात्	९.	तक्षक नाग से	अर्पित	३.	समर्पित किये हुए
प्राण विप्लवात्।	८.	प्राण घातक	आशयः ॥	२.	अन्तःकरण को

श्लोकार्थ—भगवान् श्रीकृष्ण में अन्तःकरण को समर्पित किये हुए वही राजा परीक्षित् ब्राह्मण के शाप से उत्पन्न हुए बड़े भयानक और प्राण घातक तक्षक नाग से भी मोहित नहीं हुए थे।

तृतीयः श्लोकः

उत्सृज्य सर्वतः सङ्गं विज्ञाताजितसंस्थितिः ।
वैयासकेर्जहौ शिष्यो गङ्गायां स्वं कलेवरम् ॥३॥

पदच्छेद—

उत्सृज्य सर्वतः सङ्गम्, विज्ञात अजित संस्थितिः ।
वैयासकेः जहौ शिष्यः, गङ्गायाम् स्वम् कलेवरम् ॥

शब्दार्थ—

उत्सृज्य	८.	हटाकर	वैयासकेः	४.	व्यासपुत्र शुकदेव के
सर्वतः	६.	चारों ओर से	जहौ	१२.	त्याग किया था
सङ्गम्	७.	आसक्ति	शिष्यः	५.	शिष्य (राजा परीक्षित्) ने
विज्ञात	३.	जानकार	गङ्गायाम्	९.	गंगाजी के तट पर
अजित	१.	आत्म	स्वम्	१०.	अपने
संस्थितिः ।	२.	स्वरूप के	कलेवरम् ॥	११.	शरीर का

श्लोकार्थ—आत्म-स्वरूप के जानकार व्यासपुत्र शुकदेव के शिष्य राजा परीक्षित् ने चारों ओर से आसक्ति हटाकर गंगाजी के तट पर अपने शरीर का त्याग किया था।

चतुर्थः श्लोकः

नोत्तमश्लोकवार्तानां जुषतां तत्कथामृतम् ।
स्यात्संभ्रमोऽन्तकालेऽपि स्मरतां तत्पदाम्बुजम् ॥४॥

पदच्छेद—

न उत्तम श्लोक वार्तानाम्, जुषताम् तत् कथा अमृतम् ।
स्यात् संभ्रमः अन्त काले अपि, स्मरताम् तत् पद अम्बुजम् ॥

शब्दार्थ—

न	११.	नहीं	स्यात्	१२.	होता है
उत्तम श्लोक	१.	पवित्र कीर्ति (भगवान् श्रीकृष्ण) की	संभ्रमः	१०.	मोह
वार्तानाम्	२.	चर्चा करने वाले	अन्तकाले अपि	९.	मरते समय भी
जुषताम्	५.	पान करने वाले (तथा)	स्मरताम्	८.	स्मरण करने वाले (जनों) को
तत् कथा	३.	उनकी लीला रूपी	तत् पद	६.	उनके चरण
अमृतम् ।	४.	सुधा का	अम्बुजम् ॥	७.	कमल का

श्लोकार्थ—पवित्र कीर्ति भगवान् श्रीकृष्ण की चर्चा करने वाले, उनकी लीलारूपी सुधा का पान करने वाले तथा उनके चरण-कमल का स्मरण करने वाले जनों को मरते समय भी मोह नहीं होता है।

पञ्चमः श्लोकः

तावत्कलिर्न प्रभवेत् प्रविष्टोऽपीह सर्वतः ।
यावदीशो महानुर्व्यामाभिमन्यव एकराट् ॥५॥

पदच्छेद—

तावत् कलिः न प्रभवेत्, प्रविष्टः अपि इह सर्वतः ।
यावत् ईशः महान् उर्व्याम्, आभिमन्यवः एकराट् ॥

शब्दार्थ—

तावत्, कलिः	७.	जब तक, कलियुग	यावत्	४.	जब तक
न	११.	नहीं	ईशः	६.	राजा (रहे)
प्रभवेत्	१२.	प्रभावी हो सका था	महान्	१.	महान्
प्रविष्टः अपि	१०.	प्रवेश करके भी	उर्व्याम्	५.	पृथ्वी पर
इह	८.	यहाँ पर	आभिमन्यवः	३.	अभिमन्यु पुत्र (परीक्षित)
सर्वतः ।	९.	चारों ओर से	एकराट् ॥	२.	सम्राट्

श्लोकार्थ—महान् सम्राट् अभिमन्यु पुत्र परीक्षित् जब तक पृथ्वी पर राजा रहे, तब तक कलियुग यहाँ चारों ओर से प्रवेश करके भी प्रभावी नहीं हो सका था ।

षष्ठः श्लोकः

यस्मिन्नहनि यर्ह्येव भगवानुत्ससर्ज गाम् ।
तदैवेहानुवृत्तोऽसावधर्मप्रभवः कलिः ॥६॥

पदच्छेद—

यस्मिन् अहनि यर्हि एव, भगवान् उत्ससर्ज गाम् ।
तदा एव इह अनुवृत्तः असौ, अधर्म प्रभवः कलिः ॥

शब्दार्थ—

यस्मिन्	२.	जिस	तदा एव	१०.	उसी क्षण से
अहनि	३.	दिन	इह	११.	यहाँ
यर्हि एव	४.	जिस ही क्षण	अनुवृत्तः	१२.	आ गया था
भगवान्	१.	भगवान् (श्रीकृष्ण) ने	असौ	८.	वह
उत्ससर्ज	६.	छोड़ा था	अधर्म, प्रभवः	७.	पाप का, मूल-कारण
गाम् ।	५.	धरा धाम को	कलिः ॥	९.	कलियुग

श्लोकार्थ—भगवान् श्रीकृष्ण ने जिस दिन जिस ही क्षण धरा धाम को छोड़ा था, पाप का मूल-कारण वह कलियुग उसी क्षण से यहाँ आ गया था ।

सप्तमः श्लोकः

नानुद्वेष्टि कलिं सम्राट् सारङ्ग इव सारभुक् ।
कुशलान्याशु सिद्ध्यन्ति नेतराणि कृतानि यत् ॥७॥

पदच्छेद—

न अनुद्वेष्टि कलिम् सम्राट्, सारङ्गः इव सारभुक् ।
कुशलानि आशु सिद्ध्यन्ति, न इतराणि कृतानि यत् ॥

शब्दार्थ—

न	६. नहीं	कुशलानि	१०. शुभ कार्य
अनुद्वेष्टि	७. द्वेष किया था	आशु	११. शीघ्र
कलिम्	५. कलियुग से	सिद्ध्यन्ति	१२. फलदायक होते हैं
सम्राट्	४. राजा (परीक्षित्) ने	न	१४. नहीं (होते हैं)
सारङ्गः	१. भ्रमर के	इतराणि	१३. अशुभ कार्य (फलदायक)
इव	२. समान	कृतानि	९. किये गये
सारभुक् ।	३. सार अंश के ग्राही	यत् ॥	८. क्योंकि (कलियुग में)

श्लोकार्थ—भ्रमर के समान सार-अंश के ग्राही राजा परीक्षित् ने कलियुग से द्वेष नहीं किया था, क्योंकि कलियुग में किये गये शुभ कार्य शीघ्र फलदायक होते हैं; अशुभ कार्य फलदायक नहीं होते हैं।

अष्टमः श्लोकः

किं नु बालेषु शूरेण कलिना धीरभीरुणा ।
अप्रमत्तः प्रमत्तेषु यो वृको नृषु वर्तते ॥८॥

पदच्छेद—

किम् नु बालेषु शूरेण, कलिना धीर भीरुणा ।
अप्रमत्तः प्रमत्तेषु, यः वृकः नृषु वर्तते ॥

शब्दार्थ—

किम् नु	६. क्या कहा जाय	अप्रमत्तः	११. सावधान
बालेषु	१. बालकों पर	प्रमत्तेषु	९. असावधान
शूरेण	२. वीरता दिखाने वाले (तथा)	यः	७. जो (कलियुग रूपी)
कलिना	५. कलियुग के विषय में	वृकः	८. भेड़िया
धीर	३. धैर्यशाली पुरुषों से	नृषु	१०. मनुष्यों को (वश में करने के लिए)
भीरुणा ।	४. डरने वाले	वर्तते ॥	१२. है

श्लोकार्थ—बालकों पर वीरता दिखाने वाले तथा धैर्यशाली पुरुषों से डरने वाले कलियुग के विषय में क्या कहा जाय ? जो कलियुग रूपी भेड़िया असावधान मनुष्यों को वश में करने के लिये सावधान है।

नवमः श्लोकः

उपवर्णितमेतद्वः पुण्यं पारीक्षितं मया ।
वासुदेवकथोपेतमाख्यानं यदपृच्छत ॥९॥

पदच्छेद—

उपवर्णितम् एतद् वः, पुण्यम् पारीक्षितम् मया ।
वासुदेव कथा उपेतम्, आख्यानम् यद् अपृच्छत ॥

शब्दार्थ—

उपवर्णितम्	१२.	वर्णन किया	वासुदेव	१.	(आप लोगों ने) भगवान् श्रीकृष्ण की
एतद्	११.	इस (कथा) का	कथा	२.	कथा से
वः	८.	आप लोगों से	उपेतम्	३.	संबन्धित
पुण्यम्	१०.	पुण्यप्रद	आख्यानम्	५.	कथा
पारीक्षितम्	९.	राजा परीक्षित् की	यद्	४.	जो
मया ।	७.	मैंने	अपृच्छत ॥	६.	पूछी थी

श्लोकार्थ—आप लोगों ने भगवान् श्रीकृष्ण की कथा से संबन्धित जो कथा पूछी थी, मैंने आप लोगों से राजा परीक्षित् की पुण्यप्रद इस कथा का वर्णन किया ।

दशमः श्लोकः

या याः कथा भगवतः कथनीयोरुकर्मणः ।
गुणकर्माश्रयाः पुम्भिः संसेव्यास्ता बुभूषुभिः ॥१०॥

पदच्छेद—

याः याः कथाः भगवतः, कथनीय उरु कर्मणः ।
गुण कर्म आश्रयाः पुम्भिः, संसेव्याः ताः बुभूषुभिः ॥

शब्दार्थ—

याः याः	७.	जो जो	गुण कर्म	५.	गुण और कर्मों पर
कथाः	८.	कथायें (हैं)	आश्रयाः	६.	आधारित
भगवतः	४.	भगवान् श्रीकृष्ण की	पुंम्भिः	१०.	मनुष्यों को
कथनीय	१.	कीर्तन करने योग्य	संसेव्याः	१२.	सेवन करना चाहिये
उरु	२.	अद्भुत	ताः	११.	उन (कथाओं) का
कर्मणः ।	३.	लीलाधारी	बुभूषुभिः ॥	९.	कल्याण चाहने वाले

श्लोकार्थ—कीर्तन करने योग्य, अद्भुत लीलाधारी भगवान् श्रीकृष्ण की गुण और कर्मों पर आधारित जो-जो कथायें हैं; कल्याण चाहने वाले मनुष्यों को उन कथाओं का सेवन करना चाहिये ।

एकादशः श्लोकः

ऋषय ऊचुः—

सूत जीव समाः सौम्य शाश्वतीर्विशदं यशः ।
यस्त्वं शंससि कृष्णस्य मर्त्यानाममृतं हि नः ॥११॥

पदच्छेद—

सूत जीव समाः सौम्य, शाश्वतीः विशदम् यशः ।
यः त्वम् शंससि कृष्णस्य, मर्त्यानाम् अमृतम् हि नः ॥

शब्दार्थ—

सूत	२.	हे सूत जी (आप)	त्वम्	६.	आप
जीव	५.	जीवें	शंससि	१०.	गान कर रहे हैं
समाः	४.	वर्षों तक	कृष्णस्य	८.	भगवान् श्रीकृष्ण के
सौम्य	१.	मधुर स्वभाव वाले	मर्त्यानाम्	१२.	मृत्युलोक के प्राणियों का
शाश्वतीः	३.	अनन्त	अमृतम्	१३.	अमृत
विशदम् यशः ।	९.	निर्मल यश का	हि	१४.	ही है
यः	७.	जो	नः ॥	११.	(वह) हम

श्लोकार्थ—मधुर स्वभाव वाले हे सूत जी ! आप अनन्त वर्षों तक जीवें; आप जो भगवान् श्रीकृष्ण के निर्मल यश का गान कर रहे हैं, वह हम मृत्युलोक के प्राणियों का अमृत ही है ।

द्वादशः श्लोकः

कर्मण्यस्मिन्ननाश्वासे धूमधूम्रात्मनां भवान् ।
आपाययति गोविन्दपादपद्मासवं मधु ॥१२॥

पदच्छेद—

कर्मणि अस्मिन् अनाश्वासे, धूम धूम्र आत्मनाम् भवान् ।
आपाययति गोविन्द, पाद पद्म आसवम् मधु ॥

शब्दार्थ—

कर्मणि	४.	यज्ञ कर्म में	भवान् ।	१.	आप
अस्मिन्	३.	इस	आपाययति	१२.	पान करा रहे हैं
अनाश्वासे	२.	विश्वास-हीन	गोविन्द	८.	भगवान् श्रीकृष्ण के
धूम	५.	धूयें से	पाद पद्म	९.	चरण-कमल से
धूम्र	६.	धूमिल	आसवम्	१०.	टपके हुए
आत्मनाम्	७.	शरीर वाले (हम लोगों) को	मधु ॥	११.	मधुर मधु का

श्लोकार्थ—आप विश्वास-हीन इस यज्ञ कर्म में धूयें से धूमिल शरीर वाले हम लोगों को भगवान् श्रीकृष्ण के चरण-कमल से टपके हुए मधुर मधु का पान करा रहे हैं ।

त्रयोदशः श्लोकः

तुलयाम लवेनापि न स्वर्गं नापुनर्भवम् ।
भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ॥१३॥

पदच्छेद—

तुलयाम लवेन अपि, न स्वर्गम् न अपुनर्भवम् ।
भगवत् सङ्गि सङ्गस्य, मर्त्यानाम् किमुत आशिषः ॥

शब्दार्थ—

तुलयाम	९.	तुलना कर सकते हैं (फिर)	भगवत्	१.	भगवद्
लवेन, अपि	४.	एक क्षण से, भी	सङ्गि	२.	भक्तों के
न	५.	न (तो)	सङ्गस्य	३.	सत्संग के
स्वर्गम्	६.	स्वर्ग की (और)	मर्त्यानाम्	१०.	मनुष्यों की
न	७.	नहीं	किमुत	१२.	बात ही क्या है
अपुनर्भवम् ।	८.	मोक्ष की	आशिषः ॥	११.	कामनाओं (से तुलना) की

श्लोकार्थ—भगवद् भक्तों के सत्संग के एक क्षण से भी न तो स्वर्ग की और न ही मोक्ष की तुलना कर सकते हैं, फिर मनुष्यों की कामनाओं से तुलना की बात ही क्या है ?

चतुर्दशः श्लोकः

को नाम तृप्येद् रसवित्कथायां, महत्तमैकान्तपरायणस्य ।
नान्तं गुणानामगुणस्य जग्मु-र्योगेश्वरा ये भवपाद्ममुख्याः ॥१४॥

पदच्छेद—

कः नाम तृप्येत् रसवित् कथायाम्, महत्तम एकान्त परायणस्य ।
न अन्तम् गुणानाम् अगुणस्य जग्मुः, योगेश्वराः ये भव पाद्म मुख्याः ॥

शब्दार्थ—

कः	१.	कौन	न अन्तम्	१५.	पार नहीं
नाम	३.	व्यक्ति	गुणानाम्	१४.	गुणों का
तृप्येत्	८.	तृप्त हो सकता है	अगुणस्य	१३.	निर्गुण भगवान् के
रसवित्	२.	रसिक	जग्मुः,	१६.	पा सके थे
कथायाम्,	७.	कथाओं से	योगेश्वराः	१२.	योगिराज (हैं वे भी)
महत्तम	४.	महापुरुषों के	ये	९.	जो
एकान्त	५.	एक मात्र	भव, पाद्म	१०.	शंकर, ब्रह्मा
परायणस्य ।	६.	आश्रय (भगवान् श्रीकृष्ण) की	मुख्याः ॥	११.	इत्यादि प्रमुख

श्लोकार्थ—कौन रसिक व्यक्ति महापुरुषों के एकमात्र आश्रय भगवान् श्रीकृष्ण की कथाओं से तृप्त हो सकता है ? जो शंकर, ब्रह्मा इत्यादि प्रमुख योगिराज हैं, वे भी निर्गुण भगवान् के गुणों का पार नहीं पा सके थे ।

पञ्चदशः श्लोकः

तन्नो भवान् वै भगवत्प्रधानो, महत्तमैकान्तपरायणस्य ।
हरेरुदारं चरितं विशुद्धं, शुश्रूषतां नो वितनोतु विद्वन् ॥१५॥

पदच्छेद— तत् नः भवान् वै भगवत् प्रधानः, महत्तम एकान्त परायणस्य ।
हरेः उदारम् चरितम् विशुद्धम् , शुश्रूषताम् नः वितनोतु विद्वन् ॥

शब्दार्थ—

तत्	७. इसलिये (आप ही)	हरेः	१२. श्रीहरि की
नः	२. हम लोगों में	उदारम्	१३. विशाल (एवं)
भवान्	३. आप	चरितम् ,	१५. लीला-कथा
वै	४. ही	विशुद्धम्	१४. निर्मल
भगवत्	५. भगवान् को	शुश्रूषताम्	८. सुनने के इच्छुक
प्रधानः,	६. जीवन-धन (मानने वाले हैं)	नः	९. हम लोगों को
महत्तम	१०. महापुरुषों के	वितनोतु	१६. सुनावें
एकान्त, परायणस्य ।	११. एकमात्र, आश्रय	विद्वन् ॥	१. हे विद्वान् सूत जी !

श्लोकार्थ—हे विद्वान् सूत जी ! हम लोगों में आप ही भगवान् को जीवन-धन मानने वाले हैं, इसलिये आप ही सुनने के इच्छुक हमलोगों को महापुरुषों के एकमात्र आश्रय श्रीहरि ही विशाल एवं निर्मल लीला-कथा सुनावें ।

षोडशः श्लोकः

स वै महाभागवतः परीक्षिद्, येनापवर्गाख्यमदभ्रबुद्धिः ।
ज्ञानेन वैयासकिशब्दितेन, भेजे खगेन्द्रध्वजपादमूलम् ॥१६॥

पदच्छेद— सः वै महाभागवतः परीक्षित् , येन अपवर्ग आख्यम् अदभ्र बुद्धिः ।
ज्ञानेन वैयासकि शब्दितेन, भेजे खगेन्द्र ध्वज पाद मूलम् ॥

शब्दार्थ—

सः	४. उस	ज्ञानेन	९. ज्ञान से
वै	२. और	वैयासकि	६. शुकदेव मुनि के द्वारा
महाभागवतः	१. परम भगवद् भक्त	शब्दितेन,	७. कहे गये
परीक्षित् ,	५. राजा परीक्षित् ने	भेजे	१४. प्राप्त की थी (उसे हमें बतावें)
येन	८. जिस	खगेन्द्रध्वज	११. गरुडध्वज (भगवान् विष्णु) के
अपवर्ग, आख्यम्	१०. मोक्ष, स्वरूप	पाद	१२. चरणों की
अदभ्र, बुद्धिः ।	३. महान्, बुद्धिमान्	मूलम् ॥	१३. सन्निधि

श्लोकार्थ—परम भगवद् भक्त और महान् बुद्धिमान् उस राजा परीक्षित् ने शुकदेव मुनि के द्वारा कहे गये जिस ज्ञान से मोक्ष स्वरूप गरुडध्वज भगवान् विष्णु के चरणों की सन्निधि प्राप्त की थी, उसे हमें बतावें ।

सप्तदशः श्लोकः

तन्नः परं पुण्यमसंवृतार्थ-माख्यानमत्यद्भुतयोगनिष्ठम् ।
आख्याह्यनन्ताचरितोपपन्नं, पारीक्षितं भागवताभिरामम् ॥१७॥

पदच्छेद—

तत् नः परम् पुण्यम् असंवृत अर्थम् , आख्यानम् अति अद्भुत योग निष्ठम् ।
आख्याहि अनन्त आचरित उपपन्नम् , पारीक्षितम् भागवत अभिरामम् ॥

शब्दार्थ—

तत्	१४.	वह	योग निष्ठम् ।	७.	योग निष्ठा वाली
नः	१.	हमें	आख्याहि	१६.	सुनावें
परम्	२.	परम	अनन्त	८.	श्रीकृष्ण की
पुण्यम्	३.	पवित्र	आचरित	९.	लीलाओं से
असंवृत	४.	स्पष्ट	उपपन्नम् ,	१०.	परिपूर्ण (तथा)
अर्थम् ,	५.	प्रयोजन वाली	पारीक्षितम्	१३.	राजा परीक्षित् की
आख्यानम्	१५.	कथा	भागवत	११.	भगवद् भक्तों के लिये
अति अद्भुत	६.	अति अनोखी	अभिरामम् ॥	१२.	रमणीक

श्लोकार्थ—हमें परम पवित्र, स्पष्ट प्रयोजन वाली, अति अनोखी, योगनिष्ठा वाली, श्रीकृष्ण की लीलाओं से परिपूर्ण तथा भगवद् भक्तों के लिये रमणीक राजा परीक्षित् की वह कथा सुनावें ।

अष्टादशः श्लोकः

सूत उवाच—अहो वयं जन्मभृतोऽद्य हास्म, वृद्धानुवृत्त्यापि विलोमजाताः ।
दौष्कुल्यमाधिं विधुनोति शीघ्रं, महत्तमानामभिधानयोगः ॥१८॥

पदच्छेद—

अहो वयम् जन्म भृतः अद्य हास्म, वृद्ध अनुवृत्त्या अपि विलोम जाताः ।
दौष्कुल्यम् आधिम् विधुनोति शीघ्रम् , महत्तमानाम् अभिधान योगः ॥

शब्दार्थ—

अहो	१.	अरे	विलोम, जाताः ।	२.	सूतकुल में उत्पन्न होकर
वयम्	६.	हमारा	दौष्कुल्यम्	११.	कुल के दोष की
जन्म भृतः	७.	जन्म लेना	आधिम्	१२.	चिन्ता को
अद्य	५.	आज	विधुनोति	१४.	नष्ट कर देता
हास्म,	८.	सफल हुआ है	शीघ्रम् ,	१३.	शीघ्र
वृद्ध, अनुवृत्त्या	४.	महात्माओं की, सेवा से	महत्तमानाम्	९.	महापुरुषों के
अपि	३.	भी	अभिधान, योगः ॥	१०.	नाम का, उच्चारण

श्लोकार्थ—अरे ! सूतकुल में उत्पन्न होकर भी महात्माओं की सेवा से आज हमारा जन्म लेना सफल हुआ है । महापुरुषों के नाम का उच्चारण कुल के दोष की चिन्ता को शीघ्र नष्ट कर देता है ।

एकोनविंशः श्लोकः

कुतः पुनर्गृणतो नाम तस्य, महत्तमैकान्तपरायणस्य ।
योऽनन्तशक्तिर्भगवाननन्तो, महद्गुणत्वाद् यमनन्तमाहुः ॥१६॥

पदच्छेद— कुतः पुनः गृणतः नाम तस्य, महत्तम एकान्त परायणस्य ।
यः अनन्त शक्तिः भगवान् अनन्तः, महद् गुणत्वात् यम् अनन्तम् आहुः ॥

शब्दार्थ—

कुतः	१६.	बात ही क्या है	यः	१.	जो
पुनः	१५.	फिर	अनन्त शक्तिः	४.	अनन्त पराक्रम वाले (हैं)
गृणतः	१४.	स्मरण करने वाले (जनों) की	भगवान्	२.	भगवान्
नाम	१३.	नाम का	अनन्तः	३.	श्रीकृष्ण
तस्य,	१२.	उन (भगवान्) के	महद् गुणत्वात्	६.	महान् गुणों के कारण
महत्तम	९.	सज्जनों के	यम्	५.	जिन्हें
एकान्त	१०.	एकमात्र	अनन्तम्	७.	अनन्त नाम से
परायणस्य ।	११.	आश्रय (हैं)	आहुः ॥	८.	कहते हैं (तथा जो)

श्लोकार्थ—जो भगवान् श्रीकृष्ण अनन्त पराक्रम वाले हैं, जिन्हें महान् गुणों के कारण अनन्त नाम से कहते हैं तथा जो सज्जनों के एकमात्र आश्रय हैं; उन भगवान् के नाम का स्मरण करने वाले जनों की फिर बात ही क्या है ?

विंशः श्लोकः

एतावतालं ननु सूचितेन, गुणैरसाम्यानतिशायनस्य ।
हित्वेतरान् प्रार्थयतो विभूति-र्यस्याङ्घ्रिरेणुं जुषतेऽनभीप्सोः ॥२०॥

पदच्छेद— एतावता अलम् ननु सूचितेन, गुणैः असाम्यान् अतिशायनस्य ।
हित्वा इतरान् प्रार्थयतः विभूतिः, यस्य अङ्घ्रि रेणुम् जुषते अनभीप्सोः ॥

शब्दार्थ—

एतावता	१.	इतना	इतरान्	९.	अन्य (देवताओं) को
अलम्	४.	पर्याप्त (है कि)	प्रार्थयतः	८.	चाहने वाले
ननु	२.	ही	विभूतिः,	५.	श्री लक्ष्मी जी
सूचितेन,	३.	कहना	यस्य	१२.	उस
गुणैः	६.	उत्तम गुणों के कारण	अङ्घ्रि	१४.	चरणों की
असाम्यान्	७.	बेजोड़ (तथा)	रेणुम्	१५.	धूली से
अतिशायनस्य ।	१३.	सर्व श्रेष्ठ (भगवान्) के	जुषते	१६.	प्रेम करती हैं
हित्वा	१०.	छोड़कर	अनभीप्सोः ॥	११.	न चाहने पर भी

श्लोकार्थ—इतना ही कहना पर्याप्त है कि श्रीलक्ष्मी जी उत्तम गुणों के कारण बेजोड़ तथा चाहने वाले अन्य देवताओं को छोड़कर न चाहने पर भी उस सर्व-श्रेष्ठ भगवान् के चरणों की धूली से प्रेम करती हैं ।

एकविंशः श्लोकः

अथापि यत्पादनखावसृष्टं, जगद् विरिञ्चोपहृतार्हणाम्भः।
सेशं पुनात्यन्यतमो मुकुन्दात्, को नाम लोके भगवत्पदार्थः ॥२१॥

पदच्छेद—

अथापि यत् पाद नख अवसृष्टम्, जगत् विरिञ्च उपहृत अर्हण अम्भः।
स ईशम् पुनाति अन्यतमः मुकुन्दात्, कः नाम लोके भगवत् पद अर्थः॥

शब्दार्थ—

अथापि	१. तथा	**स ईशम्**	८. शंकर सहित
यत्	५. जिस (भगवान् श्रीकृष्ण) के	**पुनाति**	१०. पवित्र कर देता है (अतः)
पाद नख	६. चरण-नख से	**अन्यतमः**	१३. भिन्न
अवसृष्टम्,	७. बहने पर (गंगा नाम से)	**मुकुन्दात्,**	१२. भगवान् श्रीकृष्ण से
जगत्	९. संसार को	**कः नाम**	१४. कौन व्यक्ति
विरिञ्च	२. ब्रह्मा जी के द्वारा	**लोके**	११. संसार में
उपहृत	३. अर्पित	**भगवत्**	१५. भगवत्
अर्हण अम्भः।	४. पूजा का जल	**पद अर्थः।**	१६. शब्द का अर्थ (हो सकता है)

श्लोकार्थ—तथा ब्रह्मा जी के द्वारा अर्पित पूजा का जल जिस भगवान् श्रीकृष्ण के चरण-नख से बहने पर गंगा नाम से शंकर सहित संसार को पवित्र कर देता है; अतः संसार में भगवान् श्रीकृष्ण से भिन्न कौन व्यक्ति भगवत् शब्द का अर्थ हो सकता है ?

द्वाविंशः श्लोकः

यत्रानुरक्ताः सहसैव धीरा, व्यपोह्य देहादिषु सङ्गमूढम्।
व्रजन्ति तत्पारमहंस्यमन्त्यं, यस्मिन्नहिंसोपशमः स्वधर्मः ॥२२॥

पदच्छेद—

यत्र अनुरक्ताः सहसा एव धीराः, व्यपोह्य देह आदिषु सङ्ग मूढम्।
व्रजन्ति तत् पारम हंस्यम् अन्त्यम्, यस्मिन् अहिंसा उपशमः स्व धर्मः॥

शब्दार्थ—

यत्र	१. जिस (भगवान् श्रीकृष्ण) के	**व्रजन्ति**	११. चले जाते हैं
अनुरक्ताः	२. अनुरागी	**तत्**	७. उस
सहसा एव	१०. एकाएक ही	**पारमहंस्यम्**	९. परमहंस आश्रम में
धीराः,	३. धीर जन	**अन्त्यम्,**	८. अन्तिम
व्यपोह्य	६. हटाकर	**यस्मिन्**	१२. जिसमें
देह आदिषु	४. शरीर आदि से	**अहिंसा, उपशमः**	१३. अहिंसा और, इन्द्रिय दमन
सङ्ग मूढम्।	५. ममता और मोह	**स्व धर्मः॥**	१४. परम धर्म (है)

श्लोकार्थ—जिस भगवान् श्रीकृष्ण के अनुरागी धीर जन शरीर आदि से ममता और मोह हटाकर उस अन्तिम परहंस आश्रम में एकाएक ही चले जाते हैं, जिसमें अहिंसा और इन्द्रिय-दमन परम धर्म है।

त्रयोविंशः श्लोकः

अहं हि पृष्टोऽर्यमणो भवद्भि-राचक्ष आत्मावगमोऽत्र यावान् ।
नभः पतन्त्यात्मसमं पतत्त्रिण-स्तथा समं विष्णुगतिं विपश्चितः ॥२३॥

पदच्छेद—

अहम् हि पृष्टः अर्यमणः भवद्भिः, आचक्षे आत्मन् अवगमः अत्र यावान् ।
नभः पतन्ति आत्मसमम् पतत्त्रिणः, तथा समम् विष्णु गतिम् विपश्चितः ॥

शब्दार्थ—

अहम् हि	३. मुझसे जो	नभः	९. आकाश में
पृष्टः	४. पूछा (है)	पतन्ति	१२. उड़ते हैं
अर्यमणः	१. तेजस्वी हे ऋषियों !	आत्म, समम्	११. अपनी शक्ति के, अनुसार
भवद्भिः,	२. आप लोगों ने	पतत्त्रिणः,	१०. पक्षिगण
आचक्षे	८. कह रहा हूँ	तथा	१३. उसी प्रकार
आत्मन्, अवगमः	६. अपने, ज्ञान के	समम्	१५. अपनी शक्ति के अनुसार
अत्र	५. इसमें	विष्णु गतिम्	१६. विष्णु की लीला का(वर्णन करते हैं)
यावान् ।	७. अनुसार	विपश्चितः ॥	१४. विद्वान् लोग

श्लोकार्थ—तेजस्वी हे ऋषियों ! आप लोगों ने मुझसे जो पूछा है, इसमें अपने ज्ञान के अनुसार कह रहा हूँ । आकाश में पक्षिगण अपनी शक्ति के अनुसार उड़ते हैं; उसी प्रकार प्रकार विद्वान् लोग अपनी शक्ति के अनुसार विष्णु की लीला का वर्णन करते हैं ।

चतुर्विंशः श्लोकः

एकदा धनुरुद्यम्य विचरन् मृगयां वने ।
मृगाननुगतः श्रान्तः क्षुधितस्तृषितो भृशम् ॥२४॥

पदच्छेद—

एकदा धनुः उद्यम्य, विचरन् मृगयाम् वने ।
मृगान् अनुगतः श्रान्तः, क्षुधितः तृषितः भृशम् ॥

शब्दार्थ—

एकदा	१. एकबार (राजा परीक्षित्)	मृगान्	७. मृगों का
धनुः	४. धनुष	अनुगतः	८. पीछा करते-करते
उद्यम्य	५. चढ़ाकर	श्रान्तः	१२. थक गये थे
विचरन्	६. घूमते हुये	क्षुधितः	९. भूख और
मृगयाम्	३. शिकार के लिये	तृषितः	१०. प्यास से
वने ।	२. वन में	भृशम् ॥	११. बहुत

श्लोकार्थ—एकबार राजा परीक्षित् वन में शिकार के लिये धनुष चढ़ाकर घूमते हुए मृगों का पीछा करते-करते भूख और प्यास से बहुत थक गये थे ।

पञ्चविंशः श्लोकः

जलाशयमचक्षाणः प्रविवेश तमाश्रमम् ।
ददर्श मुनिमासीनं शान्तं मीलितलोचनम् ॥२५॥

पदच्छेद—

जलाशयम् अचक्षाणः, प्रविवेश तम् आश्रमम् ।
ददर्श मुनिम् आसीनम्, शान्तम् मीलित लोचनम् ॥

शब्दार्थ—

जलाशयम्	१.	(वहाँ) तालाब को	**मुनिम्**	१०.	एक मुनि को
अचक्षाणः	२.	न देखते हुए (उन्होंने)	**आसीनम्**	६.	आसन पर बैठे हुए (एवं)
प्रविवेश	५.	प्रवेश किया (जहाँ)	**शान्तम्**	९.	शान्त चित्त
तम्	३.	उस	**मीलित**	८.	बन्द किये हुये
आश्रमम् ।	४.	आश्रम में	**लोचनम् ॥**	७.	आँखों को
ददर्श	११.	देखा			

श्लोकार्थ—वहाँ तालाब को न देखते हुये उन्होंने उस आश्रम में प्रवेश किया, जहाँ आसन पर बैठे हुये एवं आँखों को बन्द किये हुये शान्त-चित्त एक मुनि को देखा ।

षड्विंशः श्लोकः

प्रतिरुद्धेन्द्रियप्राणमनोबुद्धिमुपारतम् ।
स्थानत्रयात्परं प्राप्तं ब्रह्मभूतमविक्रियम् ॥२६॥

पदच्छेद—

प्रतिरुद्ध इन्द्रिय प्राण, मनः बुद्धिम् उपारतम् ।
स्थान त्रयात् परम् प्राप्तम्, ब्रह्म भूतम् अविक्रियम् ॥

शब्दार्थ—

प्रतिरुद्ध	३.	विषयों से रोके हुये	**त्रयात्**	५.	(जाग्रत, स्वप्न और सुषुप्ति) तीनों
इन्द्रिय, प्राण	१.	इन्द्रिय, प्राण	**परम्**	७.	ऊपर
मनः बुद्धिम्	२.	मन और बुद्धि को	**प्राप्तम्**	१०.	प्राप्त हुये (मुनि को देखा)
उपारतम् ।	४.	संसार से परे	**ब्रह्म भूतम्**	९.	ब्रह्मलीन दशा को
स्थान	६.	अवस्थाओं से	**अविक्रियम् ॥**	८.	निर्विकार (और)

श्लोकार्थ—इन्द्रिय, प्राण, मन और बुद्धि को विषयों से रोके हुये, संसार से परे, जाग्रत-स्वप्न और सुषुप्ति तीनों अवस्थाओं से ऊपर, निर्विकार और ब्रह्मलीन दशा को प्राप्त हुये मुनि को उन्होंने देखा ।

सप्तविंशः श्लोकः

विप्रकीर्णजटाच्छन्नं रौरवेणाजिनेन च ।
विशुष्यत्तालुरुदकं तथाभूतमयाचत ॥२७॥

पदच्छेद—

विप्रकीर्ण जटा छन्नम्, रौरवेण अजिनेन च ।
विशुष्यत् तालुः उदकम्, तथाभूतम् अयाचत ॥

शब्दार्थ—

विप्रकीर्ण	३.	बिखरी	विशुष्यत्	१.	सूखते
जटा	४.	जटाओं से	तालुः	२.	कण्ठवाले (परीक्षित्) ने
छन्नम्	८.	ढके हुये (मुनि) से	उदकम्	१०.	जल की
रौरवेण	६.	काले मृग की	तथाभूतम्	९.	उस स्थिति में
अजिनेन	७.	छाल से	अयाचत ॥	११.	याचना की
च ।	५.	और			

श्लोकार्थं—सूखते कण्ठवाले परीक्षित् ने बिखरी जटाओं से और काले मृग की छाल से ढके हुये मुनि से उस स्थिति में जल की याचना की ।

अष्टाविंशः श्लोकः

अलब्धतृणभूम्यादिरसम्प्राप्तार्घ्यसूनृतः ।
अवज्ञातमिवात्मानं मन्यमानश्चुकोप ह ॥२८॥

पदच्छेद—

अलब्ध तृण भूमि आदिः, असम्प्राप्त अर्घ्य सूनृतः ।
अवज्ञातम् इव आत्मानम्, मन्यमानः चुकोप ह ॥

शब्दार्थ—

अलब्ध	३.	नहीं पाकर (तथा)	अवज्ञातम्	८.	अपमानित
तृण, भूमि	१.	आसन, स्थान	इव	९.	सा
आदिः	२.	इत्यादि	आत्मानम्	७.	अपने को
असम्प्राप्त	६.	अभाव में	मन्यमानः	१०.	मानते हुये
अर्घ्य	४.	सत्कार और	चुकोप	१२.	क्रुद्ध होगये
सूनृतः ।	५.	सुन्दर वचन के	ह ॥	११.	अत्यन्त

श्लोकार्थं—राजा परीक्षित् आसन, स्थान इत्यादि नहीं पाकर तथा सत्कार और सुन्दर वचन के अभाव में अपने को अपमानित-सा मानते हुए अत्यन्त क्रुद्ध हो गये ।

एकोनत्रिंशः श्लोकः

अभूतपूर्वः सहसा क्षुत्तृड्भ्यामर्दितात्मनः ।
ब्राह्मणं प्रत्यभूद् ब्रह्मन् मत्सरो मन्युरेव च ॥२९॥

पदच्छेद—

अभूतपूर्वः सहसा, क्षुत् तृड्भ्याम् अर्दित आत्मनः ।
ब्राह्मणम् प्रति अभूत् ब्रह्मन् , मत्सरः मन्युः एव च ॥

शब्दार्थ—

अभूतपूर्वः	९. बिल्कुल नया	प्रति	७. प्रति
सहसा	८. एकाएक	अभूत्	१४. उत्पन्न हो गया
क्षुत्	२. क्षुधा और	ब्रह्मन्	१. हे शौनक जी !
तृड्भ्याम्	३. प्यास से	मत्सरः	११. ईर्ष्याभाव
अर्दित	४. व्याकुल	मन्युः	१३. क्रोध
आत्मनः ।	५. चित्त (परीक्षित्) को	एव	१०. ही
ब्राह्मणम्	६. ब्राह्मण मुनि के	च ॥	१२. और

श्लोकार्थ—हे शौनक जी ! क्षुधा और प्यास से व्याकुल-चित्त परीक्षित् को ब्राह्मण मुनि के प्रति एकाएक बिल्कुल नया ही ईर्ष्याभाव और क्रोध उत्पन्न हो गया ।

त्रिंशः श्लोकः

स तु ब्रह्मऋषेरंसे गतासुमुरगं रुषा ।
विनिर्गच्छन्धनुष्कोट्या निधाय पुरमागमत् ॥३०॥

पदच्छेद—

सः तु ब्रह्म ऋषेः अंसे, गत असुम् उरगम् रुषा ।
विनिर्गच्छन् धनुष् कोट्या, निधाय पुरम् आगमत् ॥

शब्दार्थ—

सः	२. वे	रुषा ।	४. क्रोध के कारण
तु	१. तथा	विनिर्गच्छन्	३. निकलते समय
ब्रह्म ऋषेः	५. ब्रह्मर्षि (शमीक) के	धनुष्कोट्या	७. धनुष की नोक से
अंसे	६. कन्धे पर	निधाय	१०. डालकर
गत असुम्	८. मरे हुये	पुरम्	११. नगर को
उरगम्	९. सांप को	आगमत् ॥	१२. लौट आये

श्लोकार्थ—तथा वे निकलते समय क्रोध के कारण ब्रह्मर्षि शमीक के कन्धे पर धनुष की नोक से मरे हुये सांप को डालकर नगर को लौट आये ।

एकत्रिंशः श्लोकः

एष किं निभृताशेषकरणो मीलितेक्षणः ।
मृषा समाधिराहोस्वित्किं नु स्यात् क्षत्रबन्धुभिः ॥३१॥

पदच्छेद—

एषः किम् निभृत अशेष, करणः मीलित ईक्षणः ।
मृषा समाधिः अहोस्वित् , किम् नु स्यात् क्षत्रबन्धुभिः ॥

शब्दार्थ—

एषः	२.	ये (ऋषि)	मृषा	१२.	झूठी
किम्	१.	क्या	समाधिः	१३.	समाधि
निभृत	५.	विषयों से अलग करके	आहोस्वित्	८.	अथवा
अशेष	३.	सम्पूर्ण	किम्	१०.	क्या प्रयोजन
करणः	४.	इन्द्रियों को	नु	११.	ऐसा सोचकर
मीलित	७.	बन्द किये हैं	स्यात्	१४.	लगाये हैं
ईक्षणः ।	६.	नेत्रों को	क्षत्रबन्धुभिः ॥	६.	क्षत्रिय राजाओं से

श्लोकार्थ—क्या ये ऋषि सम्पूर्ण इन्द्रियों को विषयों से अलग करके नेत्रों को बन्द किये हैं अथवा 'क्षत्रिय राजाओं से क्या प्रयोजन' ऐसा सोचकर झूठी समाधि लगाये हैं ?

द्वात्रिंशः श्लोकः

तस्य पुत्रोऽतितेजस्वी विहरन् बालकोऽर्भकैः ।
राज्ञाघं प्रापितं तातं श्रुत्वा तत्रेदमब्रवीत् ॥३२॥

पदच्छेद—

तस्य पुत्रः अति तेजस्वी, विहरन् बालकः अर्भकैः ।
राज्ञा अघम् प्रापितम् तातम्, श्रुत्वा तत्र इदम् अब्रवीत् ॥

शब्दार्थ—

तस्य	१.	उन (शमीक ऋषि) का	अघम्	१०.	अपराध को
पुत्रः	४.	पुत्र	प्रापितम्	६.	किये गये
अतितेजस्वी	२.	अत्यन्त तेजस्वी	तातम्	८.	पिता के प्रति
विहरन्	६.	खेलता हुआ	श्रुत्वा	११.	सुनकर
बालकः	३.	बालक	तत्र	१२.	वहाँ
अर्भकैः ।	५.	(अन्य) बालकों के साथ	इदम्	१३.	यह
राज्ञा	७.	राजा के द्वारा	अब्रवीत् ॥	१४.	बोला

श्लोकार्थ—उन शमीक ऋषि का अत्यन्त तेजस्वी बालक पुत्र अन्य बालकों के साथ खेलता हुआ राजा के द्वारा पिता के प्रति किये गये अपराध को सुनकर वहाँ यह बोला ।

त्रयस्त्रिंशः श्लोकः

अहो अधर्मः पालानां पीव्नां बलिभुजामिव ।
स्वामिन्यघं यद् दासानां द्वारपानां शुनामिव ॥३३॥

पदच्छेद—

अहो अधर्मः पालानाम्, पीव्नाम् बलि भुजाम् इव ।
स्वामिनि अघम् यद् दासानाम्, द्वारपानाम् शुनाम् इव ॥

शब्दार्थ—

अहो	१. अरे		स्वामिनि	१०. स्वामी के प्रति
अधर्मः	६. अन्याय		अघम्	१२. अपराध (है)
पालानाम्	५. राजाओं का (यह)		यद्	११. यह
पीव्नाम्	४. बलिष्ठ		दासानाम्	६. दासों का
बलिभुजाम्	२. कौओं के		द्वारपानाम्	८. दरवाजे की रक्षा करने वाले
इव ।	३. समान		शुनाम् इव ॥	७. कुत्तों के समान

श्लोकार्थ—अरे ! कौओं के समान बलिष्ठ राजाओं का यह अन्याय ! कुत्तों के समान दरवाजे की रक्षा करने वाले दासों का स्वामी के प्रति यह अपराध है ।

चतुस्त्रिंशः श्लोकः

ब्राह्मणैः क्षत्रबन्धुर्हि द्वारपालो निरूपितः ।
स कथं तद्गृहे द्वाःस्थः सभाण्डं भोक्तुमर्हति ॥३४॥

पदच्छेद—

ब्राह्मणैः क्षत्रबन्धुः हि, द्वारपालः निरूपितः ।
सः कथम् तद् गृहे द्वाः स्थः, स भाण्डम् भोक्तुम् अर्हति ॥

शब्दार्थ—

ब्राह्मणैः	१. ब्राह्मणों ने		कथम्	८. कैसे
क्षत्रबन्धुः	३. क्षत्रियों को		तद् गृहे	६. उस घर के
हि	२. ही		द्वाः, स्थः	६. दरवाजे पर, खड़ा हुआ
द्वारपालः	४. द्वार का रक्षक		स भाण्डम्	१०. पात्र में
निरूपितः ।	५. बनाया (है)		भोक्तुम्	११. खाने के
सः	७. वह		अर्हति ॥	१२. योग्य हो सकता है

श्लोकार्थ—ब्राह्मणों ने ही क्षत्रियों को द्वार का रक्षक बनाया है । दरवाजे पर खड़ा हुआ वह कैसे उस घर के पात्र में खाने के योग्य हो सकता है ?

पञ्चत्रिंशः श्लोकः

कृष्णे गते भगवति शास्तर्युत्पथगामिनाम् ।
तद्भिन्नसेतूनद्याहं शास्मि पश्यत मे बलम् ॥३५॥

पदच्छेद—

कृष्णे गते भगवति, शास्तरि उत्पथ गामिनाम् ।
तद् भिन्न सेतून् अद्य अहम् , शास्मि पश्यत मे बलम् ॥

शब्दार्थ—

कृष्णे गते	५. श्रीकृष्ण के चले जाने पर		सेतून्	७. मर्यादा का
भगवति	४. भगवान्		अद्य	११. आज
शास्तरि	३. शासक		अहम्	९. मैं
उत्पथ	१. कुमार्ग		शास्मि	१०. दण्ड दे रहा हूँ
गामिनाम् ।	२. गामियों के		पश्यत	१४. (सब) देखें
तद्	६. उनकी		मे	१२. मेरे
भिन्न	८. उल्लङ्घन करने वालों को		बलम् ॥	१३. बल को

श्लोकार्थ—कुमार्ग गामियों के शासक भगवान् श्रीकृष्ण के चले जाने पर उनकी मर्यादा का उल्लङ्घन करने वालों को मैं दण्ड दे रहा हूँ । आज मेरे बल को सब देखें ।

षट्त्रिंशः श्लोकः

इत्युक्त्वा रोषताम्राक्षो वयस्यानृषिबालकः ।
कौशिक्याप उपस्पृश्य वाग्वज्रं विससर्ज ह ॥३६॥

पदच्छेद—

इति उक्त्वा रोष ताम्र अक्षः, वयस्यान् ऋषि बालकः ।
कौशिकी आपः उपस्पृश्य, वाक् वज्रम् विससर्ज ह ॥

शब्दार्थ—

इति	५. ऐसा	कौशिकी	७. कौशिकी नदी के
उक्त्वा	६. कह कर (तथा)	आपः	८. जल से
रोष	१. क्रोध से	उपस्पृश्य	९. आचमन करके
ताम्र, अक्षः	२. लाल, आँखों वाले	वाक् वज्रम्	११. शाप
वयस्यान्	४. साथियों से	विससर्ज	१२. दे दिया
ऋषि बालकः ।	३. ऋषि कुमार ने	ह ॥	१०. (राजा को यह कठोर)

श्लोकार्थ—क्रोध से लाल आँखों वाले ऋषि कुमार ने साथियों से ऐसा कहकर तथा कौशिकी नदी के जल से आचमन करके राजा को यह कठोर शाप दे दिया ।

सप्तत्रिंशः श्लोकः

इति लङ्घितमर्यादं तक्षकः सप्तमेऽहनि ।
दङ्क्ष्यति स्म कुलाङ्गारं चोदितो मे ततद्रुहम् ॥३७॥

पदच्छेद—

इति लङ्घित मर्यादम्, तक्षकः सप्तमे अहनि ।
दङ्क्ष्यति स्म कुल अङ्गारम्, चोदितः मे तत द्रुहम् ॥

शब्दार्थ—

इति	१.	इस प्रकार	दङ्क्ष्यति स्म	१२.	डस लेगा
लङ्घित	३.	तोड़ने वाले	कुल	५.	कुल
मर्यादम्	२.	मर्यादा	अङ्गारम्	६.	कलंक (परीक्षित्) को
तक्षकः	९.	तक्षक नाग	चोदितः	८.	प्रेरणा से
सप्तमे	१०.	सातवें	मे	७.	मेरी
अहनि ।	११.	दिन	तत, द्रुहम् ॥	४.	पिता के, अपराधी (और)

श्लोकार्थ—इस प्रकार मर्यादा तोड़ने वाले, पिता के अपराधी और कुल-कलंक परीक्षित् को मेरी प्रेरणा से तक्षक नाग सातवें दिन डस लेगा ।

अष्टात्रिंशः श्लोकः

ततोऽभ्येत्याश्रमं बालो गले सर्पकलेवरम् ।
पितरं वीक्ष्य दुःखार्तो मुक्तकण्ठो रुरोद ह ॥३८॥

पदच्छेद—

